तत्वार्थसर्वा०
२

व्यतिरेकत्वान्तत्वमेवार्थः। तत्वार्थस्य श्रद्धानं तत्वार्थश्रद्धानं सम्यग्दर्शनं प्रत्येतव्यं तत्वार्थश्च वक्ष्यमाणो
जीवादिः। दृशेरालोकार्थत्वात् श्रद्धानार्थगतिर्नोपपद्यते। धातूनामनेकार्थत्वाददोषः प्रसिद्धार्थ
त्यागः। कुत इति चेन्मोक्षमार्गप्रकरणात्। तत्वार्थश्रद्धानं हि आत्मपरिणामो मोक्षकारणं युज्यते भव्य
जीवविषयत्वात्। आलोकनं तु चक्षुरादिनिमित्तं। सर्वसंसारिजीवसाधारणत्वा
न्न मोक्षमार्गो युक्तः। अर्थश्रद्धानमिति चेत्सर्वार्थप्रसंगः। तत्वश्रद्धानमिति चेद्भावमात्रप्रसंगः
। सत्ताद्रव्यत्वगुणत्वकर्मत्वादि तत्वमिति कैश्चित्कल्प्यत इति। तत्वमेकत्वं। मिति वा सर्वैक्यग्रह
णप्रसंगः। पुरुष एवेदं सर्वमित्यादि कैश्चित्कल्प्यत इति। एवं सति दृष्टेष्टविरोधः। तस्मादव्यभिचा [illegible] पादानं
तद्द्विविधं सरागवीतरागविषयभेदात्। प्रशमसंवेगानुकंपास्तिक्य [illegible] प्रथमं
आत्मविशुद्धिमात्रमितरत्। अथैतत्सम्यग्दर्शनं जीवादिपदार्थविषयं कथ [illegible] त्पद्यत इ
त्यत आह॥ तन्निसर्गादधिगमाद्वा निसर्गः स्वभाव इत्यर्थः॥३॥ अधिगमोऽर्थावबोधः। [illegible]

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्योपशमात्क्षयोपशमाद्वा आत्मा सम्यग्दर्शनपर्यायेणाविर्भवति। तदैव तस्य मत्यज्ञानश्रु
ताज्ञाननिवृत्तिपूर्वकं मतिज्ञानं श्रुतिज्ञानं चाविर्भवति। घनपटलविगमे सवितुः प्रता
पप्रकाशाभिव्यक्तिवत्। अल्पाच्तरादभ्यर्हितं पूर्वं निपतति। कथमभ्यर्हितत्वं ज्ञानस
म्यग्व्यपदेशहेतुत्वात्। चारित्रात्पूर्वं ज्ञानं प्रयुक्तं तत्पूर्वकत्वाच्चारित्रस्य सर्वकर्मविप्र
मोक्षो मोक्षः तत्प्राप्त्युपायो मार्गः। मार्ग इति चैकवचननिर्देशः। समस्तस्य मार्गभावज्ञापन
र्थः। तेन व्यस्तस्य मार्गत्वनिवृत्तिः कृता भवति अतः सम्यग्दर्शनं। सम्यग्ज्ञानं सम्यक्चारि
मित्येतत्त्रितयं समुदितं मोक्षस्य साक्षान्मार्गो वेदितव्यः। तत्रादावुद्दिष्टस्य सम्यग्दर्शनस्य
लक्षणनिर्देशार्थमिदमुच्यते॥ तत्त्वार्थश्रद्धानं सम्यग्दर्शनं॥२॥ तत्त्वशब्दो भावसामान्यवाची कथं
तदिति सर्वनामपदं सर्वनाम च सामान्ये वर्त्तते तस्य भावस्तत्त्वं तस्य कस्य योऽर्थो यथावस्थितः। तथा
तस्य भवनमित्यर्थः। अर्यत इत्यर्थो निश्चीयत इत्यर्थः। तत्त्वेनार्थस्तत्त्वार्थः। अथवा भावेन भाववतोभिधानं तद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

टीका। तत्र चेतनालक्षणो जीवः। सा च ज्ञानादिभेदादनेकधा भिद्यते। तद्विपर्ययलक्षणोऽजी-
वः। शुभाशुभकर्मागमद्वाररूपः आस्रवः। आत्मकर्मणोरन्योन्यप्रदेशात्मको बंधः। आस्र-
वनिरोधलक्षणः संवरः। एकदेशकर्मसंक्षयलक्षणा निर्जरा। कृत्स्नकर्मविप्रयोगलक्ष-
णो मोक्षः। एषां प्रपंच उत्तरत्र वक्ष्यते। सर्वस्य फलस्यात्माधीनत्वादादौ जीवग्रहणं तदुप-
कारार्थत्वादनन्तरमजीवाभिधानं तदुभयविषयत्वादनन्तरमास्रवग्रहणं तत्पूर्व-
कत्वाद्बंधस्य तदनन्तरं बंधाभिधानं संवृतस्य बंधाभावात्। तत्प्रत्यनीकप्रतिपत्त्यर्थं संवरवच-
नं संवरे सति निर्जरोपपत्तेस्तदन्तिके निर्जरावचनं अंते प्राप्यत्वान्मोक्षस्यांते वचनं इह
पुण्यपापग्रहणं कर्तव्यं नवपदार्था इत्यन्यैरप्युक्तत्वान्न कर्तव्यं। आस्रवे बंधे चांतर्भा-
वात्। यद्येवमास्रवादिग्रहणमनर्थकं जीवाजीवयोरंतर्भावात्। नानर्थकमिदं मोक्षः प्रकृतः
सोऽवश्यं निर्देष्टव्यः। स च संसारपूर्वकः संसारस्य प्रधानहेतुरास्रवो बंधश्च मोक्षस्य प्रधानहेतु ४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वेन निर्देशः कस्याः क्रियायाः का च क्रिया उत्पद्यत इत्यध्याह्रियते सोपस्कारत्वात्सूत्राणां तदेतत्स
म्यग्दर्शनं निसर्गादधिगमाद्वोत्पद्यत इति अत्राह निसर्गजे सम्यग्दर्शने अर्थाधिगमः स्याद्वा
न वा। यद्यस्ति तदपि अधिगमजमेव नार्थान्तरं। अथ ना[illegible]स्या
र्थश्रद्धानमिति नैष दोषः उभयत्र सम्यग्दर्शने अन्तरंगो हेतुस्तुल्यः। दर्शनमो[illegible]पशमः। क्ष
योपशमो वा तस्मिन्सति यद्बाह्योपदेशादृते प्रादुर्भवति तन्नैसर्गिकं यत्परोपदेशपूर्वकं जी
वाद्यधिगमनिमित्तं तदुत्तरमित्यनयोर्भेदः। तद्ग्रहणं किमर्थं अनन्तरनिर्देशार्थं। अनन्तरं स
म्यग्दर्शनं। तदित्यनेन निर्दिश्यते। इतरथा हि मोक्षमार्गोऽपि प्रकृतः। तस्याभिसंबंधः स्या
त्। ननु च अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति अनन्तरस्य सम्यग्दर्शनस्य ग्रहणं सिद्धं। प्र
त्यासत्तेः प्रधानं बलीय इति मोक्षमार्ग एव संबध्येत। तस्मात्तद्वचनं क्रियते। तत्त्वार्थ। श्रद्धानं सम्य
ग्दर्शनमित्युक्तं अथ किं तत्त्वमित्यत इदमाह॥ जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवः स्थापनाजीवो द्रव्यजीवो भावजीव इति चतुर्धा जीवः। शब्दार्थो न्यस्यते जीवनगु
णमनपेक्ष्य यस्य कस्यचिन्नाम क्रियमाणं नामजीवः। अक्षनिक्षेपादिषु जीवः इति वा मनु
ष्यः जीव इति वा व्यवस्थाप्यमानः स्थापनाजीवः। द्रव्यजीवो द्विविधः। आगमद्रव्यजीवः। [illegible]
नोआगमद्रव्यजीवश्चेति तत्र जीवप्राभृतज्ञायी मनुष्यजीवप्राभृतज्ञायी वा अनुपयुक्त
आत्मा आगमद्रव्यजीवः। नोआगमद्रव्यजीवस्त्रेधा व्यवतिष्ठते ज्ञायकशरीरभावितद्व्य
तिरिक्तभेदात् तत्र ज्ञातुर्यच्छरीरं त्रिकालगोचरं तज्ज्ञायकशरीरं सामान्यापेक्षया नोआ
गमभाविजीवो नास्ति जीवो नास्ति जीवनसामान्यस्य सदापि विद्यमानत्वात् विशेषापेक्ष
या त्वस्ति गत्यन्तरे जीवो व्यवस्थितः। मनुष्यभावप्राप्तिं प्रत्यभिमुखः मनुष्यभावीजीवः। त
द्व्यतिरिक्तः कर्मनोकर्मविकल्पः। भावजीवो द्विविधः आगमभावजीवो नोआगमभाव
जीवश्चेति तत्र जीवप्राभृतविषयोपयोगाविष्टः। मनुष्यजीवप्राभृतवि ५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संवरोनिर्जराबंधस्तः इक्षमनदेउदेउ गस्कलनिर्दिश्यनार्थाद्यानष्टछगुणदेशः ऋतः इत्यपेक्षि
सामानेऽस्तत्वे तस्यापिविशेषमष्टस्त्रगुणादानं पुथोऽजमार्थस्त्वचिआ जायाताः । सूत्रवर्णाधीति
तेष्वाख्यालावबाधीसुक्तः सकलंकजीवादिनिर्दिश्यन्ते । सामानाधिकरण्यं प्रतिचेदुक्तेऽ
व्यतिरेकात्तन्नावाध्यारोपात्सामानाधिकरण्यं लावतिष्ठानऽपद्योगाद्यान्मेतिर्यक्षौ वंतलि
गसंख्यानुवृत्तिः प्राप्नोतिविशेषणविशेष्यसंबंधे सत्यपि शब्दशक्तिव्यपेक्षयान्यतरलिंग
संख्याव्यतिक्रमो न भवति श्रयं क्रमः । आदिसूत्रेऽपिजोऽद्यः । एवमेषामुद्दिष्टानां सम्यग्दर्शनादीन
दीनां जीवादीनां च संव्यवहारविशेषव्यभिचारनिवृत्त्यर्थमाह ॥ नामस्थापनाद्रव्यभावतस्त
न्न्यासः ॥ अतत्गुणेषु वस्तुनि संव्यवहारार्थं पुरुषकारान्नियुज्यमानं संज्ञाकर्म नाम काष्ठ
पुस्तचित्रकर्माक्षनिक्षेपादिषु सोयमिति स्थाप्यमाना स्थापना । गुणै
द्रोष्यते गुणान्द्रोष्यतीति वा द्रव्यं वर्तमानतत्पर्यायोपलक्षितं द्रव्यं भावः । तस्य नाम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

(अल्पाच्)तरस्य पूर्वनिपातः प्राप्नोति नैष दोषः अभ्यर्हितत्वात्प्रमाणस्य पूर्वनिपातः। अभ्यर्हितत्वं च
सर्वतो बलीयः कुतो अभ्यर्हितत्वं नयप्ररूपणप्रभवयोनित्वात्। एवं ह्युक्तं प्रगृह्य प्रमाणतः।
परिणतिविशेषादर्थावधारणं नय इति सकलविषयत्वाच्च प्रमाणस्य तथा चोक्तं सकलादेशः
प्रमाणाधीनो विकलादेशो नयाधीन इति नयो द्विविधः द्रव्यार्थिकः पर्यायार्थिकश्च पर्याया
र्थिकनयेन भावतत्त्वमधिगंतव्यमितरेषां त्रयाणां द्रव्यार्थिकनयेन सामान्यात्मकत्वात् द्रव्यम
र्थः प्रयोजनमस्येत्यसौ द्रव्यार्थिकः पर्यायार्थः। प्रयोजनमस्येत्यसौ पर्यायार्थिकः। तत्सर्वं
समुदितं प्रमाणेनाधिगंतव्यं। एवं प्रमाणनयैः प्रगतानां जीवादीनां पुनरप्यधिगमोपायांत
रप्रदर्शनार्थमाह॥ सूत्रं निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः॥ निर्देशः
स्वरूपाभिधानं स्वामित्वमाधिपत्यं साधनमुत्पत्तिनिमित्तं अधिकरणमधिष्ठानं स्थितिः काल
परिच्छेदः विधानं प्रकारः। तत्र सम्यग्दर्शनं किमिति प्रश्ने तत्त्वार्थश्रद्धानमिति निर्देशः सम्य ६

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पयोगयुक्तो वा आत्मा आगमभावः जीवनपर्यायेण मनुष्यजीवत्वपर्यायेण वा समाविष्ट आत्मा
नोआगमभावजीवः । एवमितरेषामपि पदार्थानां नामादिनिक्षेपविधिर्नियोज्यः । स किमर्थः ।
अप्रकृतनिराकरणाय प्रकृतनिरूपणाय च निक्षेपविधिना नामशब्दार्थः । प्रस्तीर्यते तच्छ
ब्दग्रहणं किमर्थं सर्वसंग्रहार्थम् असति हि तस्मिन् सम्यग्दर्शनादीनां प्रधानानामेव न्यासेनाभिसंब
न्धः स्यात् । तद्विषयभावेनोपगृहीतानां जीवादीनामप्रधानानां न स्यात् तच्छब्दग्रहणे पुनः
क्रियमाणे सति सामर्थ्यात्प्रधानानामप्रधानानां च ग्रहणं सिद्धं भवति । एवं नामादिभिः प्रस्तीर्ण
नामधिकृतानां तत्त्वाधिगमः कुत इत्यत उच्यते ॥ प्रमाणनयैरधिगमः ॥ नामादिनिक्षेपवि
धिनोपक्षिप्तानां जीवादीनां तत्त्वं प्रमाणाभ्यां नयैश्चाधिगम्यते प्रमाणनया वक्ष्यमाणलक्षण
विकल्पाः । तत्र प्रमाणं द्विविधं स्वार्थं परार्थं च तत्र स्वार्थं प्रमाणं श्रुतवर्ज्यं श्रुतं पुनः । स्वार्थं भव
ति परार्थं च ज्ञानात्मकं स्वार्थं वचनात्मकं परार्थं तद्विकल्पा नयाः । अत्राह नयशब्दस्याल्प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रियादेन पंचेंद्रियाणां संज्ञिनां त्रितयमप्यस्ति नेतरेषां कायानुवादेन त्रसकायिकानां त्रितयमप्यस्ति
नेतरेषां योगानुवादेन त्रयाणां योगानां त्रितयमप्यस्ति अयोगिनां क्षायिकमेव । वेदानुवादे
न त्रिवेदानां त्रितयमप्यस्ति । अपगतवेदानां औपशमिकं क्षायिकं चास्ति । कषायानुवा
देन चतुःकषायाणां त्रितयमप्यस्ति । अकषायाणां औपशमिकं क्षायिकं चास्ति । ज्ञानानु
वादेन आभिनिबोधिकश्रुतावधिमनः।पर्ययज्ञानिनां त्रितयमप्यस्ति । केवलज्ञानिनां क्षायि
कमेव संयमानुवादेन सामायिकछेदोपस्थापनसंयतानां त्रितयमप्यस्ति परिहारविशुद्धिसं
यतानां औपशमिकं नास्ति इतरत् द्वितयमप्यस्ति सूक्ष्मसांपराययथाख्यातसंयतानां
औपशमिकं क्षायिकं चास्ति संयतासंयतानां असंयतानां च त्रितयमप्यस्ति । दर्शनानुवादेन
चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनिनां त्रितयमप्यस्ति केवलदर्शनिनां क्षायिकमेव लेश्यानुवा ७
देन षट्लेश्यानां त्रितयमप्यस्ति अलेश्यानां क्षायिकमेव भव्यानुवादेन भव्यानां त्रितयमप्यस्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिद्वीकेस्यतु के सामान्येन डीवस्या विशेषेणं गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नार
काणां पर्याप्तकानां औपशमिकं क्षायोपशमिकं चास्ति। प्रथमायां पृथिव्यां पर्याप्ताप
र्याप्तकानां क्षायिकं क्षायोपशमिकं चास्ति तिर्यग्गतौ तिरश्चां पर्याप्तकानां औपशमि
कमस्ति क्षायिकं क्षायोपशमिकं च पर्याप्तकापर्याप्तकानामस्ति तिरश्चीनां क्षायिकं नास्ति। औप
शमिकं क्षायोपशमिकं च पर्याप्तिकानां। मनुष्यगतौ मनुष्याणां पर्याप्तापर्याप्तका
नां क्षायिकं क्षायोपशमिकं चास्ति औपशमिकं पर्याप्तकानामेव नापर्याप्तकानां मानुषीणां
त्रितयमप्यस्ति पर्याप्तिकानामेव नापर्याप्तिकानां क्षायिकं पुनर्भाववेदेनैव देवगतौ देवानां प
र्याप्तकानां त्रितयमप्यस्ति औपशमिकं पर्याप्तिकानां रुकथमिति चेत्। चारित्रमोहोपशम
नसह मृतान्प्रति। भवनवासिनां व्यंतरज्योतिष्काणां देवानां देवीनां च सौधर्मैशानकल्पवा
सिनीनां च क्षायिकं नास्ति। तेषां पर्याप्तकानां औपशमिकं क्षायोपशमिकं चास्ति इंद्रिय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

अवद्विश्रान्तरविशेषानवासिनाभिर्यं कस्यानन्तरं लक्ष्यतिशय गृहीतसम्यग्ज्ञानं तत्रोत्पद्यते।
अभिप्रायं द्विविधं अस्थंतरं यासांतरं च तत्र तंरस्य स्वात्मसंबंधदृष्टा वाक्यादिवक्षातः कारकप्र
वृत्तेः। वहिरंलोकानामीमांकियत्ता। [illegible] विशुद्धं वा स्वरुचिं [illegible] दर्शनमोहस्थितिरोपशामिकस्य
तिरस्वागरोपमाणि सान्तमुहूर्तो [illegible] नरवर्तितमेस्तिसीलक्तकस्वंप
वसानानारोपशामिकस्यजघन्यांतर्मोहूर्तिकीनरइर्वकोटीप्रवधिकंनिभुक्तायमादिरपर्य
सामान्यादेकं। सम्यग्दर्शनं द्वितयं निसर्गजाधिगमजभेदात् [illegible] ष्टिसागरोपमाणि विशानं
कदाचोपशामिकंभेदादेवं संख्याः विकल्पाः शब्दतः। असंख्येयाश्च [illegible] स्वव्रतिस्थ
गरस्यहातयावेदाहरादमर्थनिर्दिष्टगादिविधिर्झाति अनिवराजीवाजीवादिष्वयाभाव
मारोपयेत यतः। किमेतयोरेवजीवादीनामधिगमोऽस्ति नवेति तन्मोक्षाधिगमोपायोपानीति ८

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नालब्धानां सम्यक्त्वानुवादेन यत्र यत्सम्यग्दर्शनं तत्र तदेव ज्ञेयं संज्ञानुवादेन संज्ञिनां त्रितयम
स्ति नासंज्ञिनां तदुभयव्यपदेशरहितानां क्षायिकमेव आहारानुवादेन आहारकाणां
त्रितयमप्यस्ति। अनाहारकाणां छद्मस्थानां त्रितयमप्यस्ति केवलज्ञानसमुद्घातगतानां
क्षायिकमेव साधनं द्विविधं अभ्यंतरं बाह्यं च अभ्यंतरं दर्शनमोहस्योपशमः क्षयः क्षयोप
शमो वा बाह्यं नारकाणां प्राक् चतुर्थ्याः सम्यग्दर्शनस्य साधनं केषांचिज्जातिस्मरणं केषांचिद्धर्मश्रवणं
केषांचिद्वेदनाभिभवः। चतुर्थीमारभ्य आ सप्तम्याः नारकाणां जातिस्मरणं वेदनाभिभवश्च
तिरश्चां केषांचिज्जातिस्मरणं केषांचिद्धर्मश्रवणं केषांचिज्जिनबिंबदर्शनं मनुष्याणामपि
तथैव देवानामपि केषांचिज्जातिस्मरणं केषांचिद्धर्मश्रवणं केषांचिज्जिनमहिमदर्शनं
केषांचिद्देवर्द्धिदर्शनं। एवं प्रागानतात् आनतप्राणतारणाच्युतदेवानां देवर्द्धिदर्शनं मुक्त्वा
अन्यत्त्रितयमप्यस्ति। नवग्रैवेयकवासिनां केषांचिज्जातिस्मरणं केषांचिद्धर्मश्रवणं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रेणां उद्देशमनर्थकं स्यात् तत्र जीवद्रव्यमधिकृत्य सदाद्यनुयोगद्वारनिरूपणं क्रियते। जीवा
श्चतुर्दशसु गुणस्थानेषु व्यवस्थिताः। मिथ्यादृष्टिः सासादनसम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः।
असंजतः प्रमत्तसंयतः। अप्रमत्तसंयतः। अपूर्वकरणस्थाने उपसमकः क्षायकः। अनिवृ
त्तिबादरसांपरायस्थाने उपसमकः क्षपकः। अनिवृत्तिबादरस्थाने उपसमकः क्षपकः। सू
क्ष्मसांपरायस्थाने उपसमकः क्षपकः। सूक्ष्मसांपरायस्थाने उपसमकः क्षपकः। उपशां
तकषायवीतरागछद्मस्थः। क्षीणकषायवीतरागछद्मस्थः। सयोगकेवली। अयोगकेवली चे
ति। एतेषां जीवसमासानां निरूपणार्थं चतुर्दश मार्गणास्थानानि ज्ञेयानि। गतींद्रियकाय
योगवेदकषायज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञाहारका इति। तत्र सत्प्ररूपणा द्वि
धा सामान्येन विशेषेण च। सामान्येन तावत् अस्ति मिथ्यादृष्टिः। [illegible]दनसम्यग्दृष्टिरित्येवमादि ८
विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु आद्यानि चत्वारि गुणस्थानानि संति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिग्रहोऽस्तीत्यर्थः ॥ सूत्रं ॥ सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥ सदित्य
स्तित्वनिर्देशः स च प्रशंसादिषु वर्तमानो नेह गृह्यते संख्या भेदगणना क्षेत्रं निवासः वर्तमानका
लविषयः तदेव स्पर्शनं त्रिकालगोचरं कालो द्विविधः । मुख्यो व्यावहारिकश्च तयोः उत्तरत्र निर्ण
यो वक्ष्यते । अन्तरं विरहकालः भावः औपशमिकादिलक्षणः । अल्पबहुत्वमन्योन्यापेक्षया
विशेषप्रतिपत्तिः । एतैश्च सम्यग्दर्शनादीनां जीवादीनां चाधिगमो वेदितव्यः । ननु च निर्देशा
देव सद्ग्रहणं सिद्धं विधानग्रहणात् संख्यागतिरधिकरणग्रहणात् क्षेत्रस्पर्शनावबोधः ।
स्थितिग्रहणात् कालसंग्रहः । भावो नामादिषु संगृहीत एव पुनरेषां किमर्थं ग्रहणमिति सत्य
सिद्धं विनेयाशयवशात्तत्त्वदेशनाविकल्पः । केचित्संक्षेपरुचयः केचिद्विस्तररुचयः
अपरे नातिसंक्षेपेण नातिविस्तरेण प्रतिपाद्याः । सर्वसत्त्वानुग्रहार्थो हि सतां प्रयास इति
अधिगमाभ्युपायभेदोद्देशः कृतः इतरथा हि प्रमाणनयैरधिगम इत्यनेनैव सिद्धत्वादित

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्वार्थस० वृ० दयो निसंनिमनःपर्ययज्ञाने प्रमत्तसंजतादयः। क्षीनकषायांतामि केवलज्ञाने सजो
५ गः। अयोगश्च संजमानुवादेन सामायिकछेदोपस्थापनाशुद्धिसंयमाः प्रमत्तादयो
अनिवृत्तिस्थानांताः। परिहारशुद्धिसंयताः प्रमत्ताश्चाप्रमत्ताश्च सूक्ष्मसांपरायशुद्धि
संयता। एकस्मिन्नेव सूक्ष्मसंपरायस्थाने यथाख्यातविहा[र]शुद्धिसंयताः। उपशांतक
षायादयः। अयोगकेवल्यंताः संयतासंयताः एकस्मिन्नेव संयतासंयतस्थाने असंय
ता। आद्येषु चतुर्षु गुणस्थानेषु दर्शनानुवादेन चक्षुर्दर्शनिनो अचक्षुर्दर्शनिनो मिथ्यादृष्ट्यादीनि
क्षीनकषायांतानि संनि अवधिदर्शनि असंयतसम्यग्दृष्ट्यादीनि क्षीणकषायांतानि
केवलदर्शनि सयोगकेवली अजोग केवली च लेश्यानुवादेन कृष्णनीलकापोतलेश्यासु
मिथ्यादृष्ट्यादीनि असंयतसम्यग्दृष्ट्यांतानि संति। तेजःपद्मलेश्ययोर्मि[थ्यादृष्ट्या]दी ५
नि अप्रमत्तस्थानांतानि शुक्ललेश्यासु मिथ्यादृष्ट्यादीनि सजोगकेवलां। भविअचे भ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[illegible]तान्येव संयतासंयतस्थानाधिकानि मनुष्यगतौ चतुर्दशापि संति देवगतौ ना
रकवत्। इंद्रियानुवादेन एकेंद्रियादिषु। चतुरिंद्रियपर्यंतेषु एकमेव मिथ्यादृष्टिस्थानं। पं
चेंद्रियेषु चतुर्दशापि संति। कायानुवादेन पृथिवीकायादिवनस्पतीकायांतेषु एकमेव मि
थ्यादृष्टिस्थानं त्रसकायेषु चतुर्दशापि संति। योगानुवादेन त्रिषु योगेषु त्रयोदश गु
णस्थानानि भवंति। ततः परं अयोगिकेवली। वेदानुवादेन त्रयाणां वेदानां मिथ्यादृष्ट्यादि अनि
वृत्तिबादरांतानि संति अपगतवेदेषु अनिवृत्तिबादराद्ययोगकेवल्यंतानि। कषायानु
वादेन क्रोधमानमायासु मिथ्यादृष्ट्यादीनि अनिवृत्तिबादरस्थानांतानि संति लोभकषाये
तान्येव सूक्ष्मसांपरायस्थानाधिकानि अकषायः उपशांतकषायः क्षीणकषायः सयोगके
वली अयोगके
वली चेति। ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभंगज्ञानेषु मिथ्यादृष्टिः। सासादनस
म्यग्दृष्टिश्चास्ति आभिनिबोधिकश्रुतावधिज्ञानेषु असंयतसम्यग्दृष्ट्यादीनि क्षीणकषायां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

©C0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ख्येयभागप्रमिताः। प्रमत्तसंयताः। कोटीपृथक्त्वसंख्याः पृथक्त्वमित्यागमसंज्ञा तिसृणां को-
टीनामुपरि नवानामधः अप्रमत्तसंयताः संख्येयाः। चत्वारः उपशमकाः प्रवेशेन एको वा
द्वौ वा त्रयो वा उत्कर्षेण चतुःपंचाशत् स्वकालेन समुदिताः संख्येयाः चत्वारः क्षपकाः
। अयोगकेवलिनश्च प्रवेशेन एको वा द्वौ वा त्रयो वा उत्कर्षेणाष्टोत्तरशतसंख्याः स्वका-
लेन समुदिताः। संख्येयाः सयोगकेवलिनः प्रवेशेन एको वा द्वौ वा त्रयो वा उत्कर्षेणा-
ष्टोत्तरशतसंख्याः स्वकालेन समुदिताः। शतसहस्रपृथक्त्वसंख्याः विशेषेण गत्यनुवादे-
न नरकगतौ प्रथमायां पृथिव्यां नारकाः मिथ्यादृष्टयः असंख्येयाः श्रेणयः प्रतरासंख्येय-
भागप्रमिताः। द्वितीयादिष्वासप्तम्याः। मिथ्यादृष्टयः श्रेण्यसंख्येय। भागप्रमिताः। स चासं-
ख्येयभागः। असंख्येया योजनकोट्यः। सर्वासु पृथिवीषु सासादनसम्यग्दृष्टयः। सम्य-
ग्मिथ्यादृष्टयः। असंयतसम्यग्दृष्टयश्च पल्योपमासंख्येयभागप्रमिताः। तिर्यग्गतौ ति- ११

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थाः अजोगकेवलिनः सम्यक्त्वानुवादेन [illegible] सुरसुई गादि संति असंयत आद्यष्टस्थानेषु सम
कानुवादेन क्षायिकसम्यक्ते। असंयतसम्यग्दृष्ट्या [illegible] पशांतकषायां [illegible] द
नसम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः मिथ्यादृष्टिश्च स्वस्वस्थाने [illegible] संज्ञिषु पद
शगुणस्थानानि। क्षीणकषायस्थानानि [illegible] संज्ञिषु पंचेंद्रियमिथ्यादृ [illegible] उपशांतकषायपर्यंतं
शगुणस्थानानि सजोगकेवली अजोगकेवली च आहारानुवादेन आहारकेषु मिथ्यादृष्ट्यादीनि
सयोगकेवलांतानि अनाहारकेषु विग्रहगत्यापन्नेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिः सा
सादनसम्यग्दृष्टिः। असंयतसम्यग्दृष्टिश्च समुद्घातगतः सजो[illegible]ली अजोगकेवली च
सिद्धाः परमेष्ठिनः अतीतगुणस्थानाः॥ उक्ता सत्प्ररूपणा॥ संख्याप्ररूपणोच्यते। साद्वि
विधा। सामान्येन विशेषेण च सामान्येन तावज्जीवा मिथ्यादृष्टयः। अनंतानंताः सासाद
नसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असंयतसम्यग्दृष्टयः। संयतासंयताश्च पल्योपमासं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

...यिकाः। अनंतानंताः। क्षायिकासंख्याः। ...योगानुवादेन मनयोगिनो वाग्यो
गिन अमिथ्यादृष्टयः। असंख्येयाः श्रेण्यः प्रतरसंख्येयभागप्रमिताः। काययोगिनो मिथ्या
दृष्टयः अनंतानंताः। त्रयाणामपियोगिनां सासादनसम्यग्दृष्ट्यादयः। संयतासंयतांताः
पल्योपमासंख्येयभागप्रमिताः। प्रमत्तसंयतादयः सयोगकेवल्यंताः संख्येयाः। अयो
गकेवलिनः सामान्योक्तसंख्याः। वेदानुवादेन स्त्रीवेदाः पुंवेदाश्च मिथ्यादृष्टयः। अ
संख्येयाः श्रेण्यः प्रतरासंख्येयभागप्रमिताः। नपुंसकवेदामिथ्यादृष्टयः। अनंता
नंताः स्त्रीवेदानपुंसक वेदानपुंसकवेदाश्च सासादनसम्यग्दृष्ट्यादयः संयतासंयतां
ताः सामान्योक्तसंख्याः प्रमत्तसंयतादयः। अनिवृत्तिबादरांताः संख्येयाः पुंवेदाः सा
सासादनसम्यग्दृष्ट्यादयः। संयतासंयतांतासामान्योक्तसंख्या। प्रमत्तसंयतादयः। अनि १२
वृत्तिबादरांताः सामान्योक्तसंख्या। अपगतवेदाः अनिवृत्तिबादरादयः। अयोगकेवल्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ण्यां मिथ्यादृष्टयः । अनंतानंताः सासादनसम्यग्दृष्ट्यः संयतासंयतांताः । पल्योपमासंख्ये
यभागप्रमिताः । मनुष्यगतौ मनुष्याः मिथ्यादृष्टयः श्रेण्यसंख्येयभागप्रमिताः सदा सं
ख्येयाः । योजनकोट्यः । सासादनसम्यग्दृष्ट्यादयः । संयतासंयतांताः संख्येयाः प्रम
त्तादीनां सामान्योक्तासंख्याः देवगतौ देवाः मिथ्यादृष्टयः असंख्येयाः श्रेण्यः प्रतरा
संख्येयभागप्रमिताः । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टि असंयतसम्यग्दृष्टयः । प
ल्योपमासंख्येयभागप्रमिताः । इंद्रियानुवादेन एकेंद्रिया मिथ्यादृष्टयः । अनंतानंताः द्वी
द्रियाः । त्रीन्द्रियाः । चतुरिंद्रियाः । असंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः पंचेंद्रिय
मिथ्यादृष्टयः । असंख्येयाः श्रेणयः । प्रतरासंख्येयभागप्रमिता । सासादनसम्यग्दृष्ट्या
दयः । अयोगकेवल्यंताः । सामान्योक्तसंख्याः कायानुवादेन पृथिवीकायिकाः । अ
प्कायिकाः । तेजस्कायिकाः । वायुकायिकाः । असंख्येयालोकाः । वनस्पति प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्वार्थवृत्ते सामान्यासंख्येयाः। सूक्ष्मसांपरायशुद्धिसंयताः यथाख्यातविहारशुद्धिसंयताः संय-
१३ तासंयताः। असंयताश्च सामान्योक्तसंख्याः। दर्शनानुवादेन चक्षुर्दर्शनिनो मिथ्यादृ-
ष्टयः। असंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः। अचक्षुर्दर्शनिनो मिथ्यादृष्ट-
यः। अनंतानंताः। उभये च सासादनसम्यग्दृष्ट्यादयः क्षीणकषायांताः सामान्योक्तसं-
ख्याः। अवधिज्ञानवत् केवलदर्शनिनः केवलज्ञानवत्। लेश्यानुवादेन। कृष्णनील-
कापोतलेश्या मिथ्यादृष्ट्यादि असंयतसम्यग्दृष्ट्यंताः। सामान्योक्तसंख्याः। तेजःपद्म-
लेश्या मिथ्यादृष्ट्यादयः। संयतासंयतांताः। स्त्रीवेदवत् प्रमत्ताप्रमत्तसंयताः। संख्येया-
:। शुक्ललेश्या मिथ्यादृष्ट्यादयः संयतासंयतांताः। पल्योपमासंख्येयभागप्रमिताः। प्रमत्ता-
प्रमत्तसंयताः। संख्येयाः अपूर्वकरणादयः। सयोगकेवल्यंताः। सामान्योक्तसंख्याः। अले- १३
श्याश्च सामान्योक्तसंख्याः। भव्यानुवादेन भव्येषु मिथ्यादृष्ट्यादयः। अयोगकेवलं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ता:। सामान्योक्तसंख्या:। कषायानुवादेन क्रोधमानमायासु मिथ्यादृष्ट्यादय:। संयतानिवे
य। सूक्ष्मसांपरायसंयता सामान्योक्तसंख्या:। अकषायानयथाख्यातसकषायवदस:। अयो
गकेवल्यंता सामान्योक्तसंख्या:। ज्ञानानुवादेन मत्यज्ञानिन:। श्रुताज्ञानिनश्च मिथ्या
दृष्टिसासादनसम्यग्दृष्टय:। सामान्योक्तसंख्याविभंगज्ञानिनो मिथ्यादृष्टय:। असंख्ये
या:। श्रेणय: प्रतरासंख्येयभागप्रमिता:। सासादनसम्यग्दृष्टय:। पल्योपमासंख्येयभा
गप्रमिता:। मतिश्रुतज्ञानिन:। असंयतसम्यग्दृष्ट्यादय:। क्षीणकषायांता: सामान्यो
क्तसंख्या:। अवधिज्ञानिन असंयतसम्यग्दृष्टिसंयतासंयता: सामान्योक्तसंख्या:।
प्रमत्तसंयतादय:। क्षीणमोहांता संख्येया:। केवलज्ञानिन:। सयोगाश्चायोगाश्च
सामान्योक्तसंख्या:। संयमानुवादेन सामायिकछेदोपस्थापनाशुद्धिसंयता: प्रमत्ता
दय:। अनिवृत्तिबादरांता: सामान्योक्तसंख्यापरिहारशुद्धिसंयता: प्रमत्ताश्चाप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकः। सासादनसम्यग्दृष्ट्यादीनामयोगकेवल्यंतानां। लोकस्यासंख्येयभागः। सयोगके
वलिनां लोकस्यासंख्येयभागोऽसंख्येया भागाः सर्वलोको वा। विशेषेण गत्यनुवादेन नरकगतौ। सर्वा
सु पृथिवीषु नारकाणां चतुर्षु गुणस्थानेषु लोकस्यासंख्येयभागः। तिर्यग्गतौ तिरश्चां मिथ्या
दृष्ट्यादिसंयतासंयतांतानां सामान्योक्तं क्षेत्रं मनुष्यगतौ मनुष्याणां मिथ्यादृष्ट्याद्ययोगके
वल्यंतानां लोकस्यासंख्येयभागः सयोगकेवलिनां सामान्योक्तं। देवगतौ देवानां स
र्वेषां चतुर्षु गुणस्थानेषु लोकस्यासंख्येयभागः। इंद्रियानुवादेन एकेंद्रियाणां क्षेत्रं सर्व
लोकः। विकलेंद्रियाणां लोकस्यासंख्येयभागः पंचेंद्रियाणां मनुष्यवत्। कायानुवादे
न पृथिवीकायादिवनस्पतिकायांतानां सर्वलोकः। त्रसकायिकानां पंचेंद्रियवत्। योगा
नुवादेन वाग्मानसयोगिनां मिथ्यादृष्ट्यादिसयोगकेवल्यंतानां लोकस्यासंख्येयभागः
काययोगिनां मिथ्यादृष्ट्यादिसयोगकेवल्यंतानां लोकस्यासंख्येय अयोगकेवलिनांच

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ता:। सामान्योक्तसंख्या:। अलब्ध्यात्मनंतानंता। सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु
असंयतसम्यग्दृष्टय:। पल्योपमासंख्येयभागप्रमिता: संयता(संयता)दय:। उपशांतक्षपका
ता: संख्येया: चत्वार: क्षपका: सयोगकेवली अयोगकेवली च सामान्योक्तसंख्या:। क्षा
योपशमिकसम्यग्दृष्टिषु। असंयतसम्यग्दृष्ट्यादय: अप्रमत्तांता: सामान्योक्त
संख्या। औपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टिसंयतासंयता: पल्योपमासंख्येयभा
गप्रमिता: प्रमिता:। प्रमत्ताप्रमत्तसंयता: संख्येया: चत्वार: उपशमका: सामान्योक्त
संख्या:। आहारानुवादेन आहारकेषु मिथ्यादृष्ट्यादय: सयोगकेवलांता: सामान्योक्तसं
संख्या:। अनाहारकेषु मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टय:। सामान्योक्त
संख्या:। सयोगकेवलिन: संख्येया:। अयोगकेवलिन: सामान्योक्तसंख्या:। संख्यानिरूप
ते। निर्दिश्यते। तद्द्विविधं। सामान्येन विशेषेण च। सामान्येन तावत् मिथ्यादृष्टीनां सर्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षीणकषायांतानां । सामान्योक्तं क्षेत्रं अवधिदर्शनिनामवधि । ज्ञानिवत् केवलदर्शनिनां
केवलज्ञानिवत् । लेश्यानुवादेन कृष्णनीलकापोतलेश्यानां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृ
ष्ट्यंतानां । सामान्योक्तं क्षेत्रं तेजः । पद्मलेश्यानां । मिथ्यादृष्ट्याद्यप्रमत्तांतानां लोकस्यासं
ख्येयभागः । शुक्ललेश्यानां मिथ्यादृष्ट्यादि क्षीणकषायांतानां लोकस्यासंख्येयभागः
। सयोगकेवलिनामलेश्यानां च सामान्योक्तं क्षेत्रं भव्यानुवादेन भव्यानां सर्वेषां सामान्यो
क्तं क्षेत्रं अभव्यानां सर्वलोकः । सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टीनां असंयतसम्यग्दृ
ष्ट्याद्ययोगकेवल्यंतानां । क्षायोपशमिकसम्यग्दृष्टीनां असंयतसम्यग्दृष्ट्याद्यप्रमत्तांता
नां । औपशमिकसम्यग्दृष्टीनामसंयतसम्यग्दृष्ट्याद्युपशांतकषायांतानां । सासादनसम्यग्दृ
ष्टीनां सम्यङ्मिथ्यादृष्टीनां मिथ्यादृष्टीनां च । सामान्योक्तं क्षेत्रं संज्ञानुवादेन संज्ञिनां चक्षुर्दर्श १५
निवत् । असंज्ञिनां सर्वलोकः तदुभयव्यपदेशरहितानां सामान्योक्तं । क्षेत्रं आहारानुवाद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्योक्तं। क्षेत्रं कषायानुवादेन क्रोधमानमायालोभकषायानां च। मिथ्यादृष्ट्याद्यनि
वृत्तिबादरांतानां। सूक्ष्मसांपरायानां अकषायाणां च सामान्योक्तं क्षेत्रं ज्ञानानुवादेन। म
त्यज्ञानिश्रुताज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां सामान्योक्तं क्षेत्रं विभंगज्ञा
निनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां लोकस्यासंख्येयभागः। आभिनिबोधिकश्रुता
वधिज्ञानिनां असंयतसम्यग्दृष्ट्यादीनां क्षीणकषायांतानां मनःपर्ययः ज्ञानिनां प्रम
त्तादीनां क्षीणकषायांतानां केवलज्ञानिनां सयोगायोगानां च सामान्योक्तं क्षेत्रं सं
यमानुवादेन। सामायिकछेदोपस्थापनशुद्धिसंयतानां चतुर्णां परिहारशुद्धिसंयतानां प्रम
त्ताप्रमत्तानां सूक्ष्मसांपरायशुद्धिसंयतानां यथाख्यातविहारशुद्धिसंयतानां चतुर्णां सं
यतासंयतानां असंयतानां च चतुर्णां सामान्योक्तं क्षेत्रं दर्शनानुवादेन चक्षुर्दर्शनिनां मिथ्या
दृष्ट्यादिक्षीणकषायांतानां लोकस्यासंख्येयभागः। अचक्षुर्दर्शनिनां मिथ्यादृष्ट्यादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri.

तत्वार्थसर्वा
१५

ख्येयभागः। अष्टौ द्वादश भागा वा देशोनाः। उपपत्रोपपत्रै लोकस्यासंख्येयभागः। प
द्मलेश्यैः। मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यन्तैर्लोकस्यासंख्येयभागः। अष्टौ व द्वादश
भागा वा देशोनाः। संयतासंयतैर्लोकस्यासंख्येयभागः। पंच चतुर्दश भागा वा देशो
नाः। उपपत्रोपपत्रैर्लोकस्यासंख्येयभागः। शुक्ललेश्यैः मिथ्यादृष्ट्यादिसंयतासंयतां
तैः। लोकस्यासंख्येयभागः। षट् चतुर्दश भागा वा देशोनाः। प्रमत्तादिसयोगकेव
ल्यन्तानां अलेश्यानां च सामान्योक्तं स्पर्शनं। भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्य
योगकेवल्यन्तानां सामान्योक्तं स्पर्शनं। अभव्यैः। सर्वलोकः स्पृष्टः। सम्यक्त्वानुवादेन क्षायिक
सम्यग्दृष्टीनां असंयतसम्यग्दृष्ट्याद्ययोगकेवल्यन्तानां सामान्योक्तं स्पर्शनं। किं तु सं
यतासंयतानां लोकस्यासंख्येयभागः। क्षायोपशमिकसम्यग्दृष्टीनां। सामान्योक्तं
औपशमिकसम्यक्त्वानां असंयतसम्यग्दृष्टीनां सामान्योक्तं। शेषाणां लोकस्यासं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यतानामसंयतानां च। सामान्योक्तं स्पर्शनं दर्शनानुवादेन। चक्षुर्दर्शनिनां मिथ्यादृष्ट्यादि
क्षीणकषायांतानां पंचेंद्रियवत्। अचक्षुर्दर्शनिनां मिथ्यादृष्ट्यादिक्षीणकषायांतानां
नां। अवधिदर्शनकेवलदर्शनिनां च। सामान्योक्तं स्पर्शनं लेश्यानुवादेन कृष्णनीलका
पोतलेश्यैर्मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः। सासादनसम्यग्दृष्टिभिः लोकस्यासंख्ये
यभागः। पंच चत्वारः द्वौ चतुर्दशभागा वा देशोनाः। द्वादशभागाः कुतो न लभ्यंते इति
चेत्। तत्रावस्थितलेश्यापेक्षया पंचैव। अथवा येषां मते सासादन एकेंद्रियेषु नोत्प
द्यते तन्मतापेक्षया द्वादश भागा न दत्ताः। सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिः
लोकस्यासंख्येयभागः। तेजोलेश्यैः मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिर्लोकस्यासंख्ये
यभागः। अष्टौ नव चतुर्दशभागा वा देशोनाः। सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लो
कस्यासंख्येयभागः। अष्टौ नव चतुर्दशभागा वा देशोनाः। संयतासंयतैर्लोकस्यासं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

:। लोकस्यासंख्येयभागः। अष्टौ नव चतुर्दशभागा वा देशोनाः। सम्यङ्मिथ्यादृष्ट्याद्यनिवृ
त्तिबादरसांपरायांतानां। सामान्योक्तं स्पर्शनं नपुंसकवेदेषु मिथ्यादृष्टीनां सासादनसम्यग्दृष्टीनां
च सामान्योक्तं स्पर्शनं सम्यङ्मिथ्यादृष्टिभिः। लोकस्यासंख्येयभागः। स्पृष्टः असंयतसम्य
ग्दृष्टिसंयतासंयतैर्लोकस्यासंख्येयभागः। षट् चतुर्दशभागा वा देशोनाः। प्रमत्ताद्य
निवृत्तिबादरसांपरायांतानां। अपगतवेदानां च सामान्योक्तं स्पर्शनं। कषायानुवादेन। कषा
यानुवादेन चतुः। कषायाणां अकषायाणां च सामान्योक्तं। स्पर्शनं ज्ञानानुवादेन म
त्यज्ञानिश्रुताज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां। सामान्योक्तं स्पर्शनं विभंग
ज्ञानिनां मिथ्यादृष्टीनां लोकस्यासंख्येयभागः। अष्टौ चतुर्दशभागा वा देशोनाः। सर्वलो
को वा। सासादनसम्यग्दृष्टीनां सामान्योक्तं स्पर्शनं। आभिनिबोधिक। श्रुतावधिमनःप १७
र्यय केवलज्ञानिनां सामान्योक्तं स्पर्शनं संयमानुवादेन संयतानां सर्वेषां संयतासं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म्यग्दृष्टिभिर्लोकस्यासंख्येयभागः। अष्टौ चतुर्दशभागा वा देशोनाः। इन्द्रियानुवा-
देन एकेन्द्रियैः सर्वलोकः स्पृष्टः। विकलेन्द्रियैः। लोकस्यासंख्येयभागः। सर्वलोको वा। प-
ञ्चेन्द्रियेषु मिथ्यादृष्टिभिः। लोकस्यासंख्येयभागः। अष्टौ चतुर्दशभागा वा देशोनाः
सर्वलोको वा। शेषाणां सामान्योक्तं स्पर्शनं। कायानुवादेन स्थावरकायिकैः। सर्वलोकः
स्पृष्टः। त्रसकायिकानां पञ्चेन्द्रियवत्स्पर्शनं। योगानुवादेन वाङ्मनसयोगिनां मि-
थ्यादृष्टिभिर्लोकस्यासंख्येयभागः। अष्टौ चतुर्दशभागा वा देशोनाः। सर्वलोको वा।
सासादनसम्यग्दृष्ट्यादीनां क्षीणकषायान्तानां। सामान्योक्तं स्पर्शनं सयोगकेवलिनां
लोकस्यासंख्येयभागः। काययोगिनां मिथ्यादृष्ट्यादीनां सयोगकेवल्यन्तानां अयोगके-
वलिनां च सामान्योक्तं स्पर्शनं वेदानुवादेन स्त्रीपुंवेदैः। मिथ्यादृष्टिभिः। लोकस्यासंख्ये-
यभागः स्पृष्टः। अष्टौ चतुर्दशभागा वा देशोनाः सर्वलोको वा सासादनसम्यग्दृष्टिभि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

जघन्येनांतर्मुहूर्तः। उत्कर्षेण अर्द्धपुद्गलपरिवर्तो देशोनः। सासादनसम्यग्दृष्टेः
नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकजी-
वं प्रति जघन्येनैकः समयः उत्कर्षेण षडावलिकाः। सम्यग्मिथ्यादृष्टेः नानाजीवापेक्ष-
या जघन्येनांतर्मुहूर्तः। उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति जघन्यश्चो-
त्कृष्टश्चांतर्मुहूर्तः। असंयतसम्यग्दृष्टेः। नानाजीवापेक्षया सर्वकालः। एकजीवं प्र-
ति जघन्येनांतर्मुहूर्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि। संयतासंय-
तस्य नानाजीवापेक्षया सर्वकाल। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण
पूर्वकोटी देशोना। प्रमत्ताप्रमत्तयोः। नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति
जघन्येनैकः समयः। उत्कर्षेणांतर्मुहूर्तः। चतुर्णामुपशमकानां नानाजीवापेक्षया
एकजीवापेक्षया च जघन्येनैकः समयः। उत्कर्षेणांतर्मुहूर्तः। चतुर्णां क्षपकाणां अ-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ख्येयभागः। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिमिथ्यादृष्टीनां सामान्योक्तं संज्ञानु
वादेन संज्ञिनां चक्षुर्दर्शनिवत् असंज्ञिभिः। सर्वलोकः स्पृष्टः तदुभयव्यपदेशरहि
तानां सामान्योक्तं। आहारानुवादेन आहारकाणां मिथ्यादृष्ट्यादिक्षीणकषायान्तानां
सामान्योक्तं। सयोगकेवलिनां लोकस्यासंख्येयभागः। अनाहारकेषु मिथ्यादृष्टिभिः
सर्वलोकः स्पृष्टः सासादनसम्यग्दृष्टिः लोकस्यासंख्येयभागः। एकादश चतुर्दशभा
गा वा देशोनाः। असंयतसम्यग्दृष्टिभिः। लोकस्यासंख्येयभागः। षट्चतुर्दशभागाः
। वा देशोनाः सयोगकेवलिनां लोकस्यासंख्येयभागः। सर्वलोको वा अयोगकेवलिनां
लोकस्यासंख्येयभागः स्पर्शनं व्याख्यातं॥ सूत्रं कालः प्रस्तूयते स द्विविधः॥ सामा
न्येन विशेषेण च सामान्येन तावत्। मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवा
पेक्षया त्रयो भंगाः। अनादिरपर्यवसानः। अनादिसपर्यवसानः। सादिः सपर्यवसान

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकस्यासंख्येयभागः। एको द्वौ त्रयः चत्वारः। पंच चतुर्दशभागा वा देशोनाः सम्यग्मिथ्यादृष्टि
संयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः। सप्तम्यां पृथिव्यां मिथ्यादृष्टिभिर्लोकस्यासंख्येय
भागः षट् चतुर्दशभागा वा देशोनाः। शेषैस्त्रिभिर्लोकस्यासंख्येयभागः। तिर्यग्गतौ तिरश्चां मि
थ्यादृष्टिभिः। सर्वलोकः स्पृष्टः। सासादनसम्यग्दृष्टिभिः लोकस्यासंख्येयभागः। सप्त च
तुर्दशभागा वा देशोनाः। सम्यग्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः। असंयतसम्यग्दृ
ष्टिसंयतासंयतैर्लोकस्यासंख्येयभागः। षट् चतुर्दशभागा वा देशोनाः। मनुष्यगतौ म
नुष्यैर्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः। सर्वलोको वा स्पृष्टः। सासादनसम्यग्दृष्टि
भिः। लोकस्यासंख्येयभागः। सप्त चतुर्दशभागा वा देशोनाः। सम्यग्मिथ्यादृष्ट्यादीनामअ
योगकेवल्यंतानां क्षेत्रवत्स्पर्शनं देवगतौ देवैर्मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिः। लो १६
कस्यासंख्येयभागः। अष्टौ नव चतुर्दशभागा वा देशोनाः। सम्यग्मिथ्यादृष्ट्यसंयतसम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग आहारकाणां मिथ्यादृष्ट्यादि । क्षीणकषायांतानां सामान्योक्तं क्षेत्रं । सयोगकेवलिनां
लोकस्यासंख्येयभागः । अनाहारकाणां मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृ
ष्ट्ययोगकेवलिनां । सामान्योक्तं क्षेत्रं सयोगकेवलिनां लोकस्यासंख्येयभागः । सर्वलो
को वा क्षेत्रनिर्णयः कृतः ॥ सूत्रं । स्पर्शनमुच्यते तत् द्विविधं ॥ सामान्येन विशेषेण च
सामान्येन तावत् मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः । सासादनसम्यग्दृष्टिभिर्लोकस्या
संख्येयभागः । अष्टौ द्वादश वा चतुर्दशभागा देशोनाः । सम्यग्मिथ्यादृष्ट्यसंयतसम्य
ग्दृष्टिभिर्लोकस्यासंख्येयभागः । अष्टौ चतुर्दशभागा वा देशोनाः । संयतासंयतैर्लोक
स्यासंख्येयभागा वा देशोनाः । प्रमत्तसंयतादीनामयोगकेवल्यंतानां क्षेत्रवत्स्पर्शनं
विशेषेण गत्यनुवादेन नरकगतौ प्रथमायां पृथिव्यां नारकैश्चतुर्गुणस्थानैर्लोकस्यासं
ख्येयभागः । स्पृष्टः द्वितीयादिषु प्राक् सप्तम्याः । मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

ति जघन्येनैकः समयः । उत्कर्षेणान्तर्मुहूर्तः । एकजीवं प्रति जघन्येनैकः समयः । उत्
कर्षेण षडावलिकाः सम्यग्मिथ्यादृष्टेः । नानाजीवापेक्षया एकजीवापेक्षया च जघन्यश्चो
त्कृष्टश्चान्तर्मुहूर्तः । असंयतसम्यग्दृष्टेः । नानाजीवापेक्षया सर्वः कालः । एकजीवं
प्रति जघन्येनांतर्मुहूर्तः । उत्कर्षेण त्रीणि पल्योपमानि सातिरेकाणि शेषाणां । सामा
न्योक्तः देवगतौ देवेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकजीवं प्रति ज
घन्येनांतर्मुहूर्तः । उत्कर्षेण एकत्रिंशत्सागरोपमाणि सासादनसम्यग्दृष्टेः । सम
ग्मिथ्यादृष्टेश्च सामान्योक्तः कालः । असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः का
लः । एकजीवं प्रति जघन्येनांतर्मुहूर्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि इंद्रियानु
वादेन एकेंद्रियाणां नानाजीवापेक्षया सर्वः कालः । एकजीवं प्रति जघन्येन क्षुद्रभ
वग्रहणं उत्कर्षेण अनंतः कालोऽसंख्येयाः पुद्गलपरिवर्ताः । विकलेंद्रियाणां नाना

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जोगकेवलिनां नानाजीवापेक्षया एकजीवापेक्षया च जघन्यश्चोत्कृष्टश्चान्तर्मुहूर्तः। सजोगकेव
लिनां नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण पूर्वको
टी देशोना। विशेषेण गत्यनुवादेन नरकगतौ नारकेषु सप्तसु पृथिवीषु मिथ्यादृष्टेर्नाना
जीवापेक्षया सर्वः कालः। एकजीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण यथासंख्यं ए
कत्रिसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाणि। सासादनसम्यग्दृष्टेः सम्य॥ मि
थ्यादृष्टेश्च सामान्योक्तः कालः। असंयतसम्यग्दृष्टेः नानाजीवापेक्षया सर्वकालः। एक
जीवं प्रति जघन्येनान्तर्मुहूर्तः उत्कर्षेणोत्कृष्टो देशोनः। तिर्यग्गतौ तिरश्चां मिथ्यादृष्टीनां
नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेणानन्तः का
लः। असंख्येयाः पुद्गलपरिवर्ताः। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिसंयतासंय
तानां सामान्योक्तः कालः। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया [illegible] कालः। एकजीवं प्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

:सासादनः सम्यग्दृष्टेः। सामान्योक्तः सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया जघन्येनैकस
मयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति जघन्येनोत्कर्षेण चान्तर्मु
हूर्त्तः। चतुर्णां मनोयोगानां वचनयोगानां च नानाजीवापेक्षया एकजीवापेक्षया च जघ
न्येनैकसमयः। उत्कर्षेणान्तर्मुहूर्त्तः। काययोगिषु मिथ्यादृष्टेः नानाजीवापेक्ष
या सर्वकालः। एकजीवं प्रति जघन्येनैकसमयः। उत्कर्षेणानन्तः कालोऽसंख्येयाः
पुद्गलपरिवर्त्ताः। शेषाणां मनोयोगिवत्। अयोगानां सामान्यवत्। वेदानुवादेन
स्त्रीवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनान्तर्मुहूर्त्तः।
उत्कर्षेण पल्योपमशतपृथक्त्वं। सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरान्तानां सामा
न्योक्तः कालः। किंतु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवं
प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पंचपंचाशत्पल्योपमानि देशोनानि। पुंवेदेषु

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येन क्षुद्रभवग्रहणं। उत्कर्षेण संख्ये-
यानि वर्षसहस्राणि। पंचेंद्रियेषु मिथ्यादृष्टेः। नानाजीवापेक्षया सर्वकालः। एक-
जीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण सागरोपमसहस्रं पूर्वकोटीपृथक्त्वैरभ्य-
धिकं। शेषाणां सामान्योक्तः कालः। कायानुवादेन पृथिव्यप्तेजोवायुकायिकानां
नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येन क्षुद्रभवग्रहणं। उत्कर्षे-
णासंख्येयकालः। वनस्पतिकायिकानां एकेंद्रियवत्। त्रसकायेषु मिथ्यादृष्टेः। ना-
नाजीवापेक्षया सर्वकाः। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण द्वे सागरोप-
मसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके। शेषाणां पंचेंद्रियवत्। योगानुवादेन वाङ्मन-
सयोगिषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसयोगकेवलिनां नाना-
जीवापेक्षया सर्वकालः। एकजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेणांतर्मुहूर्त्तः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यासर्वकालः। एकजीवं प्रतिजघन्येनांतर्मुहूर्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि
सासादनसम्यग्दृष्टेः। सामान्योक्तः कालः आभिनिबोधिकश्रुतावधिमनः। पर्ययज्ञा
निनां केवलज्ञानिनां च सामान्योक्तः। कालः। संज्ञमानुवादेन सामायिकछेदोपस्थाप
नपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातसंयतानां संयतासंयतानामसंयतानां च
सामान्योक्तः कालः दर्शनानुवादेन चक्षुर्दर्शनिषु मिथ्यादृष्टेः। नानाजीवापेक्षया
सर्वकालः। एकजीवं प्रतिजघन्येनांतर्मुहूर्तः। उत्कर्षे द्वे सागरोपमसहस्रे सास
ादनसम्यग्दृष्ट्यादीनां क्षीणकषायांतानां सामान्योक्तः। कालः अचक्षुर्दर्शनिषु
मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तः। कालः। अवधिकेवलदर्शनिनोः। अ
वधिकेवलज्ञानिवत्। लेश्यानुवादेन कृष्णनीलकापोतलेश्यासु मिथ्यादृष्टेः। नानाजी २२
वापेक्षया सर्वकालः। एकजीवं प्रतिजघन्येनांतर्मुहूर्तः। उत्कर्षेण त्रयस्त्रिंशत्सप्तद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण
सागरोपमश्च तत्षष्टिः सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरांतानां सामान्योक्तः। न
पुंसकवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनांत
र्मुहूर्त्तः। उत्कर्षेणानंतकालः। असंख्येयाः पुद्गलपरिवर्त्ताः। सासादनसम्यग्दृष्ट्या
द्य। बादरांतानां सामान्यवत्। किंतु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वका
लः। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण उपरित्रिंशत्सागरोपमाणि देशो
नानि। अपगतवेदानां सामान्यवत्। कषायानुवादेन चतुःकषायाणां मिथ्यादृष्ट्याद्य
प्रमत्तांतानां मनोयोगिवत्। द्वयोः। उपशमकयोः द्वयोः। क्षपकयोः केवललोभस्य च
अकषायाणां च सामान्योक्तः। कालः। ज्ञानानुवादेन मत्यज्ञानिश्रुताज्ञानिषु मिथ्या
दृष्टिसासादनसम्यग्दृष्ट्योः। सामान्यवत्। विभंगज्ञानिमिथ्यादृ[ष्टे]र्नानाजीवापेक्ष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवापेक्षया सर्वकालः। एकजीवं प्रति जघन्येनैकसमयः। उत्कर्षेणांतर्मुहूर्तः। सम्य
नुवादेशनत्वेषु मिथ्यादृष्टेः नानाजीवापेक्षया सर्वकालः। एकजीवापेक्षया द्वौ भंगौ
अनादिः सपर्यवसानः। सादिस्सपर्यवसान तत्र सादिसपर्यवसानः। जघन्येनांतर्मु
हूर्तः। उत्कर्षेणार्धपुद्गलपरिवर्त्तो देशोनः। सासादनसम्यग्दृष्ट्याद्ययोगकेवल्यंता
नां। सामान्योक्तः। अभव्यानां अनादिरपर्यवसानः। सम्यक्त्वानुवादेन क्षायिकसम्य
ग्दृष्टीनां असंयतसम्यग्दृष्ट्याद्ययोगकेवल्यंतानां सामान्योक्तः। क्षायोपशमिकस
म्यग्दृष्टीनां चतुर्णां सामान्योक्तः। औपशमिकसम्यक्त्वेषु असंयतसम्यग्दृष्टिसंय
तयोः। नानाजीवापेक्षया जघन्येनांतर्मुहूर्तः। उत्कर्षेण पल्योपमासंख्येयभागः
। एकजीवं प्रति जघन्यश्चोत्कृष्टः। श्चांतर्मुहूर्तः। प्रमत्ताप्रमत्तयोः। चतुर्णामुपश
मकानां च नानाजीवापेक्षया। एकजीवापेक्षया च जघन्येनैकः समयः। उत्कर्षेणांत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

शसप्तसागरोपमाणिसातिरेकाणिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः। सामान्योक्तः
कालः। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्येनांत
र्मुहूर्त्तः। उत्कर्षेणत्रयस्त्रिंसत्सप्तदशसागरोपमाणिदेशोनानितेजः। पद्मले
श्ययोः। मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योः। नानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिज
घन्येनांतर्मुहूर्त्तः। उत्कर्षेणद्वेसागरोपमेअष्टादशसागरोपमाणिचसातिरेकाणिसा
सादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः। सामान्योक्तःकालः। संयतासंयतप्रमत्ताप्रम
त्तानां नानाजीवापेक्षयासर्वकालः। एकजीवंप्रतिजघन्येनैकःसमयः॥ उत्कर्षेणां
तर्मुहूर्त्तः। शुक्ललेश्यानांमिथ्यादृष्टेः। नानाजीवापेक्षयासर्वकालः। एकजीवंप्रति
जघन्येनांतर्मुहूर्त्तः। उत्कर्षेणएकत्रिंशत्सागरोपमाणिसातिरेकाणिसासादनसम्य
ग्दृष्ट्यादिसयोगकेवल्यंतानांशुक्ललेश्यानांसामान्योक्तः। किंतुसंयतासंयतस्यनाना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाजीवापेक्षया जघन्येन त्रयः समयाः। उत्कर्षेण संख्येयाः समयाः। एकजीवं प्रति जघ
न्यश्चोत्कृष्टश्च त्रयः समयाः। अयोगकेवलिनां सामान्योक्तः कालः। कालो वर्णितः॥ ब:
॥सू८॥ अंतरं निरूप्यते॥ विवक्षितस्य गुणस्य गुणान्तरसंक्रमे संक्रमे सति पुनस्तत्प्रा
प्तेः। प्राङ्मध्यमंतरं द्विविधं सामान्येन विशेषेण च। सामान्येन तावन्मिथ्यादृष्टेः। नाना
जीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण द्वे षट्षष्टी देशो
ने सागरोपमाणां। सासादनसम्यग्दृष्टेः। अंतरं नानाजीवापेक्षया जघन्येनैकः समयः
। उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागः
उत्कर्षेणार्द्धपुद्गलपरिवर्तो देशोनः। सम्यग्मिथ्यादृष्टेरंतरं नानाजीवापेक्षया सासा
दनवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेणार्द्धपुद्गलपरिवर्तो देशो
नः। असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नानाजीवापेक्षया। नास्त्यंतरं। एकजीवं प्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुहूर्त्तः सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिमिथ्यादृष्टीनां च सामान्योक्तः संज्ञानुवादेन
संज्ञिषु मिथ्यादृष्ट्याद्यनिवृत्तिबादरांतानां पुंवेदवत् शेषाणां सामान्योक्तः असंज्ञिनां
मिथ्यादृष्टेः नानाजीवापेक्षया सर्वकालः एकजीवं प्रति जघन्येन क्षुद्रभवग्रहणं
उत्कर्षेण अनंतकालो असंख्येयाः पुद्गलपरिवर्तानि उभयव्यपदेशरहितानां सामा
न्योक्तः आहारानुवादेन आहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः एक
जीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेणांगुलासंख्येयभागाः असंख्येयासंख्येयाः उ
त्सर्पिण्यवसर्पिण्यः शेषाणां सामान्योक्तः अनाहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्ष
या सर्वकालः एकजीवं प्रति जघन्येनैकः समयः उत्कर्षेण त्रयः समयाः सासादनसम्यग्दृ
ष्ट्यसंयतसम्यग्दृष्ट्योः नानाजीवापेक्षया जघन्येनैकः समयः उत्कर्षेणावलिकायाः
असंख्येयभागः एकजीवं प्रति जघन्येनैकसमयः उत्कर्षेण द्वौ समयौ सयोगकेवलिनः ना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

नानि। तिर्यग्गतौ तिरश्चां मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यंतरं एकंजीवं प्रति जघन्ये
नांतर्मुहूर्त्तः। उत्कर्षेण त्रीणि पल्योपमानि देशोनानि सासादनसम्यग्दृष्ट्यादीनां चतु
र्णां सामान्योक्तमंतरं मनुष्याणां मिथ्यादृष्टेः तिर्यग्वत्। सासादनसम्यग्दृष्टिसम्यग्मिथ्याद
ष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागो
न्तर्मुहूर्त्तश्च। उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि असंयतसम्य
ग्दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण त्री
णि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि संयतासंयतप्रमत्तानां नानाजीवापेक्ष
या सामान्यवत् एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटिपृथक्त्वानि शेषाणां
सामान्यवत्। देवगतौ देवानां मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यंतरं
। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण एकत्रिंशत्सागरोपमाणि देशोनानि सासा २५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिजघन्येनांतर्मुहूर्त्तः। उत्कर्षेणार्द्धपुद्गलपरिवर्त्तो देशोनः। चतुर्णामुपशमकानां नाना
जीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण वर्षपृथक्त्वं। एकजीवं प्रति जघन्येनांतर्मुहू
र्त्तः। उत्कर्षेणार्द्धपुद्गलपरिवर्त्तो देशोनः। चतुर्णां क्षपकाणां अयोगकेवलिनां च
नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण षण्मासाः। एकजीवं प्रति नास्त्यं
तरं विशेषेण गत्यनुवादेन नरकगतौ। नारकाणां सप्तसु पृथिवीषु मिथ्यादृष्ट्यसंय
तसम्यग्दृष्ट्योः। नानाजीवापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः।
उत्कर्षेण एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाणि देशोनानि। सा
सादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण प
ल्योपमासंख्येयभागः। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागः। अंतर्मुहू
र्त्तश्च। उत्कर्षेण एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाणि देशो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

रभ्यधिकं चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्तः।
उत्कर्षेण सागरोपमसहस्रं पूर्वकोटीपृथक्त्वैरभ्यधिकं शेषाणां सामान्योक्तं। कायानुवादेन पृ-
थिव्यप्तेजोवायुकायिकानां नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येन क्षुद्रभ-
वग्रहणं। उत्कर्षेणानंतः कालोऽसंख्येयाः पुद्गलपरिवर्ताः। वनस्पतिकायिकानां नानाजीवा-
पेक्षया नास्त्यंतरं। एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणं। उत्कर्षेणासंख्येयाः लोकाः।
एवं कायं प्रत्यंतरं गुणं प्रति उभयतोपि नास्त्यंतरं। त्रसकायिकेषु मिथ्यादृष्टेः। सामान्यवत्
सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः। नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति
जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्तश्च। उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटीपृथ-
क्त्वैरभ्यधिके। असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां। नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्र-
ति जघन्येनांतर्मुहूर्तः। उत्कर्षेण द्वे सागरोपमसहस्रे। पूर्वकोटीपृथक्त्वैरभ्यधिके। चतुर्

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासं
ख्येयभागोन्तर्मुहूर्तश्च। उत्कर्षेणैकत्रिंशत्सागरोपमाणि देशोनानि। इंद्रियानुवादेनैकेंद्रिया
णां नानाजीवापेक्षया नास्त्यंतरं। एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणं। उत्कर्षेण द्वे
सागरोपमसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके विकलेंद्रियाणां नानाजीवापेक्षया नास्त्यंतरं
एकजीवं प्रति जघन्येन क्षुद्रभवग्रहणं। उत्कर्षेणानंतः। कालोऽसंख्येयाः पुद्गलपरि
वर्त्ताः। एवमिंद्रियं प्रत्यंतरमुक्तं गुणं प्रति उभयतोपि नास्त्यंतरं। पंचेंद्रियेषु मिथ्यादृष्टेः सा
मान्यवत्। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः। नानाजीवापेक्षया सामान्यवत्। एकजी
वं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्तश्च। उत्कर्षेण सागरोपमसहस्रं पूर्वको
टीपृथक्त्वैरभ्यधिकं। असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां नानाजीवापेक्षया नास्त्यं
तरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण सागरोपमसहस्रं पूर्वकोटीपृथक्त्वै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

।उत्कर्षेण पल्योपमशतपृथक्त्वं द्वयोरुपशमकयोर्नानाजीवापेक्षया सामान्यवत्।एकजी
वं प्रति जघन्येनान्तर्मुहूर्तः।उत्कर्षेण पल्योपमशतपृथक्त्वं द्वयोः।क्षपकयोः नानाजी
वापेक्षया जघन्येनैकः समयः।उत्कर्षेण वर्षपृथक्त्वं।एकजीवं प्रति नास्त्यंतरं।पुंवेदेषु
मिथ्यादृष्टेः।सामान्यवत्।सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सा
मान्यवत्।एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्तश्च।उत्कर्षेण सागरो
पमशतपृथक्त्वं।असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां।नानाजीवापेक्षया नास्त्यंतरं।एक
जीवं प्रति जघन्येनान्तर्मुहूर्तः।उत्कर्षेण सागरोपमशतपृथक्त्वं द्वयोरुपशमकयोर्ना
नाजीवापेक्षया सामान्यवत्।एकजीवं प्रति जघन्येनान्तर्मुहूर्तः।उत्कर्षेण सागरोपम
शतपृथक्त्वं द्वयोः।क्षपकयोः।नानाजीवापेक्षया जघन्येनैकसमयः।उत्कर्षेण संव २७
त्सरः।सातिरेकः।एकजीवं प्रति नास्त्यंतरं नपुंसकवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सीसुपसमका। नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षे-
ण द्वे सागरोपमसहस्रे पूर्वकोटीपृथक्त्वैरभ्यधिके। शेषाणां पंचेंद्रियवत्। योगानुवादेन कायवा-
ङ्मनसयोगिनां मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयत। प्रमत्ताप्रमत्तसयोगके-
वलिनां नानाजीवापेक्षया। एकजीवापेक्षया च नास्त्यंतरं। सासादनसम्यग्दृष्टिसम्य-
ग्मिथ्यादृष्ट्योः। नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं। चतुर्णामुपशमका-
नां। अयोगकेवलिनां च सामान्यवत्। वेदानुवादेन स्त्रीवेदेषु मिथ्यादृष्टेः। नानाजीवापेक्ष-
या नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण पंचपंचाशत्पल्योपमानि देशो-
नानि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्र-
ति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण पल्योपमशतपृथक्त्वं। असंयत-
सम्यग्दृष्ट्याद्यप्रमत्तांतानां नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

देनमत्यज्ञानश्रुताज्ञानविभंगज्ञानिषु मिथ्यादृष्टेर्नानाजीवापेक्षया। एकजीवापेक्ष
यापि नास्त्यंतरं। सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रतिना
स्त्यंतरं। आभिनिबोधिक: श्रुतावधिज्ञानिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया ना
स्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण पूर्वकोटी देशोनासंयतस्य ना
नाजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण षट्षष्टिसागरोपमानि सातिरेकानि प्रम
त्तयोर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण त्र
यस्त्रिंशत्सागरोपमानि सातिरेकानि चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्य
वत्। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण षट्षष्टिसागरोपमाणि सातिरेका
णि चतुर्णां क्षपकाणां सामान्यवत्। किंतु अवधिज्ञानिनां नानाजीवापेक्षया जघ २५
न्येकः समयः। उत्कर्षेण वर्षपृथक्त्वं एकजीवं प्रति नास्त्यंतरं। मनःपर्ययज्ञानिषु प्र

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नास्त्यंतरं । एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः । उत्कर्षेणत्रयस्त्रिंशत्सागरोपमाणिदेशोना
नि । सासादनसम्यग्दृष्ट्याद्यनिवृत्त्युपशमकांतानांसामान्योक्तं द्वयोः क्षपकयोः स्त्रीवेदव
त् । अपगतवेदेष्वनिवृत्तिबादरोपशमसूक्ष्मसांपरायोपशमकयोर्नानाजीवापेक्षया । सा
सामान्योक्तं । एकंजीवंप्रतिजघन्यमुत्कृष्टंचांतर्मुहूर्त्तः । उपशांतकषायस्यनानाजीवा
पेक्षयासामान्यवत् । एकंजीवंप्रतिनास्त्यंतरं । शेषाणांसामान्यवत् । कषायानुवादेनक्रो
धमानमायालोभकषायाणांमिथ्यादृष्ट्याद्यनिवृत्त्युपशमकांतानांमनोयोगवत् द्वयोः क्ष
पकयोः । नानाजीवापेक्षयाजघन्येनैकसमयः । उत्कर्षेणसंवत्सरः । सातिरेकः । केव
ललोभस्यसूक्ष्मसांपरायोपशमकस्य । नानाजीवापेक्षयासामान्यवत् । एकंजीवंप्र
ति[illegible]तरं । क्षपकस्यतस्यसामान्यवत् । अकषायेषूपशांतकषायस्यनानाजीवापे
क्षया सामान्यवत् । एकंजीवंप्रतिनास्त्यंतरं । शेषाणांत्रयाणां सामान्यवत् । ज्ञानानुवाद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

त। संयतासंयतस्य नानाजीवापेक्षया। एकजीवापेक्षया नास्त्यंतरं। असंयतेषु मि
थ्यादृष्टेः। नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्यमंतर्मुहूर्त्तः। उत्कर्षेण त्र
यस्त्रिंशत्सागरोपमाणि देशोनानि। शेषाणां त्रयाणां सामान्यवत्। दर्शनानुवादेन चक्षु
दर्शनिषु मिथ्यादृष्टेः। सामान्यवत्। सासादनसम्यग्दृष्टि सम्यग्मिथ्यादृष्ट्योर्नानाजीवा
पेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागो ऽन्तर्मुहूर्त्तश्च उत्कर्षे
ण द्वे सागरोपमसहस्रे देशोने। असंयतसम्यग्दृष्ट्याद्यप्रमत्तानां। नानाजीवापेक्षया
नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण द्वे सागरोपमसहस्रे देशो
ने। चतुर्णामुपशमकानां। नानाजीवापेक्षया सामान्योक्तं। एकजीवं प्रति जघन्येनांत
र्मुहूर्त्तः। उत्कर्षेण द्वे सागरोपमसहस्रे देशोने चतुर्णां क्षपकानां सामान्योक्तं। अचक्षु
दर्शनिषु मिथ्यादृष्ट्यादिक्षीणकषायांतानां सामान्योक्तमंतरं अवधिदर्शनिनः। अव

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मत्ताप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्यमुत्कृष्टं चांत
र्मुहूर्तः । चतुर्णामुपशामकानां नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघन्य
मंतर्मुहूर्तः । उत्कर्षेण पूर्वकोटी देशोना । चतुर्णां क्षपकाणां । अवधिज्ञानिवत् द्वयोः
केवलिज्ञानिनोः सामान्यवत् । संयमानुवादेन सामायिकछेदोपस्थापनशुद्धिसंयते
षु प्रमत्ताप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्यमुत्कृष्टं चां
तर्मुहूर्तः । द्वयोरुपशमकयोः नानाजीवापेक्षया सामान्यवत् । एकजीवं प्रति जघन्य
मंतर्मुहूर्तः । उत्कर्षेण पूर्वकोटी देशोना । द्वयोः क्षपकयोः । सामान्यवत् परिहारशु
द्धिसंयतेषु प्रमत्ताप्रमत्तयोर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्यमुत्कृष्टं चां
तर्मुहूर्तः । सूक्ष्मसांपरायशुद्धिसंयतेषूपशमकस्य । नानाजीवापेक्षया सामान्यव
त् । एकजीवं प्रति नास्त्यंतरं । तस्यैव क्षपकस्य सामान्यवत् । यथाख्याते अकषायव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्वा॰ ३०

मत्तसंयतानां। नानाजीवापेक्षया। एकजीवापेक्षया च नास्त्यन्तरं शुक्ललेश्येषु मिथ्या
दृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरं। एकजीवं प्रति जघन्येनान्तर्मुहू
र्तः। उत्कर्षेणैकत्रिंशत्सागरोपमाणि देशोनानि। सासादनसम्यग्दृष्टिसम्यङ्मिथ्याद
ष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभा
गोऽन्तर्मुहूर्तश्च। उत्कर्षेणैकत्रिंशत्सागरोपमाणि देशोनानि। संयतासंयतप्रमत्त
संयतयोः। तेजोलेश्यावत्। अप्रमत्तसंयतस्य नानाजीवापेक्षया नास्त्यन्तरं। एक
जीवं प्रति जघन्यमुत्कृष्टं चान्तर्मुहूर्तः। त्रयाणामुपशमकानां। नानाजीवापेक्षया
सामान्यवत्। एकजीवं प्रति जघन्यमुत्कृष्टं चान्तर्मुहूर्तः। उपशान्तकषायस्य नानाजी ३०
वापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यन्तरं चतुर्णां क्षपकाणां सयोगकेवलि ३१
नां। अलेश्यानां च सामान्यवत्। भव्यानुवादेन भव्येषु मिथ्यादृष्ट्याद्ययोगकेवल्यन्तानां

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धिज्ञानवत्। केवलदर्शनिनः। केवलज्ञानिवत्। लेश्यानुवादेन कृष्णनीलकापोतलेश्येषु
मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांत
र्मुहूर्तः। उत्कर्षेण त्रयस्त्रिंशत्सप्तदशसप्तसागरोपमाणि देशोनानि। सासादनसम्य
ग्दृष्टिसम्यङ्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्यो
पमासंख्येयभागोंतर्मुहूर्तश्च। उत्कर्षेण त्रयस्त्रिंशत्सप्तदशसप्तसागरोपमाणि दे
शोनानि। तेजःपद्मलेश्ययोः मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योः। नानाजीवापेक्षया नास्त्यं
तरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण द्वे सागरोपमे अष्टादश च साग
रोपमाणि सातिरेकाणि सासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्योर्नानाजीवापेक्षया
सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागः। अंतर्मुहूर्तश्च। उत्क
र्षेण द्वे सागरोपमे अष्टादश च सागरोपमाणि सातिरेकाणि। संयतासंयतप्रमत्ताप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोप-
माणि सातिरेकाणि। औपसमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया ज-
घन्येनैकसमयः। उत्कर्षेण सप्तरात्रिंदिनानि। एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहू-
र्त्तः। संयतस्य नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण चतुर्द्दशरात्रिंदिनानि
एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। प्रमत्ताप्रमत्तसंयतयोः। नानाजीवापेक्ष-
याजघन्येनैकसमयः। उत्कर्षेण पंचदशरात्रिंदिनानि। एकजीवं प्रति जघन्यमु-
त्कृष्टं चांतर्मुहूर्त्तः। त्रयाणामुपशमकानां। नानाजीवापेक्षया जघन्येनैकः समय
ः। उत्कर्षेण वर्षपृथक्त्वं एकजीवं प्रति जघन्यमुत्कृष्टं चांतर्मुहूर्त्तः। उपशांतकषायस्य
नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति नास्त्यंतरं सासादनसम्यग्दृष्टिसम्यग्
मिथ्यादृष्ट्योः। नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण पल्योपमासंख्येय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्यवत् । असंयतानां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं । सम्यक्त्वानुवा-
देन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्र-
ति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण पूर्वकोटी देशोना । संयतासंयतप्रमत्ताप्रमत्तसंय-
तानां नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्र-
यस्त्रिंशत्सागरोपमाणि सातिरेकानि । चतुर्णामुपशमकानां नानाजीवापेक्षया सामा-
न्यवत् । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सा-
तिरेकाणि । शेषाणां सामान्यवत् । क्षायोपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः । ना-
नाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः । उत्कर्षेण पूर्वकोटी दे-
शोना । संयतासंयतस्य नानाजीवापेक्षया नास्त्यंतरं । एकजीवं प्रति जघन्येनांतर्मुहू-
र्त्तः । उत्कर्षेण षट्षष्टिसागरोपमाणि देशोनानि । प्रमत्ताप्रमत्तसंयतयोः । नानाजीवा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्व त्सर्पिण्यवसर्पिण्यः। असंयतसम्यग्दृष्ट्याद्यप्रमत्तान्तानां नानाजीवापेक्षया नास्त्यन्त
२१ रं एकजीवं प्रतिजघन्येनांतर्मुहूर्त्तो। उत्कर्षेणांगुलासंख्येयभागो संख्येया उत्स। र्पि
ण्यः। चतुर्णां क्षपकाणामयोगकेवलिनां च सामान्यवत्। अनाहारकेषु मिथ्यादृष्टेर्नी
नाजीवापेक्षया चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति
जघन्येनांतर्मुहूर्त्तः। उत्कर्षेणांगुलासंख्येयभागो संख्येया संख्येया उत्सर्पिण्यवसर
स र्पिण्यः। चतुर्णां क्षपकाणां योगकेवलिनां च सामान्यवत्। अनाहारकेषु मिथ्यादृष्टे। नाना
जीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरं सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया ज
घन्येनैकसमयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकजीवं प्रति नास्त्यन्तरं। असंयत
सम्यग्दृष्टेः। नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण मासपृथक्त्वं। एकजीवं प्र २१
ति नास्त्यन्तरं सयोगकेवलिनः। नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भागः। एकजीवं प्रति नास्त्यंतरं। मिथ्यादृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यं
तरं संज्ञानुवादेन संज्ञिषु मिथ्यादृष्टेः सामान्यवत् सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृ
ष्ट्योः। नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागो
ऽन्तर्मुहूर्तश्च। उत्कर्षेण सागरोपमशतपृथक्त्वं। असंयतसम्यग्दृष्ट्याद्यप्रमत्तांतानां
। नानाजीवापेक्षया नास्त्यंतरं। एकजीवं प्रति जघन्येनांतर्मुहूर्तः। उत्कर्षेण सागरोप
मशतपृथक्त्वं। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। असंज्ञिनां
नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं तदुभयव्यपदेशरहितानां सामा
न्यवत्। आहारानुवादेन आहारकेषु मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टि
सम्यग्मिथ्यादृष्ट्योः। नानाजीवापेक्षया सामान्यवत्। एकजीवं प्रति जघन्येन पल्यो
पमासंख्येयभागोंऽतर्मुहूर्तश्च। उत्कर्षेणांगुलासंख्येयभागः। असंख्येयासंख्येया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्व
२२

सामान्यवत्। असंयतसम्यग्दृष्टेः। अपसमिको वा क्षायोपसमिको वा भावः। असंयतः
पुनः। औदयिकेन भावेन तिर्यग्गतौ तिरश्चां मिथ्यादृष्ट्यादिसंयतासंयतानां सामान्यवत्। म
नुष्यगतौ मनुष्याणां मिथ्यादृष्ट्याद्ययोगकेवल्यंतानां सामान्यमेव देवगतौ देवानां मिथ्या
दृष्ट्याद्यसंयतसम्यग्दृष्ट्यंतानां सामान्यवत्। इंद्रियानुवादेन एकेंद्रियविकलेंद्रि
याणां औदयिको भावः। पंचेंद्रियेषु मिथ्यादृष्ट्याद्ययोगकेवल्यंतानां सामान्यवत्
कायानुवादेन स्थावरकायिकानां औदयिको भावः। त्रसकायिकानां सामान्यमेव यो
गानुवादेन कायवाङ्मनसयोगिनां मिथ्यादृष्ट्यादिसयोगकेवल्यंतानां अयोगिके
वलिनां च सामान्यमेव वेदानुवादेन स्त्रीपुंनपुंसकवेदानां अवेदानां च सामान्यवत्।
कषायानुवादेन क्रोधमानमायालोभकषायाणां। अकषायाणां च सामान्यवत्। ज्ञा
नानुवादेन मत्यज्ञानश्रुताज्ञानविभंगज्ञानिनां मतिश्रुतावधिमनःपर्ययकेवलज्ञा २२

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षट्षष्ठ्यंकं एककोडीवत्तिनास्त्यंतरं अयोगिकेवलिनां नानाजीवापेक्षया जघन्येनैक
:समयः। उत्कर्षेण षण्मासाः। एककोडीवत्तिनास्त्यंतरं अंतरभावगतं॥ सूत्रं भावो वि
लाठते संधिविधः॥ सामान्येन विशेषेण च सामान्येन तावत् मिथ्यादृष्टिरिति औदयि
को भावः। सासादनसम्यग्दृष्टिरिति पारिणामिको भावः। सम्यग्मिथ्यादृष्टिरिति क्षा
योपशमिको भावः। असंयतसम्यग्दृष्टिरिति औपशमिको वा क्षायिको वा क्षायोप
शमिको वा भावः। असंयतः पुनः। औदयिकेन भावेन संयतासंयतः। प्रमत्तसंयतो
अप्रमत्तसंयत इति त्रयः क्षायोपशमिको भावः। चतुर्षूपशमकानामिति औपशमि
को भावः। चतुर्षु क्षपकेषु सयोगायोगिकेवलिनोश्च क्षायिको भावः। विशेषेण गत्यनु
वादेन नरकगतौ प्रथमायां पृथिव्यां नारकाणां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यंतानां
सामान्यवत्। द्वितीयादिष्वासप्तम्याः मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टीनां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थसूत्री
२४

त्वं। असंयतः पुनरोदयिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां। अपमिको भाव। औप-
शमिकसम्यक्त्वं च उपशमश्रेण्यामुपशमकानां। औपशमिको भावः। औपशमिकं सम्यक्त्वं। सासादनस-
म्यग्दृष्टेः। पारिणामिको भावः। सम्यग्मिथ्यादृष्टेः क्षायोपशमिको भावः। मिथ्यादृष्टेः। औदयि-
को भावः। संज्ञानुवादेन संज्ञिनां सामान्यवत्। असंज्ञिनामोदयिको भावः। तदुभयव्यपदेश-
रहितानां सामान्यवत्। आहारानुवादेन आहारकाणां अनाहारकाणां च सामान्यवत्।
भावः परिसमाप्तः। अल्पबहुत्वमुपवर्ण्यते तत्। द्विविधं सामान्येन विशेषेण च सामान्ये-
न विशेषेण च सामान्येन तावत्त्रयः। उपशमकाः स्वगुणस्थानकालेषु प्रवेशेन तुल्यसंख्या-
उपशान्तकषायास्तावन्त एव त्रयः। क्षपकाः। संख्येयगुणाः। क्षीणकषायवीतरागछद्म-
स्थाः। तावंतएव सयोगकेवलिनः अयोगकेवलिनश्च प्रवेशेन तुल्यसंख्याः। सयोगकेवलि- २४
नः। स्वकालेन समुदिताः। संख्येयगुणाः। अप्रमत्तसंयताः संख्येयगुणाः। प्रमत्त

निनां च सामान्यवत्। संयमानुवादेन सर्वेषां संयतानां संयतासंयतानां असंयतानां सामान्यवत्। दर्श
नानुवादेन चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनिकेवलदर्शनि नां सामान्यवत्। लेश्यानुवादेन ष
ट्लेश्यानामलेश्यानां च सामान्यवत्। भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्ययोगकेवल्यं
तानां सामान्यवत्। अभव्यानां पारिणामिको भावः। सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टि
षु। असंयतसम्यग्दृष्टेः क्षायिको भावः। असंयतत्वमौदयिकेन भावेन संयतासंयतप्रमत्ताप्रम
त्तसंयतानां क्षायोपशमिको भावः। क्षायिकं सम्यक्त्वं चतुर्णामुपशमकानां औपशमिको
भावः। क्षायिकं सम्यक्त्वं शेषाणां सामान्यवत्। क्षायोपशमिकसम्यग्दृष्टिषु। असंयतसम
म्यग्दृष्टेः क्षायोपशमिको भावः। क्षायोपशमिकं सम्यक्त्वं असंयतः पुनः। औदयिकेन भा
वेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां। क्षायोपशमिको भावः। क्षायोपशमिकं सम्यक्
त्वं। औपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः। औपशमिको भावः। औपशमिकं सम्यक्

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्ववत्ः। पंचेंद्रियाणां सामान्यवत्‌। अयं तु विशेषः। मिथ्यादृष्टयोऽसंख्येयगुणाः। का
यानुवादेन स्थावरकायेषु गुणस्थानभेदाभावादल्पबहुत्वाभावः। कायं प्रत्युच्यते। सर्व
तः तेजःकायिका अल्पाः। ततो बहवः पृथिवीकायिकाः। ततः अप्कायिकाः। ततः वा
तकायिकाः। सर्वतः अनंतगुणाः। वनस्पतयः। त्रसकायिकानां पंचेंद्रियवत्‌। यो
गानुवादेन वाङ्मनसयोगिनां पंचेंद्रियवत्‌। काययोगिनां सामान्यवत्‌। वेदानुवादे
न स्त्रीपुंवेदानां पंचेंद्रियवत्‌। नपुंसकवेदानामवेदानां च सामान्यवत्‌। कषायानुवादे
न क्रोधमानमायाकषायाणां पुंवेदवत्‌। अयं तु विशेषः। मिथ्यादृष्टयोऽनंतगुणाः। लो
भकषायाणां द्वयोरुपशमकयोः तुल्यसंख्या। क्षपकाः संख्येयगुणाः। सूक्ष्मसंपरा
यशुद्ध्युपशमकसंयताः। विशेषाधिकाः। सूक्ष्मसंपरायक्षपकाः संख्येयगुणाः। शेषा
णां सामान्यवत्‌। ज्ञानानुवादेन मत्यज्ञानिश्रुताज्ञानिषु सर्वतः। स्तोकाः सासादनस ३५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संयतासंख्येयगुणा। संयतासंयताः। असंख्येयगुणाः। सासादनसम्यग्दृष्टयः संख्येयगु-
णाः सम्यग्मिथ्यादृष्टयः। असंख्येयगुणाः। असंयतसम्यग्दृष्टयो संख्येयगुणाः। मिथ्यादृष्ट-
योऽनंतगुणा विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नारकेषु सर्वतस्तोका-
ः। सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः संख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसं-
ख्येयगुणा मिथ्यादृष्टयः। असंख्येयः। तिर्यग्गतौ तिरश्चां सर्वतः स्तोकाः संयतासंयताः इ-
तरेषां सामान्यवत्। मनुष्यगतौ मनुष्याणां। उपशमकादि प्रमत्त। संयतानां सामान्यव-
त्। ततः संख्येयगुणाः संयतासंयताः। सासादनसम्यग्दृष्टयः। संख्येयगुणाः सम्य-
ग्मिथ्यादृष्टयः। संख्येयगुणाः। असंयतसम्यग्दृष्टयः। संख्येयगुणाः। मिथ्यादृष्टयोऽसं-
ख्येयगुणाः। देवगतौ देवानां नारकवत्। इंद्रियानुवादेन एकेंद्रियविकलेंद्रियेषु गुण-
स्थानभेदो नास्तीत्यल्पबहुत्वाभावः। इंद्रियं प्रत्युच्यते। पंचेंद्रियाद्येकेंद्रियांतं चरोत्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्वा प्रमत्ताः संख्येयगुणाः। सूक्ष्मसंपरायशुद्धिसंयतेषूपशमकेभ्यः। क्षपकाः संख्येयगुणाः।
३६ यथाख्यातविहारशुद्धिसंयतेषूपशांतकषायेभ्यः क्षीणकषायाः। संख्येयगुणाः। अयो
गकेवलिनः। तावंत एव। सयोगकेवलिनः। संख्येयगुणाः। संयतासंयतानां नास्त्यल्पबहुत्वं।
असंयतेषु सर्वतस्तोकाः सासादनसम्यग्दृष्टयः। सम्यङ्मिथ्यादृष्टयः संख्येयगुणाः। असं
यतसम्यग्दृष्टयोऽसंख्येयगुणाः मिथ्यादृष्टयोऽनंतगुणाः। दर्शनानुवादेन चक्षुर्दर्शनिनां
मनोयोगिवत्। अचक्षुर्दर्शनिनां काययोगिवत्। अवधिदर्शनिनां अवधिज्ञानिवत् केव
लदर्शनिनां केवलज्ञानिवत्। लेश्यानुवादेन कृष्णनीलकापोतलेश्यानां असंयतवत् तेज
ःपद्मलेश्यानां सर्वतः स्तोकाः। अप्रमत्ताः प्रमत्ताः संख्येयगुणाः। एवमितरेषां पंचेंद्रिय
वत्। शुक्ललेश्यानां सर्वतः स्तोका उपशमकाः क्षपकाः संख्येयगुणाः सयोगकेवलिनः। सं ३६
ख्येयगुणाः। अप्रमत्तसंयता संख्येयगुणाः। प्रमत्तसंयताः संख्येयगुणाः। संयतासंयता

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म्यग्दृष्टयः। मिथ्यादृष्टयोऽनंतगुणाः। विभंगज्ञानिषु सर्वतः स्तोकाः सासादनसम्यग्
दृष्टयः। मिथ्यादृष्टयोऽसंख्येयगुणाः। मतिश्रुतावधिज्ञानिषु सर्वतः स्तोकाः चत्वारः
उपशमकाः। चत्वारः क्षपकाः संख्येयगुणाः। अप्रमत्तसंयताः संख्येयगुणाः। प्रमत्त
संयताः संख्येयगुणाः। संयतासंयता असंख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसं
ख्येयगुणाः। मनःपर्ययज्ञानिषु सर्वतः स्तोकाश्चत्वार उपशमकाः। चत्वारः क्षपकाः सं
ख्येयगुणाः। अप्रमत्ताः संख्येयगुणाः। प्रमत्तसंयताः संख्येयगुणाः। केवलज्ञानिषु अ
योगकेवलिनः। सयोगकेवलिनः। संख्येयगुणाः। प्रमत्तसंयताः संख्येयगुणाः। के
वलज्ञानिषु अयोगकेवलिनः। सयोगकेवलिन संख्येयगुणाः। संयमानुवादेन सामा
यिकछेदोपस्थापनशुद्धिसंयतेषु द्वयोरुपशमकयोः तुल्या संख्या। ततः संख्येयगुणौ
क्षपकौ। अप्रमत्ताः संख्येयगुणाः। प्रमत्ताः संख्येयगुणाः। परिहारसंयतेषु अप्रमत्तेभ्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देशरहितानां केवलज्ञानेवत्। आहारानुवादेन आहारकाणां काययोगिवत्। अनाहारका-
णां सर्वतस्तोकाः। सयोगकेवलिनः। अयोगकेवलिनः संख्येयगुणा सासादनसम्यग्दृ-
ष्टः। संख्येयगुणाः। असंयतसम्यग्दृष्टयः संख्येयगुणाः। मिथ्यादृष्टयोऽनंतगुणाः। एवं
मिथ्यादृष्ट्यादीनां गत्यादिषु मार्गणा कृता सामान्येन तत्र सूक्ष्मभेदः। आगमाविरोधेनानु-
सर्तव्यः। एवं सम्यग्दर्शनस्यादावुद्दिष्टस्य लक्षणोत्पत्तिस्वामिविषयन्यासाधिगमोपायाः
निर्दिष्टास्तत्संबंधेन च जीवादीनां संज्ञापरिणामादि निर्दिष्टं तदनंतरं सम्यग्ज्ञानं विचारा-
र्हमित्याह॥ सूत्रं॥ मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानं॥ ज्ञानशब्दः प्रत्येकं प-
रिसमाप्यते मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्ययज्ञानं। केवलज्ञानमिति। इंद्र-
द्रियैर्मनसा च यथास्वमर्थान्मन्यते अनया मनुते मननमात्रं वा मतिः। तदावरणकर्मक्ष-
योपशमे सति निरूप्यमाणं श्रूयते अनेन तत् शृणोति श्रवणमात्रं वा श्रुतं। अनयोः प्रत्यास

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न निर्देशः कृतः कारणकार्यत्वात् तथा च वक्ष्यते श्रुतं मतिपूर्वमिति ज्ञानाग्रहणादवधि
र्विशिष्टत्वाद्बाह्यावधिः। पारकीयमनोगतोर्थो मन इत्युच्यते साहचर्यात्तस्य पर्ययणं परिगम
नं मनःपर्ययः। मतिज्ञानप्रसंग इति चेन्न। नानापेक्षामात्रत्वात्। क्षायोपशमशक्तिमात्रवि
जृंभितं तत्केवलं स्वपरमनोभिर्व्यपदिश्यते। यथाभ्रे चंद्रमसं पश्येति। बाह्येनाभ्यंतरेण च
तपसा यदर्थमर्थिनः केवंते सेवंते तत्केवलं असहायमिति वा तदंते प्राप्यत इत्यंते
क्रियते तस्य प्रत्यासन्नत्वात्। तत्समीपे मनःपर्ययग्रहणं कृतः प्रत्यासत्तिः संयमैका
धिकरणत्वात् तस्यावधिर्विप्रकृष्टः कुतः विप्रकृष्टांतरत्वात्। प्रत्यक्षात्परोक्षं पूर्वमु
क्तं सुगमत्वात्। श्रुतपरिचितानुभूता हि मतिश्रुतपद्धतिः सर्वेण प्राणिगणेन प्रायः प्रा
प्यते यतः। एवमेतत्पंचविधं ज्ञानं तद्भेदादयश्च पुरस्ताद्वक्ष्यंते। प्रमाणनयैरधिगम इ
त्युक्तं प्रमाणं च केषांचिद्ज्ञानमभिमतं केषांचित्सन्निकर्षः। केषांचिदिंद्रियवृत्तिरतो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्वा
३८

संबंधप्रमेयवत्तत्। प्रमाणस्य प्रमाणांतरपरिकल्पनायां स्वाधिगमाभावात्। स्मृत्यभावः।
तदभावाद्व्यवहारलोपः। स्याद्वक्ष्यमाणभेदापेक्षया द्विवचननिर्देशः। वक्ष्यते हि।
आद्ये परोक्षं प्रत्यक्षमन्यदिति स च द्विवचननिर्देशः प्रमाणांतरसंख्यानिवृ
त्त्यर्थः। प्रत्यक्षं चानुमानं च शाब्दं चोपमया सह। अर्थापत्तिरभावश्च षट् प्रमाणानि जै
मिनेः। उपमानार्थापत्त्यादीनामत्रैवांतर्भावात्। इतरस्य पंचविधज्ञानस्य प्रमाणद्व
यांतः। पातित्वे प्रतिपादिते प्रत्यक्षानुमानादिप्रमाणद्वयकल्पनानिवृत्त्यर्थमाह॥
॥सूत्रं॥ आद्ये परोक्षं॥ आदिशब्दः प्राथम्यवचनः। आदौ भवमाद्यं कथं द्वयोः। प्रथ
मत्वं मुख्योपचारकल्पनया। मतिज्ञानं तावन्मुख्यकल्पनया प्रथमं श्रुतमपि तस्य
प्रत्यासत्त्या प्रथममित्युपचर्यते। द्विवचननिर्देशसामर्थ्याद्गौणस्यापि ग्रहणं। आद्यं च ३८
आद्यं च आद्ये मतिश्रुते इत्यर्थः। तदुभयमपि परोक्षं प्रमाणमित्यभिसंबध्यते। कु

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

फलं समाद्दिष्टश्चालक्षणेनाधिगमेनापिद्दिष्टेन लक्षितव्यमिति। अक्षादीनामप्यधि
मप्यधिगमः प्राप्नोति आत्मनश्चेतनत्वात्तत्रैव समवायः। इति चेन्न ज्ञस्वभावाभावे सर्वे
षामचेतनत्वात् ज्ञस्वभावाभ्युपगमो वात्मनः। तर्हि प्रतिज्ञाहानिर्ननु चोक्तं ज्ञाने प्रमाणे स
तिफलाभावइति नैषदोषः। अधिगमप्रीतिदर्शनात्। ज्ञस्वभावस्यात्मनः। कर्म
मलीमसस्य करणालंबनादर्थनिश्चये प्रीतिरुपजायते स फलमित्युच्यते उपेक्षा अ
ज्ञाननाशो वा फलं रागद्वेषयोरप्रणिधानमुपेक्षा। अंधकारकल्पाज्ञानाभावः। अज्ञान
नाशो वा – फलमित्युच्यते प्रमिणोति प्रमीयते ऽनेन प्रमितिमात्रं वा प्रमाणं किमनेन प्रमी
यते जीवादिरर्थः। यदि जीवादिरधिगमे प्रमाणं प्रमाणाधिगमे अन्यत्प्रमाणं कल्पयि
तव्यं तथा सत्यनवस्था नानवस्था प्रदीपवत्। यथा घटादीनां प्रकाशने प्रदीपो हेतुः। स्व
स्वरूपप्रकाशनेपि स एव न प्रकाशांतरं मृग्यं तथा प्रमाणमपीति अवश्यं चैतदभ्युपगं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्यलोकभयोनाष्टौ न न्यूनेति अधोधोवचनं तिर्यक्प्रचयनिवृत्त्यर्थं किं ता भूमयो नारका
णां सर्वकालमावासाः। आहोस्वित्क्वचित्क्वचिदिति तन्निर्धारणार्थमाह॥ सूत्रं॥ तासु त्रिंशत्पं
चविंशतिपंचदशत्रिपंचोनैकनरकशतसहस्राणि पंच चैव यथाक्रमं॥ तासु र
त्नप्रभादिषु भूमिषु नरकाण्यनेन संख्यायंते यथाक्रमं रत्नप्रभायां त्रिंशन्नरकश
तसहस्राणि शर्कराप्रभायां पंचविंशतिनरकशतसहस्राणि वालुकाप्रभायां पं
चदशनरकशतसहस्राणि। पंकप्रभायां दशनरकशतसहस्राणि धूमप्रभायां त्री
णि नरकशतसहस्राणि तमःप्रभायां पंचोनमेकं शतसहस्रं महातमःप्रभायां पंच
नरकाणि प्रभायां प्रस्तरास्त्रयोदशाधोधो द्विहीनाः। रत्नप्रभायां नरकप्रस्तारस्त्र
योदश ततोऽधः। आसप्तम्याः द्विद्विनरकप्रस्ताराः हीनाः इतरो विशेषः। लोकनियो
गतो वेदितव्यः। अथ तासु भूमिषु नारकाणां कः प्रतिविशेष इति॥ सूत्रं॥ नारका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रिता भूमिर्वालुकाप्रभानामसद्भावरिता भूमिः पंकप्रभाधूमप्रभानामसद्भावरिता भूमिः धूम
प्रभा तमःप्रभा नामसद्भावरिता भूमिस्तमप्रभा महातमःप्रभा नामसद्भावरिता भूमिः महातमःप्र
भा इत्येताः संज्ञाः अनेनोपायेन बुद्ध्यांते भूमिग्रहणमधिकरणविशेष
प्रतिपत्त्यर्थं यथा स्वर्गपटलानि भूमिनास्त्यवस्थितानि न तथा नारकावासाः
किं तर्हि भूमय एताः इति आसां भूमीनामालंबननिर्ज्ञानार्थं घनांबुवातादिग्रह
णं क्रियते घनांबुच वातश्च आकाशश्च घनांबुवाताकाशानि तानि प्रतिष्ठा आश्रयो
यासां ता घनांबुवाताकाशप्रतिष्ठाः सर्वा एता भूमयः घनोदधिवलयप्रतिष्ठाः घ
नोदधिवलयं घनवातवलयप्रतिष्ठं घनवातवलयं तनुवातवलयप्रतिष्ठं तनु
वातवलयमाकाशप्रतिष्ठं आकाशं स्वप्रतिष्ठं तस्यैवाधाराधेयत्वात् त्रीण्येतानि
वलयानि प्रत्येकं विंशतियोजनसहस्रबाहल्यानि सप्तग्रहणं संख्यान्तरनिवृत्त्यर्थं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यइतियथासंभवंविज्ञातव्यंविज्ञेयंस पिरूढितोभेदरूढत्वंलक्षणानांपर्यायशब्दत्वंयथे
द्रःशक्रःपुरंदरइतिइंदनादिक्रियाभेदेपिसतीपिएकस्यैवसंज्ञाः।समभिरूढनयापेक्ष
यातेषामर्थांतरकल्पनायां।मत्यादिष्वपिसक्रमोयोज्यस्तथापिकिंतुमतिज्ञानावरणक्षयो
पशमनिमित्तोपयोगंनातिवर्तंतइतिअयमत्रार्थोविवक्षितइतिशब्दः।प्रकारार्थःएवंप्र
काराअस्यपर्यायशब्दाइतिअभिधेयार्थोवामतिः।स्मृतिःसंज्ञाचिंताभिनिबोधइत्येते
योभिधीयते।सएकइति।अथास्यात्मलाभेकिंनिमित्तमित्यतआह।सूत्रं।तदिंद्रिय १
निमित्तं॥इंदतीतिइंद्रः।आत्मातस्यज्ञस्वभावस्यतदावरणक्षयोपशमेसतिस्वयम
र्थान्।गृहीतुमसमर्थस्ययदर्थोपलब्धिनिमित्तं।लिंगमदिंगंतदिंद्रस्यलिंगमिंद्रियमित्यु
च्यते।अथवालीनमर्थंगमयतीतिलिंगं।आत्मनःसूक्ष्मस्यास्तित्वाधिगमेलिंगमिंद्रियंयथा ५२
इहधूमोग्नेः।एवमिदंस्पर्शनादिकरणंनासतिकर्तर्यात्मनिभवितुमर्हतीतिज्ञातुरस्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्मानंत्याद स्थानेकार्थग्राहिन्याः प्रतिज्ञाविज्ञानातिनविज्ञानेनैकमर्थद्वयं। यथा एकमर्थं
विज्ञानातिनविज्ञानद्वयं तत्प्रतिसादीयते। अथ सर्वाक्षणिकाः सर्वसंस्कारा इति प्रतिज्ञा
हीयते। अनेकक्षणवृत्त्येकविज्ञानाद्यनुपगमात्। अनेकार्थग्रहणं हि क्रमेणोतिपुष्टे
देतिशीतयोस्तु ज्ञानमक्षणः सत्रासमतानार्थः। एतल्लक्षमानं किंचित्स्थकार्यं शति
वाधियते प्रदीपवदिति चेत्। न तस्याप्यनेकक्षणविषयतायां सत्यामेव प्रकाशसा
कासंना। नुपगमात् विकल्पातीतत्वात्। तस्मात् नत्वात्पसंगस्य अभिहितनयप्रकारस्य
प्रमाणस्य आदिप्रकारविरोधप्रतिपत्त्यर्थमाह॥ सूत्रं॥ मतिःस्मृतिःसंज्ञाचिंताभि
निबोधइत्यनर्थांतरं॥ आदावुद्दिष्टं यत् ज्ञानं तस्य पर्यायशब्दाः। एते शब्देतव्याः मति
ज्ञानावरणक्षयोपशमांतरंगनिमित्तजनितोपयोगविषयत्वात्। एतेषां कथंचित्कथंचि
द्भेदेऽपि मननं मतिः। स्मरणं स्मृतिः। संज्ञानं संज्ञा चिंतनं चिंता अभिनिबोधनं अभिनिबो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भेदमितितद्भेदप्रतिपत्त्यर्थमाह॥ अथसूत्रं॥ अवग्रहेहावायधारणाः॥ विषयवि
षयिसन्निपातसमयानंतरमाद्यंग्रहणमवग्रहः। विषयविषयिसन्निपातेसतिद
र्शनंभवतितदनंतरमर्थस्यग्रहणमवग्रहः। यथाचक्षुषाशुक्लंरूपमितिग्रहण
मवग्रहः। अवग्रहगृहीतेर्थेतद्विशेषाकांक्षणमीहा। यथाशुक्लंरूपंकिंबला
कापताकावेति। विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायउत्पतननिपतनपक्षविक्षे
पादिभिर्बलाकैवेयंनपताकेति। अवेतस्यकालांतरेअस्मरणकारणंधारणायथासै
वेयंबलाकापूर्वाह्णेयामहमद्राक्षमिति। एषामवग्रहादीनामुपन्यासक्रम
उत्पत्तिक्रमकृतः। उक्तानामवग्रहादीनांप्रभेदप्रतिपत्त्यर्थमाह॥ अथसूत्रं॥
बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणांसेतराणां॥ अवग्रहादयःक्रियाविशेषाः
प्रकृतास्तदपेक्षोयंकर्मनिर्देशः। बह्वादीनांसेतराणामितिबहुशब्दस्यसंख्यावैपु ४२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऽत्र गम्यते। अथवा इंद्र इति नामकर्मोच्यते तेन सृष्टं इंद्रियमिति तत्स्पर्शनादिपंचप्रकारं व
र्तते। अनिंद्रियं मनोऽन्तःकरणमित्यर्थः तत्कथं मनः इंद्रियप्रतिषेधेन इंद्रलिंगे सत्यम
नसि अनिंद्रियग्रहणस्य प्रवृत्तिः। ईषदर्थस्य नञः प्रयोगात् ईषदिंद्रियमनिंद्रियमिति
। यथा अनुदरा कन्येति कथमीषदर्थः इमानींद्रियाणि प्रतिनियतदेशविषयाणि कालां
तरावस्थायि च तदंतः। करणमिति चोच्यते गुणदोषविचारस्मरणादिव्यापारेषु इंद्रि
यानपेक्षत्वात् चक्षुरादिवत्। बहिरनुपलब्धेश्च अंतर्गतं करणमंतःकरणमित्युच्य
ते तदिति किमर्थं मतिज्ञाननिर्देशार्थं नन्वेतदनंतरं अनंतरस्य विधिर्वा भव
ति प्रतिषेधो वेति तस्येव प्रसंगो न भवति। इदमर्थं पुनस्तद्ग्रहणं तदित्युच्यते यन्मत्यादिषु सं
यच्छब्दवाच्यं ज्ञानं तदिंद्रियनिमित्तं। तदेवावधारणाय धारणात्। इतरथा हि ऽद्य मं
मत्यादिशब्दवाच्यं ज्ञानमिंद्रियानिंद्रियनिमित्तं श्रुतं। एवं मतिज्ञानस्य निमित्तमनिर्णीत

× सा... ...पनिमि... ...वं तदेवावधारणाय धारण... ×

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थसर्वा०

४३

रतानामुच्चारणस्कृताविशेषः उक्तनिःसृतयोः कः प्रतिविशेषः। यावता सकलनिःसरणान्निसृ
तं उक्तमप्येवंविधमेव अयमस्ति विशेषः। अन्योपदेशपूर्वकं ग्रहणमुक्तं स्वत एव ग्र
हणं निसृतं। अपरेषां क्षिप्रनिसृत इति पाठः। त एवं वर्णयंति श्रोत्रेंद्रियेण शब्दम
वगृह्यमाणं मयूरस्य वा कुररस्य वेति कश्चित्प्रतिपद्यते अपरः। स्वरूपमेवानिसृत इ
ति ध्रुवावग्रहस्य धारणायाश्च कः प्रतिविशेषः। उच्यते क्षयोपशमप्राप्तिकाले विशुद्ध
परिणामसंतत्या प्राप्तात्। क्षयोपशमात्। प्रथमसमये यथावग्रहस्तथैव द्वितीयादि
ष्वपि समयेषु नोनो नाभ्यधिक इति ध्रुवावग्रह इत्युच्यते। यदा पुनर्विशुद्धप
रिणामस्य संक्लेशपरिणामस्य च मिश्रणात्। क्षयोपशमो भवति। ततः उत्पद्यमा
नोवग्रहः। कदाचिद्बहूनां कदाचिदल्पस्य। कदाचिद्बहुविधस्य। कदाचिदेक ४३
विधस्य वेति न्यूनाधिकभावादध्रुवोऽवग्रहः। धारणा पुनर्गृहीतार्थावि

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ल्पवादिभेदग्रहणमविशेषासंख्यातासंख्यातकः कोवग्रहः इति देशभ्यसाधी। बहु
बजारोदनाबजसृपइतिविधग्रहः।एकारवाद्यी क्षिप्रग्रहणमचिराप्रतिपत्त्यर्थं।
अनिःसृतग्रहणं असकलपुद्गलोद्गमार्थं अनुक्तमभिप्रायेणग्रहणं ध्रुवं निरं
तरंयथार्थग्रहणंमेतरग्रहणंप्रतिपक्षसंग्रहार्थं बहुनामवग्रहः। अल्पस्यावग्रहः।
बहुविधस्यावग्रहः। एकविधस्यावग्रहः क्षिप्रमवग्रहः। चिरेणावग्रहः। अनिःसृतस्या
वग्रहः। निःसृतस्यावग्रहः। अनुक्तस्यावग्रहः। उक्तस्यावग्रहः। ध्रुवस्यावग्रहः। अ
ध्रुवस्यावग्रहः। इति अवग्रहो द्वादशविकल्पः। एवमीहादयोपि एतेषां च पंचभिरिं
द्रियैर्मनसा च प्रत्येकं षाड्विंशंते। तत्र बहुवग्रहादयः। मतिज्ञानावरणक्षयो
पशमप्रकर्षात् प्रवर्तंतिनेतरे इति। तेषां मत्यादित्वात्तत्र आदौ ग्रहणं क्रियते बहुब
हुविधयोः कः प्रतिविशेषः। यावता बहुषु बहुविधेषु पि बहुत्वं भक्तिप्रकाश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

समनस्काः॥ संज्ञिनमनस्कं तु आहारादिसंज्ञा तं तस्यास्य संज्ञास्यति किमर्थमिदं नियमार्थं
गृहादयो नैतत्त्वादयः इति मतं तर्हि एवकारः। कर्तव्यो न कर्तव्यः। सिद्धे विधिरारभ्यमा
णो नियमार्थं इति चेत् तर्हि एवकारं नियमार्थं विशेषेति न तत्रस्य गणन्तु नयत्रतत्त्वं त
त्र किं कृतो विशेषः। अथ विग्रहं संज्ञानां ग्रहयोः अर्थं कृतो विशेषः। कथमद्य
लिनः समनाशडी करणवत्। यथा जलकणादि शामिकः। शरारोहिणि नामाडी
भवति मनस्युतः ज्ञनमितभानः खनेरिष्यति। एवं श्रोत्रादिषु इंद्रियेषु ग्रहादि
परिणताः। पुरुषाहिताहिषु समयेषु प्रवृत्तमानानसंज्ञीनं भवति। पुनः पुनरवसरे
मनिष्कीनं भवति। अतोऽस्य कर्मग्रहणात् प्राक् संज्ञानां ग्रहः। अथ कर्मग्रहणमर्थीय
ग्रहः। नतो अस्य कर्मग्रहणात्। ईश्वरादयो भवंति तिर्यग्रेंद्रियाणामपि देहं संज्ञानाव ५५
स्य संगोपनां संयमस्य दर्शनपरिग्रहमात्र॥ अथ सूत्रं नमस्कारमिंद्रियाणां॥ वह

CC0.In Public Domain, Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विस्मरणकारणमितिमदृढं नयोरंतरं यथावग्रहादयो बह्वादीनां कर्मणां भावेनाभि
तः। बह्वादीनि विशेषणानि कस्य तदाह॥ अर्थस्य सू॰॥ अर्थस्य॥ चक्षुरादिविष
याऽर्थः। तस्य बह्वादिविशेषणविशिष्टस्य अवग्रहादयो भवंतीत्यभिसंबंधः॥ कि
यते किमर्थमिदमुच्यते यावता बह्वादिरर्थः। सत्यमेवं किं तु प्रवादिपरिकल्पनानि
वृत्त्यर्थमर्थस्य ग्रहणं। केचिद्रूपादीनामन्यंते रूपादयो गुणा एवेंद्रियसन्निकृ
ष्टा। तेनेषां ग्रहणमिति तदयुक्तं न हि ते रूपादयो गुणा अमूर्ता इंद्रियसन्निकर्षमाप
द्यंते। नहि इदानीमिदं भवति रूपं मया दृष्टं गंधो वा घ्रात इति भवति च कथं इ
दानीं घटो यो मया पूर्वं दृष्टस्तमिदानीं स्पृशामीति। सन्निकर्षप्राणवद्वत्तिरि
ज्ञात। रूपादिस्पर्शवद्दाणुडाति किमिमे बह्वादयः। सर्वेऽपींद्रियास्यानि
न्द्रियमाप्नुवंति। तत्र कश्चिद्विषये विशेषोऽस्तीत्यत आह॥ अथ सू॰ ४। ७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थसर्वार्थ
४५

तशब्दोयं श्रवणमुपादायव्युत्पादितोपि रूढिवशात्कस्मिंश्चिज्ज्ञानविशेषेवर्त्त
ते। यथा कुशलवनकर्मप्रतीत्यव्युत्पादितोपि कुशलशब्दः रूढिवशात्पर्यवदा
तेकः। पुनरसौ ज्ञानविशेषइति अतआह। श्रुतंमतिपूर्वमिति श्रुतस्यप्रमाणत्वं
पूरयतीति पूर्वंनिमित्तंकारणमित्यनर्थांतरंमतिर्निर्दिष्टामतिः। पूर्वमस्यमतिपूर्वं
मतिकारणमित्यर्थः यदिमतिपूर्वंश्रुतंतदपिमत्यात्मकंप्राप्नोतिकारणसदृशंहि
लोकेकार्यंदृष्टमितिनैतदैकांतिकंदंडादिकारणोयंघटः। नदंडाद्यात्मकः। अपि
चसतितस्मिंस्तदभावात्सत्यपिमतिज्ञानेबाह्यश्रुतावरणोदयस्यश्रुताभावः।
श्रुतावरणक्षयोपशमप्रकर्षेतुसतिश्रुतज्ञानमुत्पद्यतइतिमतिज्ञानंनिमित्तमा
त्रंज्ञेयं। आहश्रुतमनादिनिधनमिष्यतेतस्यमतिपूर्वकत्वेतदभावः। आदिम
तोंतवत्वात्ततश्चपुरुषकृतित्वात्। अप्रामाण्यमितिनैषदोषः। द्रव्यादिसाम ४५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षुषानिंद्रियेण च व्यंजनावग्रहो न भवति कुतः। अप्राप्यकारित्वात् यतो प्राप्तम
र्थमविदिक्कं युक्तं सन्निकर्षविषये वस्थितं बाह्यप्रकाशाभिव्यक्तमुपलभते
ते मनश्चाप्राप्तमित्यनयोर्व्यंजनावग्रहो नास्ति चक्षुषो प्राप्यकारित्वं कथमध्य
वसीयते युक्तित आगमतस्तावत्। पुटुं सुणेदि सदं अपुटुं पुण पस्सदे रूवं। गं
धं रसं च फासं बद्धं पुटुं वियाणादि युक्तितश्चाप्राप्यकारि चक्षुः स्पृष्टानवग्रहा
त्। यदि प्राप्यकारि स्यात् त्वगिंद्रियवत्। स्पृष्टमंजनं गृह्णीयात्। न तु गृह्णात्यतो म
नोमनोवत्। अप्राप्यकारीत्यवसेयं ततश्चक्षुर्मनसी वर्जयित्वा शेषाणामिंद्रिया
णां व्यंजनावग्रहः। सर्वेषामिंद्रियानिंद्रियाणामर्थावग्रह इति सिद्धं आह निर्दि
ष्टं मतिज्ञानं लक्षणतो विकल्पतश्च तदनंतरमुद्दिष्टं यत् श्रुतं। तस्येदानीं लक्षणं वि
कल्पश्च वक्तव्य इत्यत आह॥ **श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदं॥** श्रु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्वार्थसर्वा दिकार्थसंबंधांतरंद्वितिपछतेधूमादेरग्न्यादिज्ञानंतदाश्रुतात् । श्रुतपूर्वमपिश्रुतमितिनदोष
५६ :। तस्यापिमतिपूर्वकत्वमुपचारतः । श्रुतमपिक्वचिन्मतिरित्युपचर्यतेमतिपूर्वकत्वात्
। इतिनेदमस्तः । प्रत्येकंपरिसमाप्यतेद्विभेदमनेकभेदंद्वादशभेदमितिद्विभेदं
त अंगबाह्यमंगप्रविष्टमिति अंगबाह्यमनेकविधंदशवैकालिकोत्तराध्ययनादि
अंगप्रविष्टंद्वादशविधंतद्यथा । आचारः सूत्रकृतंस्थानंसमवायः । व्याख्याप्रज्ञप्ति
:। ज्ञातृधर्मकथाउपासकाध्ययनं । अंतकृद्दशंअनुत्तरोपपादिकदशंप्रश्नव्याकर
णंविपाकसूत्रंदृष्टिवादइतिदृष्टिवादः पंचविधः । परिकर्मसूत्रंप्रथमानुयोगः ।
पूर्वगतंचूलिकाचेतितत्रपूर्वगतंचतुर्दशविधंउत्पादपूर्वं । अग्रायणीयंवीर्यप्रवा
दं । अस्तिनास्तिप्रवादं । ज्ञानप्रवादं । आत्मप्रवादं । कर्मप्रवादं । प्रत्याख्याननाम ५६
धेयं । विद्यानुप्रवादं । कल्याणनामधेयं । प्राणावायं । क्रियाविशालं । लोकबिंदुसा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यार्पणात्। श्रुतमनादिनिधनमिष्यते न हि केनचित्पुरुषेण। क्वचित्कदाचित्क
थंचित्कृतमिति विशेषापेक्षया आदिनिधनमिष्यते तेन मतिपूर्वकमित्यु
च्यते यथांकुरो बीजपूर्वकः। स च संतानापेक्षया अनादिनिधन इति न चापौरुषे
यत्वं प्रामाण्यकारणं चौर्याद्युपदेशस्यास्मर्यमाणकर्तृकस्य प्रामाण्यप्रसंगात्।
अनित्यस्य च प्रत्यक्षादेः प्रामाण्ये को विरोधः। आह। प्रथमसम्यक्त्वोत्पत्तौ युग
पत्। ज्ञानपरिणामात्। मतिपूर्वकत्वं श्रुतस्य नोपपद्यते इति तदयुक्तं सम्यक्त्व
स्य तदपेक्षत्वादात्मलाभस्तु क्रमवानिति मतिपूर्वकत्वव्याघाताभावः। आह
मतिपूर्वं श्रुतमित्येतल्लक्षणमव्यापि श्रुतपूर्वमपि श्रुतमिष्यते तद्यथा शब्दपरिणतपु
द्गलस्कंधादाहितवर्णपदवाक्यादिभावात्। चक्षुरादिविषयाच्च आद्यश्रु
तविषयभावमापन्नादव्यभिचारिणः। कृतसंगीतिर्जनो घटाज्जलधारणा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्छितिन सम्यक् स्यान्मतं। इंद्रियव्यापारजनितं ज्ञानं प्रत्यक्षं व्यतीतेंद्रियविषयव्यापारं प
रोक्षमित्येतदविसंवादि लक्षणमभ्युपगंतव्यमिति। तदयुक्तमाप्तस्य प्रत्य
क्षज्ञानाभावप्रसंगात् यदिंद्रियनिमित्तमेव ज्ञानं प्रत्यक्षमिष्यते। एवं स [illegible] स्य प्रत्य
क्षं ज्ञानं न स्यात्। न हि तस्येंद्रियपूर्वोऽर्थाधिगमः। अथ तस्यापि करणपूर्वकमेव ज्ञा
नं कल्प्यते तस्यासर्वज्ञत्वं स्यात्। तस्य मानसं प्रत्यक्षमिति चेत् मनः। प्रणिधानपू
र्वकत्वात्। ज्ञानस्यासर्वज्ञत्वाभाव एव। आगमात्तत्सिद्धिरिति चेत्। न तस्य आगमस्य
प्रत्यक्षज्ञानपूर्वकत्वात्। योगिप्रत्यक्षमन्यज्ज्ञानं दिव्यमस्तीति चेत् न तस्य प्रत्यक्षत्वं।
।इंद्रियनिमित्ताभावात्। अक्षमक्षं प्रति यद्वर्तते तत्प्रत्यक्षमित्य पगमात् किं
च सर्वज्ञत्वाभावः। प्रतिज्ञाहानिर्वा अस्य योगिनो यत्। ज्ञानं तत्प्रत्यर्थवशवर्त्ति वा
स्यात्। अनेकार्थग्राहि वा यदि प्रत्यर्थवशवर्त्ति सर्वज्ञत्वमस्य नास्ति योगिनः। ज्ञे ५८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तोऽस्य परोक्षत्वं परापेक्षत्वात्। मतिज्ञानमिंद्रियानिंद्रियनिमित्तमिति वक्ष्यते। श्रुतमनिंद्रियस्येति च
अतः। पराणींद्रियाणि मनश्च प्रकाशोपदेशादि बाह्यनिमित्तं प्रतीत्य तदावरणकर्म
क्षयोपशमापेक्षस्यात्मनः। मतिश्रुतं उत्पद्यमानं परोक्षमित्याख्यायते। अत उपमा
नागमादीनामत्रैवांतर्भावः। अभिहितलक्षणात्परोक्षादितरस्य सर्वस्य प्रत्यक्षत्व
प्रतिपादनार्थमाह॥ सू॰१२॥ प्रत्यक्षमन्यत्॥ अक्ष्णोति व्याप्नोति जानातीत्यक्षः। आ
त्मा तमेव प्राप्तक्षयोपशमं प्रक्षीणावरणं वा प्रतिनियतं प्रत्यक्षं। अवधिदर्शनं केवल
दर्शनमपि अक्षमेव प्रतिनियतं। अतस्तस्यापि ग्रहणं प्राप्नोतीति नैष दोषः। ज्ञानमित्यनु
वर्तते तेन दर्शनस्य व्युदासः। एवमपि विभंगज्ञानमक्षमेव प्रतिनियतमतोऽस्यापि
ग्रहणं प्राप्नोति सम्यगित्यधिकारात्। तन्निवृत्तिः। सम्यगित्यनुवर्तते तेन ज्ञानं विशिष्य
ते। ततो विभंगज्ञानस्य निवृत्तिः। कृतः? तद्धि मिथ्यादर्शनोदयात् विपरीतार्थविषय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थवृत्ति
४५

रस्यास्य स्वाम्यार्थं ज्ञापयितामित्यज्ञोऽध्याते द्विविधोऽवधिः भवप्रत्ययः क्षयोपश
मनिमित्तश्चेति। तत्र भवप्रत्ययमुच्यते॥ अथ सूत्रं। भवप्रत्ययोऽवधिर्देवनारका
णां॥ वेदितव्यः यद्येवं तत्र क्षयोपशमनिमित्तत्वं न प्राप्नोति नैष दोषः। तदाश्रया
त्तत्सिद्धेः। भवं प्रतीत्य क्षयोपशमः। संजायत इति कृत्वा भवः। प्रधानकारणमित्यु
पदिश्यते। यथा पतत्रिणो गमनमाकाशे भवनिबंधनं न शिक्षागुणविशेषः। तथा देव
नारकाणां व्रतनियमाद्यभावेऽपि जायत इति भवप्रत्यय उच्यते इतरथा हि भ
वः साधारण इति कृत्वा सर्वेषामविशेषः स्यात्। इष्यते च तत्रावधेः प्रकर्षाप्रक
र्षवृत्तिर्देवनारकाणामित्यविरोधात्। ध्यनोऽसम्यग्दृष्टीनामेव ग्रहणं
ज्ञेयः। अवधिग्रहणात् मिथ्यादृष्टीनां विभंगस्तूच्यते। प्रकर्षाप्रकर्षवृत्तिश्चा ४५
गमतो ज्ञातव्या यदि भवप्रत्ययोऽवधिर्देवनारकाणां। अथ क्षयोपशमहेतुः कः के

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रमिति। तदेतच्छ्रुतं द्विभेदमनेकभेदं द्वादशभेदमिदं द्वातिकिंकृतोऽयं विशेषः। वि
शेषवक्तृतो विशेषः त्रयो वक्तारः सर्वज्ञः तीर्थंकरः। इतरो वा श्रुतकेव
ली आरातीयश्चेति तत्र सर्वज्ञेन परमर्षिणा परमाचिन्त्यकेवलज्ञानविभूतिवि
शेषेण अर्थतः। आगम उद्दिष्टः तस्य प्रत्यक्षदर्शित्वात्प्रक्षीणदोषत्वाच्च प्रामा
ण्यं तस्य साक्षाच्छिष्यैर्बुद्ध्यतिशयर्द्धियुक्तैर्गणधरैः। श्रुतकेवलिभिः। अनुस्मृत
ग्रंथरचनमंगपूर्वलक्षणं। तत्प्रमाणं तत्प्रामाण्यात्। आरातीयैः पुनराचार्यैः।
कालदोषात्संक्षिप्तायुर्मतिबलशिष्यानुग्रहार्थं दशवैकालिकाद्युपनिबद्धं
तत्प्रमाणमर्थतस्तदेवेदमिति क्षीरार्णवजलं घटगृहीतमिव व्याख्यातं परोक्षं
प्रत्यक्षमिदानीं वक्तव्यं। तत्र द्विधा देशप्रत्यक्षं सर्वप्रत्यक्षं च देशप्रत्यक्षमवधिम
नः। पर्ययज्ञाने सर्वप्रत्यक्षं केवलं यच्चैवं। इदमेव तावदवधिज्ञानं त्रिःप्रका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षवचनवत्। वर्द्धमानोवधिः अरणिनिर्मथनोत्पन्नशुष्कपत्रोपचीयमानेंधननिचयस
मिद्धपावकवत्। सम्यक्दर्शनादिगुणविशुद्धिपरिणामसन्निधानात् यत्परिमाणाउ
त्पन्नस्ततो वर्द्धते आसंख्येयलोकेभ्यः। हीयमानोवधिः परिच्छिन्नोपादानसंतत्यग्नि
शिखावत्। सम्यक्दर्शनादिगुणहानिसंक्लेशपरिणामवृद्धियोगात् यत्परिमाण
उत्पन्नस्ततो हीयते आ अंगुलस्य संख्येयभागात् अवस्थितोवधिः। सम्यग्दर्शनादिगु
णावस्थानात्। यत्परिमाणउत्पन्नस्तत्परिमाण एवावतिष्ठते न हीयते नापि वर्द्धते लिं
गवत् आभवक्षयात् आकेवलज्ञानोत्पत्तेर्वा अन्योवधिः। सम्यग्दर्शनादिगुण
वृद्धिहानियोगात् यत्परिमाणउत्पन्नस्ततो वर्द्धते यावदनेन वर्द्धितव्यं हीयते च या
वदनेन हातव्यं वायुवेगप्रेरितजलोर्मिवत्। एवं षड्विकल्पो अवधिर्भवति। एवंव्या
तमवधिज्ञानं तदनंतरमिदानीं मनः। पर्ययज्ञानं वक्तव्यं। तस्य भेदपुरस्सरं लक्षणं ५५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षामित्युक्तत्राह।। अथ सूत्रं। क्षयोपशमनिमित्तः षड्विकल्पः शेषाणां।। अवधिज्ञा-
नावरणस्य देशघातिस्पर्द्धकानामुदये सति सर्वघातिस्पर्द्धकानां उदयाभावः
क्षयः तेषामेवानुदयप्राप्तानां सदवस्थानमुपशमः तौ निमित्तमस्येति क्षयोपशम-
निमित्तः स शेषाणां वेदितव्यः के पुनः शेषाः मनुष्यास्तिर्यंचश्च तेष्वपि यत्र सामर्थ्यम-
स्ति तत्रैव वेदितव्यः। न ह्यसंज्ञिनामपर्याप्तकानां च तत्सामर्थ्यमस्ति संज्ञिनां पर्याप्तका-
नां च न सर्वेषां केषां तर्हि यथोक्तं। सम्यग्दर्शनादिनिमित्तसन्निधाने सति शांतक्षीण-
कर्मणां तस्योपलब्धिर्भवति सर्वस्य क्षयोपशमनिमित्तत्वे क्षयोपशमग्रहणं नियमा-
र्थं क्षयोपशम एव निमित्तं न भव इति स एषोवधिः षड्विकल्पः कुतः। अनुगाम्यन-
नुगामिवर्द्धमानहीयमानावस्थितानवस्थितभेदात् कश्चिदवधिः भास्करप्र-
काशवत् गच्छंतमनुगच्छति कश्चिन्नानुगच्छति। तत्रैवातिपतति उन्मुखप्रश्नादेशिपुरु-

Ganesh Varni Digambar Jain Institute, Narla, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यमनसिचव्यवस्थितोर्थः। अनेनज्ञायतइं ॰ रुक्षाग द्वेतेन ऋजुमतिर्मनःपर्ययः
कालतोजघन्येनजीवानामात्मनश्चद्वित्राणिभवग्रहणानि उत्कर्षेणसप्ताष्टानिगत्याग
त्यादिभिः। प्ररूपयति। क्षेत्रतोजघन्येनगव्यूतिपृथक्त्वं। उत्कर्षेणयोजनपृथक्त्वस्या
भ्यंतरंनबहिः। द्वितीयःकालतोजघन्येनसप्ताष्टानिभवग्रहणानि। उत्कर्षेणासंख्ये
यानिगत्यागत्यादिभिः। प्ररूपयतिक्षेत्रतो। जघन्येनयोजनपृथक्त्वं। उत्कर्षेणमा
नुषोत्तरशैलस्याभ्यंतरंनबहिः। उक्तयोरनयोःपुनरपिविशेषप्रतिपत्त्यर्थमाह।
॥अथसूत्रं। विशुद्ध्यप्रतिपाताभ्यांतद्विशेषः॥ तदावरणकर्मक्षयोपशमेस
तिआत्मनः। प्रसादोविशुद्धिः। प्रतिपतनंप्रतिपातोनप्रतिपातः। उपशांतकषायस्य
चारित्रमोहोद्रेकात्प्रच्युतसंयमशिखरस्यप्रतिपातोभवति। क्षीणकषायस्यप्र ४९
तिपातकारणाभावादप्रतिपातः। विशुद्धिश्चअप्रतिपातश्चविशुद्ध्यप्रतिपातौताभ्यां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यांवाशिरस्वास्तुरिदमाहः॥ अथसूत्रं ऋजुविपुलमतीमनःपर्ययः॥ ऋज्वीनिर्वर्ति
ताप्रगुणाचकस्मान्निर्वर्तितावाक्कायमनस्कृतार्थस्यपरमनोगतस्यविज्ञानात्ऋ
ज्वीमतिर्यस्यसोयंऋजुमतिः। अनिर्वर्तिताकुटिलाचविपुलाकस्मादनिर्वर्तितावा
क्कायमनःकृतार्थस्यपरमनोगतस्यविज्ञानात्। विपुलामतिर्यस्यसोयंविपुलमतिः
।ऋजुमतिश्चविपुलमतिश्चऋजुविपुलमती।एकस्यमतिशब्दस्यगतार्थत्वादप्र
प्रयोगः। अथवाऋजुश्चविपुलाचऋजुविपुलेमतीययोःतौऋजुविपुलमतीस
एषमनःपर्ययःद्विविधः। ऋजुमतिर्विपुलमतिरितिआहउक्तोभेदः। लक्षणमि
दानींवक्तव्यमित्यत्रोच्यतेवीर्यान्तरायमनःपर्ययज्ञानावरणक्षयोपशमांगोपां
गनामलाभावष्टंभादात्मनः। परकीयमनःसंबंधेनलब्धवृत्तिरुपयोगोमनःप
र्ययः मतिज्ञानप्रसंगइतिचेदुक्तोत्तरंपुरस्तात्। अपेक्षाकारणंमनइतिपरकी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्तविपर्ययेन। सौमीतयोः कालविषययोर्भेदः। तत्त्वार्थेमनःपर्ययविशुद्धतरःक्षेत्रःस्वा
म्यविषयेभ्यः। स्वामित्वं प्रकृष्टचारित्रगुणोपेतेषु वर्त्तते प्रमत्तादिषु
क्षीणकषायांतेषु तत्र मानः वर्द्धमानचारित्रेषु न हीयमानचारित्रेषु वर्द्धमानचारि
त्रेषूत्पद्यमानः। सप्तविधान्यतमर्द्धिप्राप्तेषूपजायते नेतरेषु ऋद्धिप्राप्तेषु केषुचि
न्नसर्वेष्विति अस्यार्थस्वामिविशेषः। विशिष्टसंयमग्रहणं वाक्येन तं अवधिः पुन
ःश्चातुर्गतिकेष्विति स्वामिभेदादप्यनयोर्विशेषः। इदानीं केवलज्ञानलक्षणाभि
धानं प्राप्तकालं तदुल्लंघ्य ज्ञानानां विषयनिबंधः। परीक्ष्यते कुतस्तस्य मोहक्षया
ज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं इति वक्ष्यमाणत्वात् यद्येवमाद्य
योरेव तावन्मतिश्रुतयोर्विषयनिबंधः उच्यतामित्यत आह॥ सूत्रं॥ मतिश्रुत ५०
योर्निबंधो द्रव्येष्वसर्वपर्यायेषु॥ निबंधनं निबंधः। कस्य विषयस्य तद्विषय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशुद्धिप्रतिपाताभ्यां तयोर्विशेषस्तद्विशेषस्तत्र विशुद्धा नाम रत्न। ऋजुमतेर्विपुलम
तिर्द्रव्यक्षेत्रकालभावैः। विशुद्धतरः कथमिति चेत्‌ कार्मणद्रव्यानन्तभागोंत्यः। सर्वा
वधिना ज्ञातः तस्य पुनरनंतभागीकृतस्यांत्यो भागः। ऋजुमतेर्विषयः तस्य ऋजुमति
विषयस्यानंतभागीकृतस्यांत्यो भागः विपुलमतेर्विषयः। अनंतस्यानंतभेदत्वात्‌।
द्रव्यक्षेत्रकालविशुद्धिरुक्ता नारतो विशुद्धिः सूक्ष्मतरद्रव्यविषयत्वादेवेदित
व्या प्रकृष्टक्षयोपशमविशुद्धियोगात्‌। अप्रतिपातेनापि विपुलमतिर्विशिष्टः स्वा
मिनां प्रवर्द्धमानचारित्रोदयत्वात्‌ ऋजुमतिः पुनः प्रतिपाती स्वामिनां कषायोद्रेका
त्‌। हीयमानचारित्रोदयत्वात्‌ यद्ययं मनःपर्ययस्य प्रत्यात्मविशेषः। अथ
द्वयोरवधिमनःपर्यययोः कुतो विशेषः इत्युत आह॥ अथ सूत्रं॥ विशुद्धिक्षेत्र
स्वामिविषयेभ्योऽवधिमनःपर्यययोः॥ विशुद्धिः प्रसादः क्षेत्रं यत्रस्थान्भावान्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयनिबंधइत्यनुवर्त्ततेरूपिष्वित्यनेनपुद्गलाःपुद्गलद्रव्यसंबंधाश्चजीवाः।
परिगृह्यंतेरूपिष्वेवावधेर्विषयनिबंधोनारूपिष्वितिनियमः।क्रियतेरूपिष्व
पिभवन्नसर्वः।पर्यायेषुस्वयोग्येष्वेवेत्यवधारणार्थमसर्वपर्यायेष्विति।अ
भिसंबध्यते।अथतदनंतरनिर्दिष्टस्यमनःपर्ययस्यकोविषयनिबंधइत्यत
आह॥अथसूत्रं॥ तदनंतभागेमनःपर्ययस्य॥ यद्रूपिद्रव्यंसर्वावधि
ज्ञानविषयत्वेनसमर्थितंतस्यानंतभागीकृतस्यएकस्मिन्भागेमनःपर्ययप्र
वर्त्तते।अथांतेयन्निर्दिष्टंकेवलज्ञानंतस्यकोविषयनिबंधइत्यत्रआह॥
॥अथसूत्रं सर्वद्रव्यपर्यायेषुकेवलस्य॥ द्रव्याणिचपर्यायाश्चद्रव्यप
र्यायाइतिद्वंद्वेतरेतरयोगलक्षणोद्वंद्वःतद्विशेषणंसर्वग्रहणंप्रत्येकमभि ५२
संबध्यतेसर्वेषुद्रव्येषुपर्यायेषुचेति।जीवद्रव्याणितावदनंतानंतानिपुद्गल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गृहणं कर्त्तव्यं न कर्त्तव्यं ॥ पृथग्मतिविषयपरहितांकृत्वाऽनंतविशुद्धितस्तस्मान्निविषये
ष्वद्दस्यातः। तस्यार्थस्वसाधितलक्षिपरिणामोलवतिविषयमेतानि संकृश्मतेडस्योषि
तिवञ्जबनिर्देशः। सर्वेषांजीवधर्माधर्मकालाकाशपुद्गलानां संगृहार्थः। तद्धितोप
पणार्थमसर्वपर्यायग्रहणं तानि द्रव्याणि मतिश्रुतयोर्विषय इत्यभावःषमानामिप
कतिपयैरेव पर्यायैः विषयतावभास्कंदंति न सर्वपर्यायैरनंतैरपीति। अत्राह
धर्मास्तिकायादीन्यतींद्रियाणितेषु। मतिज्ञानं न प्रवर्त्तते अतः सर्वद्रव्येषु मति
ज्ञानं वर्त्तत इत्ययुक्तं नैषदोषः। अनिंद्रियाख्यंकरणमस्ति तदालंबनः। नोइंद्रि
यावरणक्षयोपशमलब्धिपूर्वकमवग्रहः। अवग्रहादिरूपः प्रागेवोपजायते त
तस्तत्पूर्वं श्रुतज्ञानं तज्ज्ञानं तद्विषयेषु स्वयोग्येषु व्याप्रियते। अथ मतिश्रुतयोर
नंतरनिर्दिष्टमार्दस्यावधेः। कोविषयनिबंधस्यतत्राह ॥ अथ सूत्रं रूपिष्ववधेः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च ज्ञानिनां च वनं संति केवलस्यात्मस्वभावत्वात्। यथोक्तानि मत्यादीनि ज्ञानव्यपदेश
मेव लभंते उतान्यथापीत्यत आह॥ सूत्रं मतिश्रुतावधयो विपर्ययश्च॥ विपर्य
यो मिथ्येत्यर्थः। कुतः सम्यगधिकारात् चशब्दः समुच्चयार्थः। विपर्ययश्च सम्य
क्चेति कुतः। पुनरेषां विपर्ययः मिथ्यादर्शनेन सहैकार्थसमवायात् सरज
स्ककटुकालाबुगतदुग्धवत् ननु च तत्राधारदोषाद्दुग्धस्य रसविपर्ययो भ
वति न च तथा मत्य।ज्ञानां विषयग्रहणे विपर्ययः। तथाहि सम्यग्दृष्टिर्यथा चक्षु
रादिभिः। रूपादीनुपलभते। तथा मिथ्यादृष्टिरपि यथा च सम्यग्दृष्टिः। श्रुतेन रू
पादीन् जानाति निरूपयति च तथा मिथ्यादृष्टिरपि श्रुताज्ञानेन यथा चावधिज्ञानेन सम्य
ग्दृष्टिः रूपिणोऽर्थानवगच्छति। तथा मिथ्यादृष्टिर्विभंगज्ञानेनेति त्रोच्यते॥ सू
त्रं॥ सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत्॥ सद्विद्यमानमसदविद्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्याणि च तेनाप्यनंतानंतानि अणुस्कंधभेदेन भिन्नानि धर्म्माधर्म्माकाशानि त्रीणि काल
श्चासंख्येयः। तेषां पर्यायाश्च त्रिकालभुवः प्रत्येकमनंतानंताः तेषु द्रव्यं पर्यायजातं वान
किंचित्केवलज्ञानस्य विषयभावमतिक्रांतमस्ति अपरिमितमहात्म्यं हि तदिति ज्ञापनार्थं
सर्वद्रव्यपर्यायेष्विति उच्यते आह। विषयनिबंधोवधृतो मत्यादीनां इदं तु न निर्ज्ञातं एक
स्मिन्नात्मनि स्वनिमित्तसन्निधानोपजनितवृत्तीनि ज्ञानानि योगपद्येन कति संभवंतीत्यु
च्यते॥ अथ सूत्रं। एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः॥ एकशब्दः संख्यावाची
आदिशब्दोवयववचनः। एक आदिर्येषां तानीमान्येकादीनि भाज्यानि युगपदेकस्मि
न्नात्मनि आ कुतः। आ चतुर्भ्यः। तद्यथा। एकं तावत्केव
लज्ञानं न तेन सहान्यानि क्षायोपशमिकानि युगपदवतिष्ठंते द्वे मतिश्रुते त्रीणि मति
श्रुतावधिज्ञानानि मतिश्रुतमनःपर्ययज्ञानानि वा चत्वारि मतिश्रुतावधिमनःपर्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इतरे कल्पयंति पृथिव्यप्तेजोवायवः। काठिन्यादिद्रवत्वाद्युष्णत्वादीरणत्वादिगुणाः जा
तिभिन्नाः परमाणवः कार्यस्यारंभकाः। भेदाभेदविपर्यासः। कारणात्कार्यमर्थांत
रभूतमेव च अनर्थांतरभूतमे। च अनर्थांतरभूतमेवेति च परिकल्पना स्वरूपविप
र्यासः रूपादयो निर्विकल्पाः संति न संत्येव वा तदाकारपरिणतं विज्ञानमेव न
तदालंबनं वस्तु बाह्यमिति। एवमन्यानपि परिकल्पनाभेदान् दृष्टेष्टविरुद्धान्मि
थ्यादर्शनोदयात्कल्पयंति तत्र च श्रद्धानमुत्पादयंति। ततस्तन्मत्यज्ञानं श्रुता
ज्ञानं च भवति सम्यग्दर्शनं पुनः। तत्त्वार्थाधिगमे श्रद्धानं जनयति ततस्तन्मतिज्ञा
नं श्रुतज्ञानं अवधिज्ञानं च भवति आह प्रमाणं द्विप्रकारं वर्णितं प्रमाणैकदेशा
श्च नयास्तदनंतरोद्देशभाजो निर्दिष्टव्या इत्यतश्चाह॥ अथ सूत्रं। नैगमसंग्रह ५२
व्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः॥ एतेषां सामान्यविशेषलक्षणं व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानमित्यर्थः। तयोरविशेषेण यदृच्छयोपलब्धेः विपर्ययो भवति कदाचिद्रूपादिविद्य
ते असदविद्यमानमिति कदाचिदसदप्यविद्यमानमपि सदेवेति मिथ्यादर्शनोदयादध्यवस्य
ति यथा पित्तोदयाकुलितबुद्धिः मातरं भार्येति भार्यामपि मातेति मन्यते यदृच्छया
। यदापि मातरं मातेति भार्यामपि भार्येति च मन्यते तदपि न तत्सम्यग्ज्ञानं एवं मत्यादीना
मपि रूपादिषु विपर्ययो वेदितव्यः। तथाहि। कश्चित् मिथ्यादर्शनपरिणामः। आत्म
न्यवस्थितः रूपाद्युपलब्धौ सत्यामपि कारणविपर्यासं भेदाभेदविपर्यासं स्वरूपवि
पर्यासं च जनयति कारणविपर्यासस्तावत् रूपादीनामेकं कारणममूर्तं नित्यमि
ति केचित्कल्पयंति। अपरे पृथिव्यादिजातिभिन्नाः। परमाणवश्चतुस्त्रिद्व्येकगुणाः।
तुल्यजातीयानां कार्याणामारंभकाः इति अन्ये वर्णयंति पृथिव्यादीनि चत्वारि भूत
नि भौतिकधर्माः वर्णरसगंधस्पर्शाः। तेषां समुदायो रूपपरमाणुरष्टक इत्यादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्थसिद्धिः॥ अथ सूत्रं स्वजात्यविरोधेनैकध्यमुपनीयपर्यायानाक्रान्तभेदानविशेषेण
समस्तग्रहणात्संग्रहः॥ सद्द्रव्यंघटइत्यादि सदित्युक्ते सदितिवाग्विज्ञानानुप्रवृ
त्तिलिंगानुमितसत्ताधारभूतानामविशेषेणसर्वेषांसंग्रहः। तथाद्रव्यमित्युक्तेऽपि
द्रवतिगच्छतितांस्तान्पर्यायानित्युपलक्षितानांजीवाजीवतद्भेदप्रभेदानांसंग्रहः।
तथाघटइत्युक्तेऽपिघटबुद्ध्यभिधानानुगमलिंगानुमितसकलार्थसं
ग्रहः। एवंप्रकारोन्योपिसंग्रहनयस्यविषयः॥ अथसूत्रं संग्रहनयाक्षिप्तानामर्था
नांविधिपूर्वकमवहरणंव्यवहारः॥ कोयंविधिः यः संग्रहगृहीतोऽर्थः। तदानुपू
र्व्येणव्यवहारःप्रवर्ततइत्ययंविधिः॥ तद्यथा॥ सर्वसंग्रहेणयत्संगृहीतंत
च्चानपेक्षितविशेषंनालंव्यवहारायेतिव्यवहारनयः। आश्रीयतेयत्सत्तद्द्रव्यंगु ५४
णोवेतिद्रव्येणापिसंग्रहाक्षिप्तेनजीवाजीवविशेषानपेक्षेणनशक्यःसंव्यवहा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कव्यं। सामान्यलक्षणं तावद्वस्तुन्यनेकांतात्मनि अविरोधेन हेत्वर्पणात्। साध्यवि
शेषस्य याथात्म्यप्रापणप्रवणः प्रयोगो नयः। स द्वेधा द्रव्यार्थिकः पर्यायार्थिकः। पर्यायाथ
र्थिकः। पर्यायार्थिकश्चेति। द्रव्यं सामान्यमुत्सर्गः अनुवृत्तिरित्यर्थः। तद्विषयो द्रव्यार्थि
कः। पर्यायो विशेषोऽपवादो व्यावृत्तिरित्यर्थः। तद्विषयः पर्यायार्थिकः। तयोर्भेदा नैग
मादयः। तेषां विशेषलक्षणमुच्यते। अनभिनिर्वृत्तार्थसंकल्पमात्रग्राही नैगमः। कंचि
त्पुरुषं परिगृहीतपरशुं गच्छंतमवलोक्य कश्चित्पृच्छति। किमर्थं भवान् गच्छतीति। स आ
ह प्रस्थमानेतुमिति। नासौ तदा प्रस्थपर्यायः सन्निहितः। तदभिनिर्वृत्तये संकल्पमात्रे प्र
स्थव्यवहारः। तथैधोदकाहरणे व्याप्रियमाणं कश्चित्पृच्छति किं करोति भवानिति
स आह ओदनं पचामीति न तदौदनपर्यायः सन्निहितः। तदर्थे व्यापारे स प्रयुज्यते। ए
वंप्रकारो लोकसंव्यवहारः। अनभिनिर्वृत्तार्थसंकल्पमात्रविषयो नैगमस्य गोचरः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

 र्थस्यान्यार्थेन संबंधाभावात् लोकसमयविरोध इति चेद्विरुध्यतां तत्त्वं मीमांस्यते न भैष-
 ज्यमातुरेछानुवर्त्ति॥ अथ सूत्रं। नानार्थसमभिरोहणात्समभिरूढः। यतो नानार्थ- ।
न् समतीत्यैकमर्थमाभिमुख्येन रूढः॥ गौरित्ययं शब्दो वागादिष्वर्थेषु वर्त्तमानः
पशावभिरूढः। अथवा अर्थगत्यर्थः। शब्दप्रयोगस्तत्रैकस्यार्थस्यैकेन गतार्थत्वात्। पर्याय-
शब्दप्रयोगोऽनर्थकः शब्दभेदश्चेदस्ति अर्थभेदेनाप्यवश्यं भवितव्यमिति नानार्थसमभिरोहणात्स-
मभिरूढः इंदनादिंद्रः शकनाच्छक्रः। पूर्दारणात्पुरंदर इति। एवं सर्वत्र। अथवा य-
त्राभिरूढः। स तत्र समेत्याभिमुख्येनारोहणात्समभिरूढः। यथा क्व भवानास्ते आत्म-
नीति कुतो वस्त्वंतरे वृत्त्यभावात्। यद्यन्यस्यान्यत्र वृत्तिः स्यात्। ज्ञानादीनां चाकाशे
वृत्तिः स्यात्॥ अथ सूत्रं येनात्मना भूतस्तेनैवाध्यवसायतीति॥ एवंभूतः। स्वाभि-
धेयक्रियापरिणतिक्षणे एव स शब्दो युक्तो नान्यदेति यदैवेंदति तदैवेंद्रो नाभिषेचको

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रइतिङ्गीवइत्युपङ्गीवइत्यभितिव्यापवहारः। आश्रीयते ङ्गीवाङ्गीवपि संयुक्तस्य हि
मो नालंकारायेति। एवं कुंभकारादि घटादि स्वव्यवहारेण श्रीयते। परमार्थेन
यस्मात् द्वयोरपि वस्तुनो नास्ति विभागः। ऋजुसूत्रं यत्तितं ऋजुसूत्रं तनोतीति वा ऋ
जुसूत्र अपूर्वापरांस्त्रिकालविषयानतिशय्य वर्तमानकालविषयानादत्ते अतीता
नागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात्। तच्च वर्तमानं समयमात्रं तद्विषयपर्याय
मात्रग्राह्ययं ऋजुसूत्रः। ननु संव्यवहारलोपप्रसंग इति चेन्न अस्य नयस्य विषयमा
त्रप्रदर्शनं क्रियते सर्वनयसमूहसाध्यो हि लोकसंव्यवहारः॥ अथ शब्दं लिंगसं
ख्यासाधनादिव्यभिचारनिवृत्तिपरः शब्दनयः तत्र लिंगव्यभिचारः॥ पुष्यस्तारका
नक्षत्रमिति संख्याव्यभिचारः॥ जलमापोवर्षाः ऋतुराम्रावनमिति साधनव्यभिचारः
। सेनातिष्ठते प्रतिष्ठते विरमत्युपरमतीति। एवं प्रकारं व्यवहारमन्यं न्याय्यमन्यते अना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

भिहितमर्थमनवबुध्यपरेणेदमुपालभ्यतेएतदुक्तंनिरपेक्षेषुतन्त्वादिषुपटादिकार्यंना
स्तीतियत्तुतेनोपदर्शितंतस्यत्वादिकार्यंकिंतर्हिकेवलंतन्त्वादिकार्यमपितन्त्वावयवे
ष्वनिरपेक्षेषुनास्त्येवेत्यस्मत्पक्षसिद्धिरेवअथतन्त्वादिषुपटादिकार्यंशक्त्यपेक्षयास्ती
तिचेन्नयेष्वपिनिरपेक्षेषुबुध्यभिधानरूपेषुकारणवशात्सम्यग्दर्शनहेतुत्वविपरि
णतिसद्भावात्।शक्त्यात्मनास्तित्वमिति।साम्यमेवोपन्यासस्य॥ ज्ञानदर्शनयोस्तत्वं।न
यानांचैवलक्षणं।ज्ञानस्यचप्रमाणत्वं।मध्यायेस्मिन्निरूपितं॥इतितत्वार्थवृत्तौसर्वार्थसि
द्धिसंज्ञायांप्रथमोध्यायःसमाप्तः॥१॥अथसम्यग्दर्शनस्यविषयभावेनोपदिष्टेषुजी २
वादिष्वादावुपन्यस्तस्यजीवस्यकिंस्वतत्त्वमित्युक्तेइदमाह॥औपशमिकक्षायिकौभावौमि
श्रश्चजीवस्यस्वतत्त्वमौदयिकपारिणामिकौच॥१॥आत्मनिकर्मणः ५६
स्वशक्तेःकारणवशादनुद्भूतिरुपशमः।यथाकतकादिद्रव्यसंबंधादंभसिपं

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नस्पर्शकइतिपंचेंद्रियग्राहितत्वेग्राः नस्मितोनप्राप्तिरइति। अथवायनाम्नानायचज्ञा
नेनहृतः परिणतः तेनैवाध्यवसाययतिपंचेंद्रियज्ञानपरिणतः। आत्मैवंद्रियजोऽपि स्त
तिनचानेगभावस्थानयासन्ननेरोतनरसूक्ष्मविषयत्वादेषांक्रमः। इहेहते इत्यकथा
श्रावमेतेतयाहर्तपूर्वीविकल्पमत्याविषयान्तरसंनिरागरूक्तान्यविषयाः इत्यमा
नंतराके: प्रतिमस्किविनिश्चमानाः बहुविकल्पाः ज्ञायंतेतयातेगुणाश्चसमन्वयाप
रमार्थतेश्र:। समग्रगृहीतेतवः पृथगर्थक्रियासाधनसामर्थ्यान्तत्वादस्यहृदयस्थ
श्रायंतिनिवृत्प्रमानः। घटादिसंज्ञानंतितिस्वंतत्सामान्यसमर्थः। तंचाद्विषयमप
पन्यासः। तंचादस्योनिरोधमार्गश्चिकांचिदर्थमात्रानयतितत्रतिद्विकस्मिस्तत्य
कंतेउः चक्रकारणसमर्थः। एकस्मवल्वडः बंधेनसमर्थः। इमेउनर्नयानिरोधस्ताः संतः
श्रकांविदपिसमस्परगोनिमात्रंसाडतांवयंलीतिनेधदोषः। अलिहितामसवबोध्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्त्वार्थसर्वा० योऽनवतिनैवंवृत्तंकं अन्यगुणापेक्षया मिश्रः। इति तृतीयस्वाक्षोपशमः। भवति यश्चाष्टेनडक्त
५७ सोऽलयानुकर्षः। कृतोऽनवतितर्हिस्वायोपशमिकश्चरूपान्मेश्चकर्त्तौयमिश्चेनगोरसावत्
मिश्रश्चरूपाणंमध्येक्रियसेवत्नयापेक्षार्थंलक्षणमाअपशमिकस्वायिकोलायोमिश्रःउ
नरलक्षणस्यापिलवति। औदायिकपारिणामिकालक्षणमद्वलक्षणस्यापिलाघवेस्वयातू।
स्त्रिगसंख्यासंज्ञाः। स्वलक्षसापितिचेन्नोयावतलिंगसंस्थलाधु। स्वन्नावस्वलवंस्वंतवंस्व
वक्षमितिश्रुभावः। तस्योकस्योकस्यास्मिनोयेल्लावाअपशमिकादयस्तेकिंभेदवंतः
उतालेदाइतिसूत्रोभेदवंतः। यथैवंतेदानवंगाभिस्तलभाव॥ अथसूत्रं॥ द्वि
नवाष्टादशैकविंशतित्रिभेदायथाक्रमं॥ द्व्यादीनांसंख्याशब्दानांकृतद्वंद्वानांभेद
शब्देनसहस्वपदार्थेअन्यपदार्थेवावृत्तिर्वेदितव्या। केनगमयति। अष्टादशगुणाएकविंश ५७
तिश्चद्विनवाष्टादशैकविंशतित्रिभेदाः। येवनेदःतेनेदाः। औपशमिकादीनांद्विनवाष्टाद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षयोपशमः। द्रव्यआत्मनिकोनिवृत्तिः। यथास्मिन्नद्रंतमित्तविलाडभोमरसंस्कार्यंक
स्यात्संतालावः। तनयात्मकोमिश्रः यथातस्मिन्नेवांतमिकतकादिद्रव्यसंबंधात्संकस्य
क्षीणः। क्षीणवृत्तिः इत्यादिनिमित्तवशात्कर्मणांफलप्राप्तिरुदयः। इत्यात्मलाभ
हेतुकः परिणामः। उपशमः प्रयोजनमस्येत्यौपशमिकः। एवं क्षायिकः क्षायोपशमिकः
औदयिकः पारिणामिकश्च। तेषु पंचस्वभावात्असाधारणीजीवतत्त्वस्वतत्त्वमिति सुचितं। स
म्यग्दर्शनस्यप्रकरणत्वात्तस्यादित्वात्रिभेदेष्वौपशमिकस्यादावनन्तनइतितस्यादौग्र
हणंक्रियतेतदनंतरंक्षायिकग्रहणंतस्यप्रतियोगित्वात्समार्थत्वादयाइत्वतः। ततो
असंख्येयगुणत्वात्तदनंतरंउत्तरमिश्रग्रहणंतदुभयात्मकत्वात्ततोऽसंख्येयगुण
त्वात्। तेषांसर्वेषांअनंतगुणत्वात्औदयिकपारिणामिकयोर्ग्रहणंअंतेक्रियतेअत्रद्वंद्वनि
र्देशःकर्तव्यः। क्षायिकमिश्रौदयिकपारिणामिकाइतिसत्यामल्पाक्षरत्वान्नचैवं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

पितपाय यदि क्षायिकदानादिलाभकृतमभयदानादि सिद्धेष्वपि तत्प्रसंगः नैष दोषः। श
शरीरनामतीर्थकरनामकर्मोदयाद्यपेक्षत्वात्। तत्कृतदानादेस्तदप्रसंगः कथं तर्हि तेषां
सिद्धेषु वृत्तिः। परमानंदाव्याबाधसुखस्वरूपेणैव तेषां तत्र वृत्तिः। केवलज्ञानस्वरूपेणानंतवी
र्यवृत्तिवत्तयत्रक्षः। क्षायोपशमिको भावोऽष्टादशविकल्पः। तद्भेदनिरूपणार्थमाह।
॥ अथ सूत्रं ॥ ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपंचभेदाः सम्यक्त्वचारित्रसंयमासंय
माश्च ॥ चत्वारश्चत्रयश्चपंचचचतुस्त्रित्रिपंचभेदाः। सम्यक्त्वचारित्रसंयमासंयमाश्च
चत्वारश्चत्रयश्चत्रयश्चपंचच यथाक्रममित्यनुवर्तते। नाभिसंबंधश्चतुरादिभिः। ज्ञानादीनाम
भिसंबध्यते। चत्वारि ज्ञानानि त्रीणि दर्शनानि पंच लब्धय इति सर्वघातिस्पर्द्धकानां
मुदयक्षयात्। तेषामेव सदुपशमाद्देशघातिस्पर्द्धकानामुदये क्षायोपशमिको भा ५९
वो भवति। तत्र ज्ञानादीनां वृत्तिः। स्वावरणांतरायक्षयोपशमात्। वास्मात्स्वआस्य

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्शनदानलाभभोगोपभोगवीर्याणि च॥ चशब्दः सम्यक्त्वचारित्रानुकर्षणार्थः। ज्ञानावरण
स्यात्यंतक्षयात्। केवलज्ञानं क्षायिकं तथा क्षायिकं तथा केवलदर्शनं दानांतराय
स्यात्यंतक्षयादनंतप्राणिगणानुग्रहकरं क्षायिकमभयदानं। लाभांतरायस्याशेष
स्य निरासात् ककवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवः। अन्य
मनुजासाधारणाः परमशुभाः सूक्ष्माः अनंताः प्रतिसमयं पुद्गलाः। संबंधमुपयांति
स क्षायिको लाभः। कृत्स्नस्य भोगांतरायस्य तिरोभावात्। आविर्भूतोतिशयवानन
ंतो भोगः क्षायिकः। यतः। कुसुमवृष्ट्यादयो विशेषाः प्रादुर्भवंति निरवशेषस्योपभो
गांतरायस्य प्रलयात्। प्रादुर्भूतोऽनंत उपभोगक्षायिकः॥ यतः। सिंहासनचामर
छत्रत्रयादयो विभूतयः। वीर्यांतरायस्य कर्मणोऽत्यंतक्षयादाविर्भूतमनंतवी
र्यं क्षायिकं पूर्वोक्तानां सप्तानां प्रकृतीनामत्यंतक्षयात्। क्षायिकं सम्यक्त्वं चारित्रम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपशमादेः प्रथमौपशमिकसम्यक्त्वं अनादिमिथ्यादृष्टेर्भव्यस्य कर्मोदयापादितकालुष्ये सति कुत
स्तदुपशमः काललब्ध्यादिनिमित्तत्वात्। तत्र काललब्धिस्तावत् कर्माविष्टः आत्मा भव्यः का
ले अर्द्धपुद्गलपरिवर्त्तनाख्ये उद्वरिते प्रथमसम्यक्त्वग्रहणस्य योग्यो भवति नाधिके इ
ति। एषैका काललब्धिः। अपरा कर्मस्थितिका काललब्धिः। उत्कृष्टस्थितिकेषु कर्मसु ज
घन्यस्थितिकेषु च प्रथमसम्यक्त्वलाभो न भवति। क्व तर्हि भवति। अन्तःकोटीसागरोपम
स्थितिकेषु कर्मसु बंधमापद्यमानेषु विशुद्धपरिणामवशात्। सत्कर्मसु च ततः संख्ये
यसागरोपमसहस्रोनायामन्तःकोटीकोटीसागरोपमस्थितौ स्थापितेषु प्रथम
सम्यक्त्वमुत्पादयति। आदिशब्देन जातिस्मरणादि परिगृह्यते। सकलमोहनीयस्यो
पशमादौपशमिकं चारित्रं तत्सम्यक्त्वमाख्यातौ द्वावेतावनन्तरसूत्रे उक्तौ चाख्यातौ इत्यर्थः। क्षायि
कोभावो नवविध उद्दिष्टस्तस्य भेदस्वरूपप्रतिपादनार्थमाह॥ अथ सूत्रं॥ ज्ञानद ५८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नैकविंशतित्रिभेदा इति। यथा स्वपदार्थवृत्तिस्तदा औपशमिकादीनां भावानां द्विनवा
ष्टादशैकविंशतित्रयो भेदा इति। अस्ति संबंधं क्रियते अर्थवशाद्विभक्तिपरिणाम
इति। यदान्यपदार्थवृत्तिः तदा निर्दिष्टविभक्तिकानां भावानामिति संबध्यते औपशमिकादयो भा
वाः। द्विनवाष्टादशैकविंशतित्रिभेदा इति यथाक्रमं वचनं यथासंख्यप्रतिपत्त्यर्थं
औपशमिको द्विभेदः। क्षायिको नवभेदः। मिश्रोऽष्टादशभेदः। औदयिक एकविंशत
तिभेदः। पारिणामिकस्त्रिभेद इति। यद्येवमौपशमिकस्य कौ द्वौ भेदावित्यत आह। द
॥ अथ सूत्रं॥ सम्यक्त्वचारित्रे॥ व्याख्यातलक्षणे सम्यक्त्वचारित्रे। औपशमिकत्वं कुत इति चेदु
च्यते चारित्रमोहो द्विविधः कषायवेदनीयो नोकषायवेदनीयश्च
इति। तत्र कषायवेदनीयस्य भेदा अनंतानुबंधिनः क्रोधमानमायालोभाश्चत्वारः॥
दर्शनमोहस्य त्रयो भेदाः। सम्यक्त्वं मिथ्यात्वं सम्यग्मिथ्यात्वमिति आसां सप्तानां प्रकृतीनां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुस्त्र्येकैकैकैकषड्भेदाः॥ यथाक्रममभिसंबंधेनाभिसंबध्यते। गतिश्चतुर्भे-
दा नरकगतिः। तिर्यग्गतिर्मनुष्यगतिर्देवगतिरिति तत्र नरकगतिनामकर्मोद-
यान्नारको भावो भवतीति नरकगतिरौदयिकी एवमितरत्रापि कषायश्चतुर्भेदः
। क्रोधो मानो माया लोभ इति। तत्र क्रोधनिर्वर्तनस्य कर्मण उदयात्क्रोध औदयि-
कः। एवमितरत्रापि लिंगं त्रिभेदं। स्त्रीवेदः। पुंवेदः। नपुंसकवेद इति। स्त्रीवेदक-
र्मण उदयात्स्त्रीवेद औदयिक एवमितरत्रापि मिथ्यादर्शनमेकभेदं। मिथ्याद-
र्शनकर्मण उदयात्तत्त्वार्थाश्रद्धानपरिणामो मिथ्यादर्शनमौदयिकं ज्ञानाव-
रणकर्मण उदयात्। पदार्थानवबोधो भवति तदज्ञानमौदयिकं चारित्रमोह-
स्य सर्वघातिस्पर्धकस्योदयात्। असंयत औदयिकः। कर्मोदयसामान्यापे- ६५
क्षोऽसिद्ध औदयिकः। लेश्या द्विविधाः द्रव्यलेश्या भावलेश्या चेति जीव॰ वंधिकारात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षयदृष्टोमेदेदकमम्यक्त्वं गृह्यते। अनंतानुबंधिकषायचतुष्टयस्य मिथ्यात्वसम्यग्मि
थ्यात्वयोश्चोदयक्षयात् सदुपशमाच्च सम्यक्त्वस्य देशघातिस्पर्द्धकस्योदये तत्त्वार्थ
श्रद्धानं क्षायोपशमिकं सम्यक्त्वं। अनंतानुबंध्यप्रत्याख्यानचतुष्टय [illegible] दयक्षय
त्। सदुपशमाच्च संज्वलनकषायचतुष्टयस्य देशघातिस्पर्द्धकोदये नोकषायन
वकस्य यथासंभवोदये च निवृत्तिपरिणामः क्षायोपशमिकं चारित्रं। अ
नंतानुबंध्यप्रत्याख्यानकषायाष्टकोदयक्षयात् सदुपशमाच्च प्रत्याख्यानक
षायोदये संज्वलनकषायस्य देशघातिस्पर्द्धकोदये नोकषायनवकस्य यथा
संभवोदये च विरताविरतपरिणामः। क्षायोपशमिकः संयमासंयम इत्याख्यायते
यथाकविंगमातिविकलत्वमौदयिकोऽलाभतो दिष्टः। स्मृतः संज्ञाकीर्त्तिनाप्यभि
दस्युधते॥ अथ धर्मः॥ गतिकषायलिंगमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

।नहि परीती अत्वाः। एतेत्रयो भावा जीवस्य पारिणामिकाः। ननु अस्तित्व नित्य
त्वप्रदेशवत्वादयोपि भावाः पारिणामिकाः। संति तेषामपि ग्रहणं कर्तव्यं सत्यमेव क
र्तव्यं च शब्देन समुच्चितत्वात्। एवं च यद्यस्तित्वादयो विरुध्यंते न विरुध्यंते। असाधा
रणा जीवस्य भावाः। पारिणामिकास्तु यः एवास्तित्वादयः। ते तु न जीवाजीवविषय
त्वात्। साधारणा इति। च शब्देन षट्कं गृह्यंते त्रयः। औपशमिकादिभावादिभा
वाः तु पर्याप्तिरमूर्तत्वादात्मनः। कर्मबंधापेक्षास्ति न चामूर्तेकर्मणा बंधो युज्य
ते इति नानेकांतात्ताया मेकांतः। अमूर्तोप्यात्मेति कर्मबंधन पर्यायापेक्षया त
दावेशात्तस्मान्मूर्तः शुद्धस्वरूपापेक्षयामूर्तः। एवं चेत् कर्मबंधवेगादा
रैक्यवेसत्यविवेकः प्राप्नोतीनेष दोषः। बंधं प्रत्यविवेके सत्यपि लक्षणभेदात् ६१
स्वानानात्वमवसीयते। उक्तं च। बंधं पडि एयत्तं लक्खणदो हवदि तस्स णाणत्तं। त

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्यलेश्याइत्यधिकृता भावलेश्या कषायोदयरंजिता योगप्रवृत्तिरिति कृत्वा औदयिकी
त्युच्यते सा द्विविधा। कृष्णलेश्या। नीललेश्या। कापोतलेश्या। तेजोलेश्या। पद्मलेश्या। शु
क्ललेश्या। ननु च उपशांतकषाये क्षीणकषाये सयोगकेवलिनि च शुक्ललेश्यास्तीत्या
गमः। तत्र कषायानुरंजनाभावादौदयिकत्वं नोपपद्यते नैष दोषः। पूर्वभावप्रज्ञा
पननयापेक्षया यासौ योगप्रवृत्तिः। कषायानुरंजिता सैवेत्युपचारादौदयिकीत्युच्य
ते। तदभावादयोगकेवल्यलेश्य इति निश्चीयते। पारिणामिकस्य
त्रिभेद उक्तस्तद्भेदस्वरूपप्रतिपादनार्थमाह॥ अथ सूत्रं॥ जीवभव्याभव्यत्वानि च
॥ जीवत्वं भव्यत्वमभव्यत्वमिति त्रयो भावाः। पारिणामिकाः। अन्यद्रव्यासाधारणाः
आत्मनो वेदितव्याः कुतः पुनरेषां पारिणामिकत्वं कर्मोदयोपशमक्षयक्षयोपशमा
नपेक्षित्वात्। जीवत्वं चैतन्यमित्यर्थः। सम्यग्दर्शनादिभावेन भविष्यतीति भव्यः। अ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

ह्निं तज्ञानमज्ञानपक्षकरणात् स्पृष्टं चं चतुर्विधो ज्ञानोपयोगो व्याख्यातः । इदं तु न कथप-
योगग्रहणाद्विपर्ययोपि गृह्यते । इत्यष्टविधस्तु मतेय घोक्ते नानेनालिलितप-
शिणाम्रनमर्वासमसाधरणेनोपयोगेन यत्तपलक्षिता उपयोगिनः ते द्विविधाः ॥
अथ सूत्रं । संसारिणो मुक्ताश्च ॥ संसरणं संसारः परिवर्त्तनमित्यर्थः । स एषाम-
स्तीति संसारिणः तद्व्यपरिवर्त्तनं । क्षेत्रपरिवर्त्तनं । कालपरिवर्त्तनं । भवपरिवर्त्तनं । भा-
वपरिवर्त्तनं चेति । तत्र द्रव्यपरिवर्त्तनं द्विविधं नोकर्मद्रव्यपरिवर्त्तनं । कर्मद्रव्यप-
रिवर्त्तनं चेति । तत्र नोकर्मद्रव्यपरिवर्त्तनं । नाम त्रै [illegible] णां षण्णां पर्याप्तीनां
योग्या ये पुद्गला एकेन जीवेन एकस्मिन् समये गृहीताः । स्निग्धरूक्षवर्णगंधा-
दिभिस्तीव्रमंदमध्यमभावेन यथावस्थिताः । द्वितीयादिषु समयेषु निर्जीर्णा अ- ६५
गृहीताननंतवारानतीत्य मिश्रकांश्चानंतवारानतीत्य मध्ये गृहीतांश्चानं-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नस्य अमूर्त्तिनाम्नः प्रणयं तोव्हाइ जीवस्येति। यद्येवं तर्हि बलं दनात्तु च्यते ण, स
समीयत इत्यत आह॥ अष्टमसूत्रं॥ उपयोगो लक्षणं॥ उभयनिमित्तवशादुत्पद्यमा
नश्चैतन्यानुविधायी परिणाम उपयोगः। तेन बंधं प्रत्येकत्वे सत्यप्यात्मा लक्ष्यते। सु
वर्णरजतयोर्बंधः। प्रत्येकत्वे सत्यपि वर्णादिभेदवत्तद्भेददर्शनार्थमाह॥ स द्वि
विधोष्टचतुर्भेदः॥ उपयोगो द्विविधः॥ ज्ञानोपयोगो दर्शनोपयोगश्चेति। ज्ञानोपयो
गोष्टभेदः। मतिज्ञानं। श्रुतज्ञानं। अवधिज्ञानं। मनःपर्ययज्ञानं। केवलज्ञानं। म
त्यज्ञानं। श्रुताज्ञानं। विभंगज्ञानं चेति। दर्शनोपयोगः। चतुर्विधः। चक्षुर्दर्शनं।
अचक्षुर्दर्शनं। अवधिदर्शनं। केवलदर्शनं चेति तयोः कथं भेदः। साकारानाकारभेदात्। साकारं ज्ञानं। अनाकारं दर्शनमिति। तच्छद्मस्थेषु क्रमेण वर्त्तते
निरावरणेषु युगपत्। पूर्वकालभाविनोपि दर्शनात् ज्ञानस्य प्राग्रूपन्यासः। अ[illegible]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकः। आत्मनो जन्मक्षेत्रभावमुपनीतो भवति। यावत्क्षेत्रपरिवर्तनं॥ उक्तं च
॥ सव्वंहि लोगखित्ते कमसो तं नत्थि जं न उप्पण्णं। उग्गाहणेण बहुसो। परिभमिदो
खेत्तसंसारे॥ सूत्रं॥ कालपरिवर्तनमुच्यते॥ उत्सर्पिण्याः प्रथमसमये जातः। क
श्चिज्जीवः स्वायुषः परिसमाप्तौ मृतः। स एव पुनः। द्वितीयाया उत्सर्पिण्याः द्विती
यसमये जातः स्वायुषः क्षयान्मृतः। स एव तृतीयाया उत्सर्पिण्यास्तृतीयसमये
जातः। एवमनेन क्रमेण उत्सर्पिणी परिसमाप्ता। तथावसर्पिणी च। एवं जन्म
नैरंतर्यमुक्तं। मरणस्यापि नैरंतर्यं तथैव ग्राह्यं। एतावत्कालपरिवर्तनं उक्तं च॥
उसप्पिणि अवसप्पिणि समयावलियासु निरवसेसासु। जादो मदो य बहुसो। भ
मणेण दु कालसंसारे सूत्रं॥ नरकपरिवर्तनमुच्यते॥ नरकगतौ सर्वजघन्यमायुर्दशव
र्षसहस्राणि तेनायुषा तत्रोत्पन्नः। पुनः परिभ्रम्य तेनायुषा तत्रैव जातः। एवं दशवर्ष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न समरानतीत्यसारेतेनैवप्रकारेण समयेवजीवस्य सोकर्ममलावभासहंते... स्याव
सुघुदितं नोकर्मद्रव्यपरिवर्त्तनं कर्मद्रव्यपरिवर्त्तनं प्रुच्यते। कस्मिन्समये केऽजी
वेन अष्टविधकर्मभावेन गृहीताः। पुद्गलाः समयाधिक्यामावलिकामतीत्य द्वितीया
दिषु समयेषु निर्ज्जीर्णाः। पूर्वोक्तेनैव क्रमेण तावत्तेनैव ... समाजीवस्य कर्म
भावमायांते यावत्तावत्कर्मद्रव्यपरिवर्त्तनं॥ तत्कं च॥ सव्वे वि पुग्गला खलु। कमसो
भुंजिझियायजीवेण। असइ अणंतखुत्तो। पोग्गलपरियट्टसंसारे॥ क्षेत्रपरिवर्त्त
नमुच्यते॥ सूक्ष्मनिगोदजीवोऽपर्याप्तः कः सर्वजघन्यप्रदेशसमस्थितः। लोकस्याष्टम
ध्यप्रदेशान्स्वशरीरमध्ये कृत्वोत्पन्नः। क्षुद्रभवग्रहणं जीवित्वा मृतः। स एव पुनस्ते
नैवावगाहेन द्विरुत्पन्नः। तथा त्रिः तथा चतुरित्येवं यावदंगुलस्यासंख्येयभागप्र
मिताकाशप्रदेशास्तावत्त्वं। तत्रैवोत्पन्नो निव्वागुनरेकैकप्रदेशाधिक्येन सर्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानान्यसंख्येयलोकप्रमितानि भवंति । एवं सर्वजघन्यां स्थितिं सर्वजघन्यं चा-
कषायाध्यवसायस्थानं सर्वजघन्यमेवानुभागबंधस्थानमास्कंदतः । तद्यो-
ग्यं सर्वजघन्यं योगस्थानं भवति । तेषामेव स्थितिकषायानुभवस्थानानां द्वि-
तीयमसंख्येयभागवृद्धियुक्तं योगस्थानं भवति । एवं च तृतीयादिषु चतुःस्थान-
पतितानि श्रेण्यसंख्येयभागप्रमितानि योगस्थानानि भवंति । तथा तामेव स्थितिं
तदेव कषायाध्यवसायस्थानं च प्रतिपद्यमानस्य द्वितीयमनुभवाध्यवसाय-
स्थानं भवति तस्य च । योगस्थानानि पूर्ववद्वेदितव्यानि । एवं तृतीयादिष्वपि
अनुभवाध्यवसाय । स्थानेषु आ असंख्येयलोकपरिसमाप्तेः । एवं तामेव स्थितिमा-
पद्यमानस्य द्वितीयं कषायाध्यवसायस्थानं भवति । तस्याप्यनुभवाध्यवसायस्था- ६४
नानि योगस्थानानि च पूर्ववद्वेदितव्यानि । एवं तृतीयादिष्वपि कषायाध्यवसा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदशांगांयावंततः समयाः तावत्कंदू तेते वर्द्धमानः स्तः। पुनरेकैकसमयाधिकक्र
मेण उत्कृष्टत्रिंशत्सागरोपमाणि परिसमापितानि ततः प्रभृत्यादिर्षमितावंतरमुत्कृष्टी
त्ः समुत्पन्नः। पूर्ववत्तेनैव क्रमेण त्रिंशत्सागरोपमाणि तेन परिसमापिता। एवं मनुष्य
गतौ च देवगतौ च नारकवत् अयं तु विशेषः। एकत्रिंशत्सागरोपमाणि परिसमा
पितानि यावत् तावत् नवग्रैवेयकपरिवर्तनं।। उक्तं च।। णिरयादिजहण्णादिसु जाव दुउवरिल्लि
याउ गेवज्जा। मिच्छत्तसंसिदेण दु बहुसोवि भवट्ठिदी भमिदा।। अथ भावपरि
वर्तनमुच्यते।। पंचेंद्रियः संज्ञी पर्याप्तको मिथ्यादृष्टिः कश्चिज्जीवः सर्वजघन्यां
स्वयोग्यां ज्ञानावरणप्रकृतेः। स्थितिं अंतःकोटीकोटिकामापद्यते। तस्य कषायाध्य
वसाय। स्थानानि असंख्येयलोकप्रमितानि षट्स्थानपतितानि ठस्य। स्थितियोग्या
नि भवंति। तत्र सर्वजघन्यकषायाध्यवसायस्थाननिमित्तान्यनुभागाध्यवसाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥१०॥ उक्तात्पंचविधसंसारान्निवृत्ता ये ते मुक्ताः। संसारिणां ग्रहणमादानत्र
कत्वान्मुक्तस्य पदे समस्यपाते संसारिणस्ते द्विविधाः॥ अथ सूत्रं॥ समनस्काम
॥ मनो द्विविधं द्रव्यमनो भावमनश्चेति तत्र पुद्गलविपाकिकर्मोदयापेक्षं द्रव्य
। वीर्यान्तरायनोइंद्रियावरणक्षयोपशमापेक्षात्मनो विशुद्धिर्भावमनः। तेन मन
सा सह वर्तंत इति समनस्काः न विद्यते मनो येषां ते अमनस्काः। एकं मनसा लावालां
संसारिणो द्विविधा भवंतीति समनस्काश्च अमनस्काश्च समनस्कामनस्का इति। अ
भ्यर्हितत्वात्समनस्कशब्दस्य पूर्वनिपातः। कथमभ्यर्हितत्वं गुणदोषविचारकत्वात्
। उत्तरत्र संसारिणां भेदप्रतिपत्त्यर्थमाह॥ अथ सूत्रं॥ संसारिणस्त्रसस्थावराः।
संसारिग्रहणमनर्थकं प्रकृतत्वात्। कथं प्रकृतं संसारिणो मुक्ताश्चेति नानर्थकं प्रा ६५
वीपिकाश्च ये उक्ताः समनस्काः। अमनस्कास्ते संसारिण इति। यदि हि पूर्वस्य वि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सायस्थानेषु अ असंख्येयलोकपरिमाणेः। वृद्धिक्रमो वेदितव्यः। उत्कृष्टाज्जघ
न्यायाः स्थितेः समयाधिककषायादिस्थानानि। पूर्ववदेकसमयाधिकक्रमेण
आउत्कृष्टस्थितेस्त्रिंशत्सागरोपमकोटाकोटीपरिमितायाः। कषायादिस्थाना
नि वेदितव्यानि अनंतभागवृद्धिः। असंख्येयभागवृद्धिः। संख्येयभागवृद्धिः॥
संख्येयगुणवृद्धिः। असंख्येयगुणवृद्धिः। अनंतगुणवृद्धिरिमानि षट् स्थानानि
वृद्धिहानावपि तथैव अनंतभागवृद्धिः। अनंतगुणवृद्धिरहितानि चत्वारि स्थाना
नि वृद्धिहानिरपि रपि तथैव अनंतभागवृद्धिः। अनंतगुणवृद्धिरहितानि चत्वा
रि स्थानानि। एवं सर्वेषां कर्मणां मूलप्रकृतीनां उत्तरप्रकृतीनां च परिवर्त्तनक्र
मो वेदितव्यः तदेतत्सर्वं समुदितं भावपरिवर्त्तनं॥ उक्तं च॥ सव्वापयडिट्ठिदीओ
अणुभागपदेसबंधठाणाणि। मिच्छत्तसंसिदेण य। भमिदा पुण भावसंसारो।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदयः संज्ञा वेदितव्याः। स्थवनादिप्रकृतिनिमित्ता अपि रूढिवशात् स्थवनाद्यनपेक्षा
प्रवर्त्तन्ते। पृथिव्यादीनां चातुर्विध्यमुक्तं प्रत्येकं तत्कथमिति चेदुच्यते। पृथिवी
पृथ्वीकायिकः। पृथिवीजीवश्चेत्यादि। तत्र अचेतना वैस्रसिकपरिणामनिर्वृत्ता काठि
न्यगुणात्मिका पृथिवी। अचेतनत्वादसत्यपि पृथिवीनामकर्मोदये प्र
थनक्रियोपलक्षितैवेयं। अथवा पृथिवीसामान्यं उत्तरत्रयेपि सद्भावात्। कायः शा
रीरं पृथ्वीकायिकजीवपरित्यक्तः पृथिवीकायः मृतमनुष्यादिकायवत्। पृथि
वीकायः अस्यास्तीति पृथिवीकायिकः। तत्कायसंबंधवशीकृत आत्मा। समवाप्तपृथि
वीकायनामकर्मोदयः। कार्मणकाययोगस्थः। यो न तावत् पृथिवीकायत्वेन गृह्णाति
स [illegible] ...। एवमबादिष्वपि योज्यं। तेऽमी चतुर्विधाः प्राणिनः स्थावराः। कति प्रमे
...स्पर्शनेंद्रियं [illegible]। कायबलप्राणा [illegible] निः। [illegible]प्राणाः आ ६६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ममनस्कामनस्क॰ ॰णाः संसारिणस्तु काश्चन त्रसस्थावरस्थामलिसं
ज ॥ सांसारि॰ ॰त्रसस्थावरसंसारिणस्त्रसग्रहणमादौ क्रियमाणमुपयुक्तं नलवतिन्नसूत्रवीर्यं संभवत्
। उत्तरत्र पृथिव्यादीनि संसारिणो द्विविधाः त्रसाः स्थावराश्चेति त्रसनामकर्मोदयव
शीकृतास्त्रसाः । स्थावरनामकर्मोदयवशवर्तिनः । स्थावराः त्रस्यन्तीति त्रसाः ॥
स्थानशीलाः स्थावरा इति चेन्नागमविरोधात् । आगमे हि कायानुवादेन त्रसनाम द्वी
न्द्रियादारभ्य आ अयोगकेवलिन इति तस्मान्न चलनाचलनापेक्षं त्रसस्थावरत्वं कर्मो
दयापेक्षमेव त्रसग्रहणमादौ क्रियते अल्पाच्तरत्वादर्चितत्वाच्च सर्वोपयोग
संभवादर्चितत्वं एकेन्द्रियाणामतिबहुत्वं एकैकस्मिन्नप्यनन्तसंख्यत्वं बहूनि स्थाव
राणां देशप्रतिपत्त्यर्थमाह ॥१२॥ अथ सूत्रं ॥ पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥
स्थावरकर्मनामभेदाः पृथिव्यादयः सन्ति तदुदयनिमित्ताः । जीवेषु पृथि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रि उपयोगसाधनानां इन्द्रियाणां क्रियासाधनानां अनवस्थानात् क्रियासाधनानां अं
गोपांगनामनिर्वर्त्तितानां सर्वेषामपि क्रियासाधनत्वमस्तीति न तेषामेव कर्मेंद्रि
याणि तेषामंतर्भेदप्रदर्शनार्थमाह ॥ अथ सूत्रं ॥ द्विविधानि ॥ विधशब्दः प्रका
रवाची द्वौ विधौ येषां तानि द्विविधानि द्विप्रकाराणीत्यर्थः । कौ पुनस्तौ द्वौ प्रका
रौ द्रव्येंद्रियं भावेंद्रियमिति तत्र द्रव्येंद्रियस्वरूपनिरूपणार्थमाह ॥ अथ सू
त्रं ॥ निर्वृत्त्युपकरणे द्रव्येंद्रियं ॥ निर्वर्त्यत इति निर्वृत्तिः । केन निर्वर्त्यते कर्मणा
सा द्विविधा बाह्याभ्यंतरभेदात् उत्सेधांगुलासंख्येयभागप्रमितानां शुद्धानामात्म
प्रदेशानां प्रतिनियतचक्षुरादींद्रियसंस्थानेनावस्थितानां वृत्तिरभ्यंतरा नि
र्वृत्तिः । तेष्वात्मप्रदेशेष्विंद्रियव्यपदेशभाक्षु यः प्रतिनियतसंस्थानो नामक । ६७
र्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः । सा बाह्या निर्वृत्तिः । येन निर्वृत्ते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यु:णश्चेति। अथ त्रसाः के ते इत्युच्यते॥ अथ सूत्रं॥ द्वीन्द्रियादयस्त्रसाः॥ द्वे इंद्रि
ये यस्यासौ अयं द्वीन्द्रियः। द्वीन्द्रिय आद्यौ येषां ते द्वीन्द्रियादयः। आदिशब्दो व्यवस्थावाची
कथं व्यवस्थिताः। आगमे कथं द्वीन्द्रियः। त्रीन्द्रियश्चतुरेंद्रियश्चेति तद्गुणसंविज्ञान
श्चेनेग्रहणं इंद्रियस्याथांतरालावः कतिचनरेषां प्राणाः। द्वींद्रियस्य तावत् षट् प्रा
णाः स्पर्शिकाः। पंचरसनवाक्प्राणाधिकाः। त्रींद्रियस्य सप्त घ्राणप्राणाधिका
ः। चतुरेंद्रियस्याष्टौ नव चक्षुः प्राणाधिकाः। पंचेंद्रियस्य तिरश्चोऽसंज्ञिनः। न
व तेषां श्रोत्रप्राणाधिकाः। संज्ञिनो दश तावत् मनोबलाधिकाः। आदिशब्देन नि
र्दिष्टानां मनिर्ज्ञातसंख्यानां इयं त्ववधारणं कर्त्तव्यमित्याह॥ अथ सूत्रं॥ पंचें
द्रियाणि॥ इंद्रियसंख्यावधारणार्थः। पंचग्रहणमवधारणार्थं। पंचैव नाधिकसं
ख्यानीति कर्मेन्द्रियाणां वागादीनां ग्रहणं कर्त्तव्यं न कर्त्तव्यं तेषां उपकरणत्वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0:In Public Domain. Digitized by Sarayu Trust/eGangotri

र्यांतरायमतिज्ञानावरणक्षयोपशमांगोपांगनामलाभावष्टंभात्। आत्मना स्पृश्यते
ऽनेनेति स्पर्शनं रस्यतेनेनेति रसनं घ्रायतेनेनेति घ्राणं चक्षेरनेकार्थत्वाद्दर्शनार्थवि
वक्षायां चष्टे अर्थान् पश्यत्यनेनेति चक्षुः श्रूयतेनेनेति श्रोत्रं स्वातंत्र्यविवक्षा च दृ
श्यते इदं मे अक्षि सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोति ततः स्पर्शनादीनां कर्तरि
निष्पत्तिः। स्पृशतीति स्पर्शनं रसतीति रसनं जिघ्रतीति घ्राणं। चष्टे इति चक्षुः। शृणो
तीति श्रोत्रं। एषां निर्देशक्रमः। एकैकवृद्धिक्रमज्ञापनार्थः। तेषामिंद्रियाणां
विषयदर्शनार्थमाह॥ अथ सूत्रं॥ स्पर्शरसगंधवर्णशब्दास्तदर्थाः॥ द्र
व्यपर्याययोः। प्राधान्यविवक्षायां कर्मभावसाधनत्वं स्पर्शादिशब्दानां वेदि
तव्यं द्रव्यप्राधान्यविवक्षायां कर्मनिर्देशः। स्पृश्यत इति स्पर्शः रस्यत इति रसः
गंध्यत इति गंधः वर्ण्यत इति वर्णः। शब्द्यत इति शब्दः। पर्यायप्राधान्यविवक्षा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपकारः। क्रियतेनेनउपकरणंपूर्ववत्। तदपिद्विविधंतत्राभ्यंतरंकृष्णशुक्लमंडलं।
बाह्यमक्षिपत्रपक्ष्मद्वयादि। एवंशेषेष्वपींद्रियेषुज्ञेयं। भावेंद्रियमुच्यते॥ अथसूत्रं॥
लब्ध्युपयोगौभावेंद्रियं॥ लंभनंलब्धिः ज्ञानावरणक्षयोपशमविशेषः यत्सं
निधानादात्माद्रव्येंद्रियनिर्वृत्तिंप्रतिव्याप्रियतेतंनिमित्तआत्मनः। परिणामउपयोगस्त
दुभयंभावेंद्रियंफलमुपयोगः। तस्यकथमिंद्रियत्वंकारणधर्मस्यकार्येदर्शनात्
। यथाघटाकारपरिणतंविज्ञानंघटइति स्वार्थस्यतत्रमुख्यत्वाच्च। इंद्रस्यलिंगमिंद्रि
यमितियः स्वार्थः सउपयोगेमुख्यः उपयोगलक्षणोजीवइतिवचनात्। अतउपयो
गस्येंद्रियत्वंन्याय्यं। उक्तानामिंद्रियाणांसंज्ञानुपूर्वीप्रतिपादनार्थमाह॥ अथसूत्रं॥ स्प
र्शनरसनघ्राणचक्षुःश्रोत्राणि॥ लोकेइंद्रियाणांपारतंत्र्यविवक्षादृश्यते अनेनाक्ष्णा
सुष्टुपश्यामि। अनेनकर्णेनसुष्टुशृणोमीतिततः पारतंत्र्यात्स्पर्शनादीनांकरणत्वं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पृथिव्यादीनां वनस्पत्यंतानां वेदितव्यं तस्योत्पत्तिकारणमुच्यते। वीर्यांतरायस्पर्शनेंद्रि
यावरणक्षयोपशमे सति शेषेंद्रियसर्वघातिस्पर्द्धकोदये शरीरनामलाभाव
ष्टंभे एकेंद्रियजातिनामोदयवशवर्तितायां च सत्यां स्पर्शनमेकमिंद्रियं भवतीति
इतरेषामिंद्रियाणां स्वामित्वप्रदर्शनार्थमाह:॥ अथ सूत्रं॥ कृमिपिपीलिकाभ्रमरमनु
ष्यादीनामेकैकवृद्धानि॥ एकैकमिति वीप्सायां द्वित्वं। एकेनैकेन वृद्धानि स्पर्शनाधि
कारात्। स्पर्शनमादिं कृत्वा। एकैकवृद्धानीत्यभिसंबंधः। क्रियते आदिशब्दः प्रत्ये
कं परिसमाप्यते। कृम्यादीनां स्पर्शनरसनाधिकं पिपीलिकादीनां। स्पर्शनरसनघ्रा
णाधिके भ्रमरादीनां स्पर्शनरसनघ्राणानि चक्षुरधिकानि मनुष्यादीनां [illegible]श्रो
त्राधिकानीति यथासंख्येनाभिसंबंधो व्याख्यातः। तेषां निष्पत्तिः स्पर्शनोत्पत्त्या व्याख्या
ख्याताः। उत्तरोत्तरसर्वघातिस्पर्द्धकोदयेनाप्येवमेतेषु संसारिषु द्वित्रिचतुरिंद्रिय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्थानां वनिर्देशः। स्पर्शनं स्पर्शः। रसनं रसः। गंधनं गंधः। वर्णनं वर्णः। शब्दनं शब्दः। इति ते
षां क्रमः इंद्रियक्रमेणैव व्याख्यातः। अत्राह यत्तावन्मनोऽनवस्थानादिंद्रियं न भवती
ति प्रत्याख्यातं तत्किमुपयोगस्योपकारि उत नेति तदप्युपकार्येव तेन विना इंद्रियाणां
विषयेषु स्वप्रयोजनवृत्त्यभावात्। किमस्य तेषां सहकारित्वमेव प्रयोजनं उतान्यदपी
त्यत आह॥ अथ सूत्रं॥ श्रुतमनिंद्रियस्य॥ श्रुतज्ञानविषयोऽर्थः। श्रुतं। स विषयोऽनिं
द्रियस्य परिप्राप्तश्रुतज्ञानावरणक्षयोपशमस्यात्मनः। श्रुतार्थेऽनिंद्रियालंबन
ज्ञानप्रवृत्तेः। अथवा श्रुतज्ञानं तदनिंद्रियस्यार्थः। प्रयोजनमिति यावत् तत्स्वातंत्र्य
साध्यमिदं प्रयोजनमनिंद्रियस्य उक्तानामिंद्रियाणां प्रतिनियतविषयाणां स्वा
मित्वनिर्देशे कर्तव्ये यत्प्रथमं गृहीतं स्पर्शनं तस्य तावत्स्वामित्वावधारणार्थमा
ह॥ अथ सूत्रं॥ वनस्पत्यंतानामेकं॥ एकं प्रथममित्यर्थः। किं तत्स्पर्शनं तत्केषां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

नस्कमथ्यकथमितिक्रतः इत्युच्यते॥ अथसूत्रं॥ विग्रहगतौकर्मजोगः॥ विग्रहः
। विग्रहार्थागतिर्विग्रहगतिः। अथवाविरुद्धोग्रहोविग्रहः व्याघातः। कर्मा
दानेपिनोकर्मपुद्गलादाननिरोधइत्यर्थः। विग्रहेणगतिः। विग्रहगतिः। सर्वशरी
रप्ररोहणबीजभूतंकार्मणंशरीरंकर्मेत्युच्यते। योगोवाङ्मनसःकायवर्गणा
निमित्तः। आत्मप्रदेशपरिस्पंदः कर्मणाकृतोयोगः कर्मयोगः। विग्रहगतौभ
वतीत्यर्थः। तेनकर्मादानंदेशांतरसंक्रमश्चभवति। अथजीवपुद्गलानांगतिप्र
स्कंदतांदेशांतरसंक्रमः। किमाकाशप्रदेशक्रमवृत्त्याभवतिउतविशेषोस्तीत
आह॥ अथसूत्रं॥ अनुश्रेणिगतिः॥ लोकमध्यमादारभ्यऊर्द्धमधस्तिर्यक्चआका
शप्रदेशानांक्रमसंनिविष्टानांपंक्तिः। श्रेणिरित्युच्यते। अनुशब्दस्यानुपूर्व्येणवृत्तिः
श्रेणेरनुश्रेणीतिजीवानांपुद्गलानांचगतिर्भवतीत्यर्थः। अनधिकृतानांपुद्गला ५०

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेद्वात्पंचविधेषुयेपंचेंद्रियाः। तद्भेदस्यानुक्तस्यप्रतिपादनार्थमाह॥ अथसूत्रं॥ सं
ज्ञिनःसमनस्काः॥ मनोव्याख्यातंसहतेनयेवर्त्तंतेसमनस्काःसंज्ञिनः। उच्यंतेपा
रिशेष्यादितरेसंसारिणःप्राणिनस्ताः। असंज्ञिनइतिसिद्धं। ननुचसंज्ञिनइत्यनेनैवग
तार्थत्वात्समनस्काइति। विशेषणमनर्थकं। यतोमनोव्यापारोहिताहितप्राप्तिपरिहार
परीक्षासंज्ञापिसैवेति। नैतद्युक्तंसंज्ञाशब्दार्थव्यभिचारात्संज्ञानामेत्युच्यते। तद्वंतःसंज्ञि
नइतिसर्वेषामतिप्रसंगः। संज्ञानंसंज्ञासंज्ञानमितिचेत्सर्वेषांप्राणिनांज्ञानात्मक
त्वादतिप्रसंगः। आहारादिविषयाभिलाषः। संज्ञेतिचेत्तुल्यं। तस्मात्समनस्काइत्युच्यते
। एवंचकृत्वागर्भांडजमूर्च्छितसुषुप्ताद्यवस्थासुहिताहितपरीक्षाभावेपिमनः। सन्नि
धानात्। संज्ञित्वमुपपन्नंभवति। यदिहिताहितादिविषयपरिस्पंदः। प्राणिनां
मनःप्रणिधानपूर्वकः। अथाभिनवशरीरग्रहणंप्रत्यागमस्यवि ; र्भपूर्वमूर्त्तेःनिर्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

णिगतिरित्यनेनैव श्रेण्यंतरसंक्रमाभावो व्याख्यातः।नार्थोनेन पूर्वसूत्रे विश्रेणिगति
रपि क्वचिदस्तीति ज्ञापनार्थमिदं वचनं ननु तर्हि बद्धस्य कालनियमः।तत्कालनातस्व
सिद्धः।यद्यमुक्तस्यात्मनो द्रव्यं धर्मे गतिरालोकांतादवधृतकालापत्तिज्ञायते स
देहस्य प्रतिपत्तिः।किंप्रतिबंधनीत्युक्ते तत्कालमवधिरिदं प्राह॥ अथ सूत्रं॥ विग्र
हवती च संसारिणः प्राक्चतुर्भ्यः॥ कालावधारणार्थं प्राक्चतुर्भ्य इत्युच्यते।प्राग्
इति वचनं मर्यादार्थं चतुर्थी समयात्।प्राग्विग्रहवती गतिर्भवति न चतुर्थे इति का
रणं इति चेत्।सर्वोत्कृष्टविग्रहनिमित्तनिष्कुटक्षेत्रे उत्पादनिमित्तां त्रिवक्रां गतिं प्रा
णी निष्कुटक्षेत्रं ततः प्राप्नोति।इषुगत्या नोचनिष्कुटक्षेत्रे उत्पादनिमित्तां त्रि
विग्रहां गतिमारभते तेनाद्वितीयाविक्षेपत्वात्क्षेत्राणामभावात्।चतुर्थः समयस्य चाया
र्थः।विग्रहवती चाविग्रहा चेति विग्रहवत्या आगतेः।कालेनावधृतः अविग्रहायाः

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नां कथं ग्रहणमिति चेत् गतिग्रहणान्नास्थितिर्जीवानामेव गतिरिष्यस्यात्। गतिग्रहणमनर्थ-
कमधिकारात्तत्सिद्धेः। उत्तरत्र जीवग्रहणाच्च इह पुद्गलसंप्रत्ययः। ननु चंद्रादीनां ज्योति-
ष्कांमेरुप्रदक्षिणाकाले विद्याधरादीनां च विश्रेणिगतिर्दृश्यते। तत्र किमुच्यते अनु-
श्रेणिगतिरिति कालदेशनियमोत्र वेदितव्यः। तत्र कालनियमस्तावज्जीवानां मरणका-
ले भवांतरसंक्रमे मुक्तानां चोर्ध्वगमनकाले अनुश्रेण्येव गतिः देशनियमोपि ऊर्ध्वलो-
कादधोगतिः। अधोलोकादूर्ध्वगति। तिर्यग्लोकादधोगतिरूर्ध्वा वा। तत्रानुश्रेण्येव।
पुद्गलानां च या लोकांतप्रापिणी सा नियमादनुश्रेण्येव इतरा गतिर्भजनीया। पुनरपि
गतिविशेषप्रतिपत्त्यर्थमाह॥ अविग्रहा जीवस्य॥ विग्रहो व्याघातः। कौटिल्यमित्यर्थ-
ः। स यस्यां न विद्यते असावविग्रहा गतिः। कस्य जीवस्य कीदृशस्य मुक्तस्य कथं ग-
म्यते मुक्तस्येति उत्तरसूत्रे संसारिग्रहणादिह मुक्तस्येति विज्ञायते ननु च अनुश्रे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थवृत्तिः ७२

शुक्रार्द्धमध्यस्थितंर्धकंटदद्रव्यसमंततो मूर्छनं सम्मूर्छनं अवयवप्रकल्पनं । स्त्रिया उदरे शु
क्रशोणितयोरितरेतरं गरणं मिश्रणं गर्भः । मातुरुपभुक्ताहारगरणाद्वा गर्भः । उप
पद्यते अस्मिन्निति उपपादः । देवनारकोत्पत्तिस्थानविशेषसंज्ञा । एते त्रयः सं
सारिणां जीवानां जन्मप्रकाराः । शुभाशुभपरिणामनिमित्तकर्मोदयविपा
ककृताः । अथाधिष्ठानस्य संसारिविषयोपलोगोपलब्ध्यधिष्ठानप्रवणस्य जन्म
नो योनिविकल्पोपक्रमा इत्यत आह ॥ ३२ ॥ अथ सूत्रं ॥ सचित्तशीतसंवृताः से
तरा मिश्राश्चैकशस्तद्योनयः ॥ आत्मनश्चैतन्यविशेषपरिणामः । चित्तं सह चि
त्तेन वर्तते इति सचित्तः । शीत इति स्पर्शविशेषः । शुक्लादिवदुभयवचनत्वात्
। तद्युक्तं द्रव्यमप्याद्दसमूहतः । संवृत इति दुरुपलक्ष्यः । प्रदेशः सचित्तादीनि इतरैः ७२
र्वर्तन्त इति सेतराः । सप्रतिपक्षा इत्यर्थः । केषु त्रिषु इतरे अचित्ताशीतविवृताः । तत्र

क्रियानुकालइत्याशंक्यते॥ अथ सूत्रं॥ एकसमयाविग्रहा॥ एकः समयोस्याः एकसम
योस्याः एकसमयानविग्रहोस्याः अविग्रहागतिर्मुक्तोर्द्धजीवपुद्गलानां अव्याघातेनै
कसमयिकी गतिरालोकांतादपीति अनादिकर्म्मसंबंधसंततो मिथ्यादर्शनादि।
प्रत्ययवशात्कर्म्माण्याददानो विग्रहगतावप्याहारकः। प्रसक्तेसतिनियमार्थ
मिदमुच्यते॥ अथ सूत्रं॥ एकंद्वौत्रीन्वानाहारकः॥ अधिकारात्समयानिति संबंधः
।वाशब्दोविकल्पश्चयथेष्टमतिसर्गः। एकंवाद्वौवात्रीन्वासमयानुप्राप्तानाहारको
भवतीत्यर्थः। त्रयाणांशरीराणांषण्णांपर्याप्तीनांयोग्यपुद्गलग्रहणमाहारः। तदभा
वादनाहारकः। कर्म्मादानंहिनिरंतरंकार्म्मणशरीरसद्भावेउपपादक्षेत्रंप्रतिऋ
ज्व्यांगतौआहारकइतरेषुत्रिषुसमयेषुअनाहारकः। एवंगच्छतोनवमूर्त्यंतरनिर्वृ
त्तिप्रकारप्रतिपादनार्थमाह॥ अथ सूत्रं॥ सम्मूर्छनगर्भोपपादाजन्म॥ त्रिषुलोके

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदात्मनाचित्तस्तामिश्रणात। मिश्रयोनिः। चशब्दोनज्ञायते एकशो योनयः। के।
चित्सचित्तयोनयः। अन्योन्याचित्तयोनयः। अपरे मिश्रयोनयः। सचित्तयोनयः। सा
धारणशरीराः कुतः परस्पराश्रयत्वात्। इतरे अचित्तयोनयो मिश्रयोनयश्च
शीतोष्णयोनयो देवनारकाः। तेषां हि उपपादस्थानानि कानिचिच्छीतानि कानि
चिदुष्णानीति उष्णयोनयः। तेजस्कायिका इतरे त्रिविकल्पयोनयः। केचिच्छी
तयोनयः। केचिदुष्णयोनयः। अपरे मिश्रयोनयः। इतरे देवनारकैकेंद्रियाः
संवृतयोनयः। विकलेंद्रियाविवृतयोनयः। विकलेंद्रियाविवृतयोनयः। ग
र्भजामिश्रयोनयः। तद्भेदाश्चतुरशीतिशतसहस्रसंख्या आगमतो वेदित
व्याः॥ उक्तं च॥ णिच्चिदरधादुसत्तय। तरुदसवियलिंदियेसु छच्चेव। सुरन
रयतिरियचउरो। चउदस मणुए सदसहस्सा॥ एवमेतस्मिन्नवयोनिभेदसं ७२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यात्मको मिश्रः सचित्ताचित्तः। शीतोष्णः संवृतविवृत इति च ग्राह्यः समुच्चयार्थः। मि
श्रग्रहणं योनयोर्नवं तदिति इतरग्रहणं च सामान्यविशेषणं स्यात्। एकशः इति
वीप्सार्थः। तस्य ग्रहणं क्रममिश्रप्रतिपत्त्यर्थं यथैवं विज्ञायेत सचित्तश्च शीतश्च
मिश्रश्च संवृतश्च विवृतश्चेति। मैवं विज्ञायि सचित्तश्च शीतश्चेत्यादि। तद्ग्रहणं जन्म
प्रकारं प्रतिनिर्देशार्थं तेषां सम्मूर्छनादीनां योनय इति। ततश्च योनयो वेदि
तव्याः। योनिजन्मनोरविशेष इति चेन्न आधाराधेयभेदात्। तद्भेदः। एते स
चित्तादयो योनय आधाराः आधेया जन्मप्रकाराः। यतः सचित्तादियोन्यधिष्ठा
ने आत्मा सम्मूर्छनादिना जन्मना शरीराहारेन्द्रियादियोग्यान् पुद्गलानुपाद
ते देवनारकाणामचित्ता योनयः। तेषां हि योनिरुपपाददेशपुद्गलप्रचयोऽचित्तः
। गर्भजा मिश्रयोनयः। तेषां हि मातुरुदरे शुक्रशोणितमचित्तं तदात्मना चित्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माधीनत्वयतोनियमश्चोऽद्दष्टयः। जरायुजांडजपोतानामेवगर्भः। गर्भएवजरायुजां-
डजपोतानांदेवनारकाणामेवोपपादः। उपपादएवदेवनारकाणांमेवशे-
षाणामेवसंमूर्छनमेवशेषाणामिति। तेषांपुनःसंसारिणांत्रिविधजन्मनामाहित-
बहुविकल्पनवयोनिभेदानांशुभाशुभनामकर्मविपाकनिर्वर्तितानिबंधा-
फलानुभवनाधिष्ठानानिशरीराणिकानीत्यतआहः॥ अथसूत्रं॥ औदारिक-
वैक्रियकाहारकतैजसकार्मणानिशरीराणि॥ विशिष्टनामकर्मोदयापा-
दितवृत्तीनिशीर्यंतइतिशरीराणि। औदारिकादिप्रकृतिविशेषोदयप्राप्तवृ-
त्तीनिऔदारिकादीनि। उदारंस्थूलं। उदारेभवंउदारंप्रयोजनमस्येतिवाऔ-
दारिकं। अष्टगुणैश्वर्ययोगात्। एकानेकाणुमहच्छरीरविविधकरणंविक्रिया
साप्रयोजनमस्येतिवैक्रियिकं। सूक्ष्मपदार्थनिर्ज्ञानार्थंअसंयमपरिजिही

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्टे त्रिविधे जन्मनि सर्वप्राणिनामनियमेन प्रसक्ते अवधारणार्थमाह॥ अथ
सूत्रं॥ जरायुजांडजपोतानां गर्भः॥ यज्जालवत्प्राणिपरिवरणं विततमांसशो
णितं तज्जरायुः। यन्नखत्वक्सदृशमुपात्तकाठिन्यं शुक्रशोणितपरिवरणं वि
स्तपरिमंडलं तदंडं। यत्किंचित्परिवरणमंतरेण परिपूर्णावयवः। यो
निनिर्गतमात्र एव परिस्पंदादिसामर्थ्योपेतः पोतः। जरायौ जाताः जरायुजा
ः। अंडे जाताः। जरायुजाश्च अंडजाश्च पोताश्च जरायुजांडजपोताः। गर्भयोन
यः। जयमीषां जरायुजांडजपोतानां गर्भो वधार्यते। अथोपपादः केषां भवती
त्यत आह॥ अथ सूत्रं॥ देवनारकाणामुपपादः॥ देवानां नारकाणां चोपपादो
जन्म वेदितव्यं। अथान्येषां किं जन्मेत्यत आह॥ अथ सूत्रं॥ शेषाणां संमूर्छनं॥
गर्भोपपादाभ्यामन्ये शेषाः। तेषां संमूर्छनं जन्मेति नियतेतरयोगानिया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मणास्वसंयोगेननिवृत्त्यर्थमाहाप्राक्तैजसादिति औदारिकादसंख्येयगुणप्रदेशं वै
क्रियिकं वैक्रियिकादसंख्येयगुणप्रदेशमाहारकमिति कोगुणःकारः। पल्योपमा
संख्येयभागः यद्येवं परंपरं महापरिमाणं प्राप्नोति बंधविशेषात्। परिमाणभेदाभावः तू
लनिचयायः। पिंडवत्तत्र उत्तरयोः किं समप्रदेशत्वं नास्ति कश्चिद्विशेष इत्यत
आह॥ अथ सूत्रं॥ अनंतगुणे परे॥ प्रदेशत इत्यनुवर्तते तेनैवमभिसंबंधः क्रिय
ते। आहारकात्तैजसं प्रदेशतोनंतगुणं तैजसात्कार्मणं प्रदेशतोनंतगुणकारः।
अभव्यानामनंतगुणः सिद्धानामनंतभागः। तेचेलनस्यात्समल्पकत्वं। मूर्तिमद्
व्योपचितत्वाच्छरीरसंसारिणो जीवस्याभिलषितगतिनिरोधप्रसंग इति तन्न किंकारणं।
यस्मादुभयेत्युच्यते॥ सूत्रं॥ अप्रतीघाते॥ मूर्तिमतो मूर्त्यंतरेण व्याघातः। समानस्य
नयोरिति अप्रतीघाते सूक्ष्मपरिणामात् अयःपिंडे तेजोनुप्रवेशवत्। तैजसकार्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ंस्या वा प्रमत्तसंयतेन निर्वर्त्यते। यदि स्याहारकाय तेजो निमित्तं तेजोभिवा भवं तत्ते
जसं। कर्मणां कार्यं कार्मणं सर्वेषां कर्मनिमित्तत्वेपि रूढिवशात्। विशिष्टवि
षये वृत्तिरवसेया यथा औदारिकसंज्ञादये कपलब्धिः। तेषुतेषां कस्मान्नतवतीस्याद
॥अथसूत्रं॥ परंपरंसूक्ष्मं॥ परशब्दस्यानेकार्थवृत्तित्वेपि विवक्षातो व्यवस्थार्थ
गतिः। इषसूतानां शरीराणां सूक्ष्मगुणेन वीप्सानिर्देशः क्रियते परंपरमिति औ
दारिकं स्थूलं ततः सूक्ष्मं वैक्रियकं। ततः सूक्ष्मं आहारकं ततः सूक्ष्मं तैजसं
तैजसात्कार्मणं सूक्ष्ममिति यदि परंपरं सूक्ष्मं प्रदेशतोपि न्यूनं परंपरं हीनमि
ति विपरीतप्रतिपत्तिनिवृत्त्यर्थमाह॥ ॥अथसूत्रं॥ प्रदेशतोऽसंख्येयगुणं प्राक्तैज
सात्॥ प्रदिश्यंत इति प्रदेशाः परमाणवः संख्यामतीतः असंख्येयः असंख्येयो गु
णोऽस्य तदिदमसंख्येयगुणं कुतः प्रदेशाः नावगाहतः। परंपरमित्यनुवर्तते आका।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विग्रहरी रइदर्शनार्थमिदमुच्यते॥ सूत्रं॥ तदादीनि भाज्यानि युगपदेकस्मिन्ना-
चतुर्भ्यः॥ तच्छब्दः प्रकृततैजसकार्म्मणप्रतिनिर्देशार्थः। तैजसकार्म्मणे आदि-
र्येषां तानि तदादीनि भाज्यानि विकल्प्यानि आङत: आचतुर्भ्यः युगपदेकस्मि-
न्नः। कस्यचित् द्वे तैजसकार्म्मणे अपरस्य त्रीणि औदारिकतैजसकार्म्मणानि
वैक्रियकतैजसकार्म्मणानि वा अन्यस्य चत्वारि औदारिकाहारक-
तैजसकार्म्मणानीति विभागः। क्रियते पुनरपि तेषां विशेषप्रतिपत्त्यर्थमाह।
॥ सूत्रं॥ निरुपभोगमंत्यं॥ अंते भवमंत्यं किं तत्कार्म्मणं। इंद्रियप्रणालिकया श-
ब्दादीनामुपलब्धिरुपभोगः। तदभावान्निरुपभोगं विग्रहगतौ सत्यामपि इंद्रियल-
ब्धौ द्रव्येंद्रियनिर्वृत्त्यभावात्। शब्दाद्युपभोगाभाव इति चेन्नु तैजसमपि निरुप-
भोगमं तत्कथमिति तैजसं शरीरं योगनिमित्तमपि न भवति ततो ऽस्योपभोगविचा- ५६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नयोभस्त्विवज्रपटलादिषु व्याघातं न तु वैक्रियिकाहारकयोरपि नास्ति प्रतीघातः।
सर्वत्राप्रतीघातोस्त्वत्र विवक्षितः। यथा तैजसकर्म्मणयोरालोकांतात्। सर्वत्र नास्ति
प्रतीघातः न तथा वैक्रियिकाहारकयोः। आह किमेतावानेव विशेषउत कश्चिदन्यो
प्यस्तीत्याह ॥सूत्रं॥ अनादिसंबंधे च॥ चशब्दो विकल्पार्थः। अनादिसंबंधे सादिसं
बंधे चेति कार्यं। कारणापेक्षया संतत्या अनादिसंबंधे विशेषापेक्षया सादिसंबंधे च
बीजवृक्षवत्। यथा औदारिकवैक्रियिकाहारकाणि जीवस्य कादाचित्कानि न तथा तै
जसकार्म्मणे नित्यसंबंधिनी हि ते आसंसारक्षयात्। ते एते तैजसकार्म्मणे किं क
स्यचिदेव भवतः। उताविशेषेण इत्यत आह ॥सूत्रं॥ सर्वस्य॥ सर्वशब्दो निरव
शेषवाची निरवशेषस्य संसारिणो जीवस्य ते द्वे अपि शरीरे भवतः इत्यर्थः। अवि
शेषाभिधानादौदारिकादिभिः। सर्वस्य संसारिणो योगपद्येन संबंधप्रसंगे सं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

।यदुपदिष्टंतस्यस्वरूपनिर्द्धारणार्थंस्वामिनिर्द्देशार्थंचाह॥सूत्रं॥शुभंविशुद्धम
व्याघातिचाहारकंप्रमत्तसंयतस्यैव॥शुभकारणत्वात्शुभव्यपदेशः।शुभकर्मणः
आहारककाययोगस्यकारणत्वात्।शुभमित्युच्यते।अन्नस्यप्राणव्यपदेशवत्
।विशुद्धकार्यत्वाद्विशुद्धव्यपदेशः।विशुद्धस्यपुण्यकर्मणः।असबलस्यनिरव
द्यस्यकार्यत्वात्।विशुद्धमित्युच्यते।तंतूनांकार्पासव्यपदेशवत्।उभयतोव्या
घाताभावादव्याघाति।नह्याहारकशरीरेणान्यस्यव्याघातः।नाप्यन्येनाहारक
स्येतितस्यप्रयोजनसमुच्चयार्थः।चशब्दः।कियतोतच्चकदाचिल्लब्धिविशेषस
द्भावज्ञापनार्थंकदाचित्।सूक्ष्मपदार्थनिर्द्धारणार्थंसंयमपरिपालनार्थंचआ
हारकमितिअनुक्तस्यप्र[illegible]ः।यदाहारकशरीरंनिर्वर्त्तयितुमारभतेत। ७१
दाप्रमत्तोभवतीतिप्रमत्तसंयतस्येत्युच्यते।इष्टतोवधारणार्थमेवकारोयादानं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रे अनधिकारः। यत्तेनंतरोक्तः लक्षणेषु जन्मसु अमूनि सरीराणि प्रादुर्भवमाद्यमानि
न किमविशेषेण लब्धं नित्युत कश्चिदस्ति विशेष इत्यत आह॥ सूत्रं॥ गर्भसंमूर्छनजमा
द्यं॥ सूत्रक्रमापेक्षया आदौ भवमाद्यं औदारिकमित्यर्थः। यद्गर्भजं यच्च संमूर्छनजं
तत्सर्वमौदारिकं द्रष्टव्यं तदनंतरं यन्निर्दिष्टं तत्कस्मिन् जन्मनीत्यत आह॥ सूत्रं॥
औपपादिकं वैक्रियकं॥ उपपादे भवं औपपादिकं तत्सर्वं वैक्रियकं वेदितव्यं। यदौ
पपादिकं वैक्रियकं अनौपपादिकस्य वैक्रियकत्वाभाव इत्यत आह॥ सूत्रं॥
लब्धिप्रत्ययं च॥ चशब्देन वैक्रियकमभिसंबध्यते तपोविशेषादृद्धिप्राप्तिर्लब्धिः
लब्धिः प्रत्ययः कारणमस्य लब्धिप्रत्ययं वैक्रियकं लब्धिप्रत्ययं च भवतीत्यभिसंब
ध्यते किमेतदेव लब्ध्यपेक्षमुतान्यदप्यस्तीत्यत आह॥ सूत्रं॥ तैजसमपि॥ अपिशब्दे
न लब्धिप्रत्ययमभिसंबध्यते तैजसमपि लब्धिप्रत्ययं भवतीति वैक्रियकानांतरं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न देवाः ॥ देवा नपुंसका न भवंति निरतिशयसुखं शुभगतिनामोदयापेक्षं ते देवा अनुभवं-
ति न तेषु नपुंसकानि संति । अथेतरे कियल्लिंगा इत्युक्ते आह ॥ सूत्रं ॥ शेषास्त्रिवे-
दाः ॥ त्रयो वेदाः । येषां ते त्रिवेदाः । के ते वेदाः स्त्रीत्वपुंस्त्वनपुंसकत्वमिति । क-
थं तेषां सिद्धिः । वेद्यत इति वेदः लिंगमित्यर्थः । तद्द्विविधं द्रव्यलिंगं भावलिंगं च ।
द्रव्यलिंगं योनिमेहनादि नामकर्मोदयनिर्वर्तितं नोकषायोदयापादितवृ-
त्ति भावलिंगं स्त्रीवेदोदयात् । स्त्यायत्यस्यां गर्भ इति स्त्री पुंवेदोदयात् । सूते जनयत्य-
पत्यमिति पुमान् । तदुभयशक्तिविकलं नपुंसकं रूढिशब्दाश्चैते रूढिषु च क्रि-
या व्युत्पत्त्यर्थैव यथा गच्छतीति गौरिति इतरथा हि गर्भधारणादिक्रियाप्राधान्ये बा-
लवृद्धानां तिर्यग्मनुष्याणां देवानां कार्म्मणकाययोगस्थानां च तदभावात् । स्त्रीत्वादि-
व्यपदेशो न स्यात् । त एते त्रयो वेदाः । शेषाणां गर्भजानां भवंति ये इह गर्भजन्मयोनि ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्यैवं विज्ञायेत प्रमत्तसंयतस्यैव। आहारकं नान्यस्येति मैवं विज्ञायि प्रमत्तसंयत-
स्याहारकमेवेति मा भूदौदारिकादिनिवृत्तिरिति। एवं येतानि शरीराणि बिभ्र-
तां संसारिणां प्रतिगति किं त्रिलिंगसंनिधानं उत लिंगनियमः कश्चिदस्तीत्यत आ-
ह॥ सूत्रं॥ नारकसम्मूर्छिनो नपुंसकानि॥ नारकाणि वक्ष्यंते नरकेषु भवा नारका
। सम्मूर्छनं सम्मूर्छः। स एषामस्तीति सम्मूर्छिनः। नारकाश्च सम्मूर्छिनश्च नारकसम्मू-
र्छिनः। चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदया-
त् न स्त्रियो न पुमांस इति नपुंसकानि भवंति। नारकसम्मूर्छिनो नपुंसकान्येवेति
नियमः। तत्र हि स्त्रीपुंसविषयमनोज्ञशब्दगंधरूपरसस्पर्शसंबंधनिमित्ता स्व-
ल्पापि सुखमात्रा नास्ति यद्येवमवधार्यते। अर्थादापन्नमेतदुक्तेभ्योऽन्ये संसारि-
णः त्रिलिंगा इति यत्रात्यंतनपुंसकलिंगस्याभावस्तत्प्रतिपादनार्थमाह॥ सूत्रं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यं नियमः इतरेषामनियमः। चरमस्य देहस्योत्कृष्टत्वख्यापनार्थमुत्तमग्रहणं नार्था-
तरविशेषोस्ति चरमदेहा इति वा पाठः॥ इति तत्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां
द्वितीयोध्यायः समाप्तः॥२॥ ॥छ॥ जीवस्य भावलक्षणसाधनविषयस्वरूपभे-
दाश्च। पुनरिदाश्च गतिजन्मयोनिदेहानपवर्त्यायुष्कभेदाश्चाध्यायेस्मिन्निरूपितं
इति संबंधः। भवप्रत्ययोवधिर्देवनारकाणामित्येवमादिषु नारकाः श्रुताः ततः पृच्छा-
ति के ते नारका इति तत्प्रतिपादनार्थं तदधिकरणनिर्देशः क्रियते॥ सूत्रं॥ रत्नश-
र्करावालुकापंकधूमतमोमहातमःप्रभा भूमयो घनांबुवाताकाशप्रतिष्ठाः सप्त-
धोधः॥ रत्नसर्कराच वालुकाच। पंकश्च धूमश्च तमश्च महातमश्च रत्नसर्करावा-
लुकापंकधूमतमोमहातमांसि प्रभाशब्दः प्रत्येकं परिसमाप्यते साहचर्यात्। ताच्छ-
ब्द्यं चित्रादिरत्नप्रभासहचरिताभूमिः रत्नप्रभा शर्कराप्रभासहचरिताभूमिः। शर्कराप्रभा वालुकाप्रभासहच- ७७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सरीरलिंगसंबंधाद्दिष्टविशेषाः।यानि तानि निर्दिष्टानि तैर्देवादयो विचित्रधर्माधर्मवशीकृ
ताः।चतसृषु गतिषु शरीराणि धारयंतस्ते किं यथाकालमुपभुक्तायुषो मूर्त्यंतरा
ण्यास्कंदंति उत अयथाकालमपीत्यत आह॥सूत्रं॥औपपादिकचरमोत्तमदे
हासंख्येयवर्षायुषोऽनपवर्त्यायुषः॥औपपादिका व्याख्याताः।देवनारका इति।
चरमशब्दोंत्यवाची उत्तम उत्कृष्टः।चरमोत्तमदेहो येषां ते चरमोत्तमदेहाः।
परीतसंसारास्तज्जन्मनिर्वाणार्हा इत्यर्थः।असंख्येयमतीतसंख्यानमुपमाप्र
माणेन पल्यादिना गम्यमायुर्येषां त इमे असंख्येयवर्षायुषश्च औपपादिकचर
मोत्तमदेहासंख्येयवर्षायुषः।बाह्यस्योपघातनिमित्तस्य विषशस्त्रादेः।सन्नि
धाने ह्रस्वं भवतीत्यपवर्त्यमायुर्येषां त इमे अपवर्त्यायुषः न अपवर्त्यायुषः
अनपवर्त्यायुषो न ह्येषामौपपादिकानां बाह्यनिमित्तवशादायुरपवर्त्यत इत्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षादिगुणो द्विगुणः तस्मे अधः अत्यंतरामशुभोदये सति अनादिपारिणामिक
शीतोष्णवासनिमित्तजनिताः सुतीव्राः वेदना भवंति नारकाणां प्रथमाद्विती
यातृतीयाचतुर्थीषु उष्णवेदनान्येव नरकाणि पंचम्यामुपरि उष्णवेदने द्वे न
रकशतसहस्रे अधः शीतवेदनानामेकं शतसहस्रे अधः। शीतवेदनानामे
कं शतसहस्रं षष्ठीसप्तम्योः शीतवेदनानामेकं शतसहस्रं षष्ठीसप्तम्योः शी
तवेदनानि वेशुलं परिणामाः इति अशुभतरमेव विक्रियंतीति सुखहेतु स्याद
याम इति दुःखहेतुरेवोत्पादयंति तान्नीलावाः अधो अधो अशुभतरा वेदिति
व्याः। किमेतेषां नारकाणां शीतोष्णजनितमेव दुःखं उतान्यदपि लक्षणी
यत्र आह॥ सूत्रं परस्परोदीरितदुःखाः॥ कथं परस्परोदीरितदुःखाः कथं ना
रकाः भवप्रत्ययेनावधिना मिथ्यादर्शनोदयात् विभंगव्यपदेशभाजाव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः॥ लेश्यादयो व्याख्याताः। अ
शुभतरा इति प्रकर्षनिर्देशः तिर्यग्गतिविषयाशुभलेश्याद्यपेक्षया। अधोधः स्व
गत्यपेक्षया च वेदितव्याः। नित्यशब्द आभीक्ष्ण्यवचनः। नित्यमशुभतराः लेश्या
दयो येषां ते नित्याशुभतरलेश्याः परिणामदेहवेदनाविक्रियाः नारकाः। प्रथ
मद्वितीययोः कापोतलेश्याः तृतीयामुपरिष्टात्कापोता अधो नीला चतुर्थ्यां
नीला पंचम्यामुपरि नीला अधः कृष्णा षष्ठ्यां कृष्णा सप्तम्यां परमकृष्णा स्वायुःप्र
माणावधृताः द्रव्यलेश्या उक्ताः भावलेश्यास्तु अंतर्मुहूर्तपरिवर्तिन्यः परिणा
माः स्पर्शरसगंधवर्णशब्दाः क्षेत्रविशेषनिमित्तवशादतिदुःखहेतवोऽशुभ
तराः देहाश्च तेषां अशुभनामोदयात् अत्यंताशुभतराः विकृताकृतयः हुं
डसंस्थानाः तेषामुत्सेधः प्रथमायां सप्त धनूंषि त्रयो हस्ताः षडंगुलयः अधो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

।एवकेचनेति अवधिप्रदर्शनार्थं प्राक्चतुर्थ्या इति विशेषणं न परितिसृषु पृथिवी
षु संक्लिष्टासुराः बाधन्ते तत्र न अतः परमिति प्रदर्शनार्थं च शब्दः पूर्वोक्तदुःख
हेतुसमुच्चयार्थः। स्कन्नशरीरोरसधायनानिष्टतस्रायस्तंभालिंगनकूटशाल्मल
ल्यारोहणावतरणाद्ययोघनाभिघातवासीक्षुरतक्षणक्षारतप्ततैलावसेचना
द्ययस्कुंभीपाकांबरीषभर्जनवैतरणीमज्जनयंत्रनिष्पीडनादिभिः। नारकाणा
णां दुःखमुत्पादयंति। एवं छेदनभेदनादिभिः। सकलीकृतशरीराणामपि
तेषां न मरणमकाले भवति कुतः। अनपवर्त्यायुष्कत्वात्। यद्येवं तर्हि तदेव तावद्
उच्यतां नारकाणामायुः। परिणाममिश्चयन्त आह॥ सूत्रं॥ तेष्वेकत्रिसप्तदशसप्त
दशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाः सत्वानां परा स्थितिः॥ यथाक्रममित्यनुवर्तते
तेषु नरकेषु भूमिक्रमेण यथासंख्यं एकादयः स्थितयोभिसंबध्यंते तत्ररत्नप्रभा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुरादेवदुःखहेतूनवगम्योत्पन्नदुःखाः प्रत्यासत्तौपरस्परालोकनाच्चप्रज्वलितको
पाग्नयःपूर्वभवानुस्मरणाच्चातितीव्रानुबद्धवैराः। श्वशृगालादिवत्स्वाभिघातेप्र
वर्त्तमानाः। स्वविक्रियाकृतासिवासीपरशुभिंडिमालशक्तितोमरकुंतायोघनादि
भिः आयुधैः स्वकरचरणदशनैश्चछेदनभेदनतक्षणदंशनादिभिः। परस्पर
स्यातितीव्रंदुःखमुत्पादयंति किमेतावानेवदुःखोत्पत्तिकारणउतान्योपिक
श्चिदस्तीत्यतआह॥ सूत्रं संक्लिष्टासुरोदीरितदुःखाश्चप्राक्चतुर्थ्याः॥ देवगति
नामकर्मविकल्पस्यासुरत्वसंवर्त्तनस्यकर्मणउदयादस्यंतिपरानित्यसुराः पू
र्वजन्मनिभावितेनातितीव्रेणसंक्लेशपरिणामेनयदुपार्जितंपापकर्मतस्यो
दयात्। सततंक्लिष्टाःसंक्लिष्टाः। असुराःसंक्लिष्टासुराःसंक्लिष्टाइतिविशेष
णान्नसर्वेअसुराः। नारकाणांदुःखमुत्पादयंतिकिंतर्हि अंबावरीषादयः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खंडो द्वीपः। कालोदः समुद्रः। पुष्करवरो द्वीपः। पुष्करवरः समुद्रः। वारुणीव
रद्वीपः। वारुणीवरः समुद्रः। क्षीरवरसमुद्रः। घृतवरसमुद्रः। घृतवरद्वीपः
ईक्षुवरद्वीपः। ईक्षुवरसमुद्रः। नंदीश्वरवरसमुद्रः। अरुणवरोद्वीपः। अ
अरुणवरसमुद्रः। इत्येवमसंख्येयाः द्वीपसमुद्राः स्वयंभूरमणपर्यंता वे
दितव्याः। अमीषां विष्कंभसंनिवेशसंस्थानविशेषप्रतिपत्त्यर्थमाहः॥ सूत्रं द्विर्द्वि
र्विष्कंभाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः॥ द्विर्द्विरिति वीप्सायां वृत्तिवचनं
विष्कंभद्विगुणत्वव्याप्त्यर्थं आद्यस्य यो विष्कंभः। तद्द्विगुणविष्कंभो लवणजा
लधिस्तद्द्विगुणविष्कंभो द्वितीयो द्वीपः। तद्द्विगुणविष्कंभो द्वितीयो जलधिरिति
द्विर्द्विर्विष्कंभो येषां ते द्विर्द्विर्विष्कंभाः। पूर्वपरिक्षेपवचनं ग्रामनगरादिवत्वि
निवेशो माभिविज्ञायीति वलयाकृतिवचनं चतुरस्रादिसंस्थानांतरनिवृत्त्यर्थं श्वा ८२

Ganesh Varni Digambar Jain Institute, Naria, Varanaṣi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामुत्कृष्टा स्थितिरेकसागरोपमा शर्कराप्रभायां त्रिसागरोपमा वालुकाप्रभा
यां सप्तसागरोपमा पंकप्रभायां दससागरोपमा धूमप्रभायां सप्तदससागरोप
मा तमःप्रभायां द्वाविंशतिसागरोपमा महातमःप्रभायां त्रयस्त्रिंशत्सागरो
पमा इति परा उत्कृष्टा इत्यर्थः। सत्वानामिति वचनं भूमिनिवृत्यर्थः। भूमिषु
सत्वानामियं स्थितिः। न भूमीनामिति नरकः सप्तभूमिविस्तीर्णोधोलोकः। इ
दानीं तिर्यग्लोको वक्तव्यः। कथं पुनस्तिर्यग्लोकः। यतोऽसंख्येयाः स्वयंभूर
मणपर्यंताः। तिर्यक्प्रचयविशेषेणावस्थिताः द्वीपसमुद्राः ततस्तिर्यग्लोक
इति के पुनस्ते तिर्यग्व्यवस्थिता इत्यत आह॥ सूत्रं जंबूद्वीपलवणोदादयः
शुभनामानो द्वीपसमुद्राः॥ जंबूद्वीपादयो द्वीपाः लवणोदादयः समुद्राः या
नि नामानि तन्नामानस्ते तद्यथा। जंबूद्वीपो द्वीपः लवणोदः समुद्रः। धातकी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णि भोगहिमवतोः। त्रयाणां समुद्राणां मध्ये आरोपितचापाकारो भरतवर्षः। विज
यार्द्धेन गंगासिंधुभ्यां च विभक्तः। सषट्खंडः। क्षुद्रहिमवंतमुत्तरेण दक्षिणेन महा
हिमवंतं पूर्वापरसमुद्रयोर्मध्ये हैमवतवर्षो। निषधस्य दक्षिणतः महाहिमवत उत्त
रतः। पूर्वापरसमुद्रयोरंतराले हरिवर्षः। निषधस्योत्तरान्नीलवतो दक्षिणतः। पू
र्वापरसमुद्रयोरंतरे विदेहस्य सन्निवेशो द्रष्टव्यः। नीलवत उत्तरात् रुक्मिणो दक्षि
णात् पूर्वापरसमुद्रयोर्मध्ये रम्यकवर्षः। रुक्मिण उत्तरात् शिखरिणो दक्षिणात् पू
र्वापरसमुद्रयोर्मध्ये सन्निवेशो हैरण्यवतवर्षः। शिखरिण उत्तरतस्त्रयाणां समु
द्राणां मध्ये ऐरावतवर्षः। सविजयार्द्धेन रक्तारक्तोदाभ्यां च विभक्तः षट्खंडः। ष
ट्कुलपर्वताः इत्युक्तं के पुनस्ते कथं वा व्यवस्थिताः इत्यत आह॥ सूत्रं॥ तद्विभाजिनः
पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः॥ ता ८४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्राह। जंबूद्वीपस्य प्रदेशसंस्थानविष्कंभाः वक्तव्यास्तन्मूलत्वादितरविष्कंभादिवि
ज्ञानस्येत्युच्यते॥ सूत्रं तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कंभो जंबूद्वीपः
॥ तेषां मध्ये तन्मध्ये केषां पूर्वोक्तद्वीपसमुद्राणां नाभिरिव नाभिः मध्यं मेरुनाभिर्यस्य
मेरुनाभिः वृत्तः आदित्यमंडलोपमानः शतानां सहस्रं शतसहस्रं योजनानां श
तसहस्रं योजनशतसहस्रं विष्कंभो यस्य सोयं योजनशतसहस्रविष्कंभः। को
सौ जंबूद्वीपः। कथं जंबूवृक्षोपलक्षितत्वात् उत्तरकुरूणां मध्ये जंबूवृक्षः। अना
दिनिधनः पृथ्वीपरिणामः अकृत्रिमः सपरिवारः तदुपलक्षितोयं द्वीपः त
त्र जंबूद्वीपे षड्भिः कुलपर्वतैर्विभक्तानि सप्त क्षेत्राणि कानि तानीत्यत आह॥ सू
त्रं॥ भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि॥ भरताद
यः संज्ञाः अनादिकालप्रवृत्ताः अनिमित्ताः तत्र भरतवर्षः क्व सन्निविष्टो दक्षि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चीनपट्टवर्णः। अर्जुनमयो महाहिमवान् शुक्लः तपनीयमयो निषधः तरुणा
दित्यवर्णः वैडूर्यमयो नीलः मयूरग्रीवाभः रजतमयो रुक्मी शुक्लः हेममयः
शिखरी नीचीनपट्टवर्णः। उक्तपर्वतविशेषणार्थमाह ॥सूत्रं॥ मणिविचित्रपा
र्श्वा उपरि मूले च तुल्यविस्ताराः॥ नानावर्णप्रभादिगुणोपेतैर्मणिभिर्विचित्राणि
पार्श्वानि येषां ते मणिविचित्रपार्श्वाः। अनिष्टसंस्थानस्य निवृत्त्यर्थमुपर्यादिवचनं
क्रियते चकारान्मध्यसमुच्चयार्थः। येषां मूले विस्तारः स उपरि मध्ये च तुल्यस्तेषां
मध्ये तुल्यास्तदानुवर्त्यते॥ सूत्रं पद्ममहापद्मतिगिंछकेसरिमहापुंडरीकपुंडरी-
काह्रदास्तेषामुपरि॥ पद्मः महापद्मः तिगिंछकेसरिमहापुंडरीकइति तेषां
हिमवदादीनामुपरि यथाक्रममेते ह्रदाः वेदितव्याः तत्राद्यस्य संस्थानविशेषप्र ८५
तिपत्त्यर्थमाह॥ प्रथमो योजनसहस्रायामस्तदर्धविष्कंभो ह्रदः॥ प्राक्प्रत्यक्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निक्षेत्राणि विभजंतो तेषंशीलाः स्ववर्षविभाजिनः पूर्वापरायता इति। पूर्वापरकोटि
भ्यां लवणजलधिस्पर्शिन इत्यर्थः। हिमवदादयः अनादिकालप्रवृत्ताः। अनि
मित्तसंज्ञाः। वर्षविभागहेतुत्वात्। वर्षधरपर्वता इत्युच्यंते। तत्र क्व हिमवान् भरत
स्य हैमवतस्य च सीमनि व्यवस्थितः। क्षुद्रहिमवान् योजनशतोच्छ्रायः। हैमवत
स्य हरिवर्षस्य च विभागकरो महाहिमवान् द्वियोजनशतोच्छ्रायः। महाविदेहस्य
दक्षिणतः हरिवर्षस्योत्तरतः। निषधो नाम पर्वतः। चतुर्योजनशतोच्छ्रायः। उत्त
रे त्रयोऽपि पर्वताः। स्ववर्षविभाजिनो व्याख्याताः। तदुच्छ्रायश्च तेषां चत्वारि द्वे एकं च
योजनशतं वेदितव्यं। सर्वेषां पर्वतानामुच्छ्रायस्य चतुर्भागोऽवगाहः। तेषां व
र्णविशेषप्रतिपत्त्यर्थमाह॥ सूत्रं॥ हेमार्जुनतपनीयवैडूर्यरजतहेममयाः॥ त ए
ते हिमवदादयः पर्वता हेमादिमया वेदितव्याः। यथाक्रमं हेममयो हिमवान्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तावद्गाढस्तिगिंछोह्रदः। पुष्कराणि च किंचिद्द्विगुणानि द्विगुणानीत्यभिसंबध्यते तन्नि
वासिनीनां देवीनां देवीनां संज्ञा जीवितपरिवारपरिवरप्रतिपादनार्थमाह
॥सूत्रं॥ तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः
ससामानिकपरिषत्काः॥ तेषु पुष्करेषु कर्णिकामध्यदेशनिवेशिनः शरद्विमलपूर्णचं
द्रद्युतिहराः क्रोशायामाः क्रोशार्धविष्कंभा देशोनक्रोशोत्सेधाः प्रासादास्तेषु नि
वसंतीत्येवंशीलाः तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्मीसंज्ञिका
: तेषु यथाक्रमं वेदितव्याः पल्योपमस्थितय इत्यनेनायुष्यं प्रमाणमुक्तं समा
ने स्थाने भवाः सामानिकाः सामानिकाश्च परिषदश्च सामानिकपरिषदः सह सामा
निकपरिषद्भिर्वर्तंत इति ससामानिकपरिषत्काः तस्य पद्मस्य परिवारपद्मेषु प्र ८६
सादानामुपरि सामानिकाः परिषदश्च वसंति यकालिः सरिद्भिः तानि ह्रदाः आणिय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योजनसहस्रायामः। उदगयाक्पंचयोजनशतविस्तारः वज्रमयतलः। वि
विधमणिकनकविचित्रतटः पद्मनामाह्रदः तस्यावगाहप्रक्षेपार्थमिदमुच्य
ते। दशयोजनावगाहः॥ अवगाहोऽधःप्रवेशो निम्नता दशयोजनान्यवगाहोऽ
स्य दशयोजनावगाहः॥ सूत्र तन्मध्ये योजनपुष्करं॥ योजनप्रमाणं यो
जनं क्रोशायामपत्रत्वात् क्रोशद्वयविष्कंभकर्णिकत्वाच्च योजनायामविष्कं
भं जलतलात् क्रोशद्वयोच्छ्रायनालं तावद्बहलपत्रप्रचयं पुष्करमवगंतव्यं।
इतरेषां ह्रदानां पुष्कराणां च आयामादिनिर्ज्ञापनार्थमाह॥ सूत्रं तद्द्विगुण
द्विगुणाह्रदाः पुष्कराणि च॥ स च त[illegible]योर्द्विगुणास्तद्द्विगुणाः। तद्द्विगु
णाद्विगुणा इति द्वित्वं व्याप्तिज्ञापनार्थं किं तद्द्विगुणा आयामादिना पद्मह्रदस्य
द्विगुणायामविष्कंभावगाहो महापद्मो ह्रदः। तस्य द्विगुणायामविष्कं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थवृत्ति
८७

गिन्यास्ताः अपरगाः पूर्वे नगाः । अपरसमुद्रं गच्छंतीति अपरगाः तत्र पद्मह्रद
पूर्वतोरणद्वारनिर्गता गंगा अपरतोरणद्वारनिर्गता सिंधुः । उदीच्यतो
रणद्वारनिर्गता रोहितास्या । महापद्मह्रदपूर्वतोरणद्वारनिर्ग
ता रोहित् नदी च तोरणद्वारनिर्गता । सीतोदा केसरिह्रदपूर्व तो अपाच्यतो
रणद्वारनिर्गता सीता नदी च तोरणद्वारनिर्गता नरकांता महापुंडरीकह्रदपू
र्वाद्दक्षिणद्वारनिर्गता नारी नदी अतोरणद्वारनिर्गता रूप्यकूला पुंडरीक
ह्रदपूर्वतो अपाच्यतोरणद्वारनिर्गता सुवर्णकूला अपरतोरणद्वारनिर्गता रक्ता
प्रतीच्यतोरणद्वारनिर्गता रक्तोदा नामसंपरिवारश्चतिछादनार्थमाह ॥ सूत्रं ॥ च
तुर्दशनदीसहस्रपरिवृता गंगासिंध्वादयो नद्यः ॥ किमर्थं गंगासिंध्वादिग्रहणं ८७
क्रियते नदीग्रहणार्थं प्रकृतास्ता अपि तेनैव धातोः । नैवं संकुचनं तस्या विधि

विलक्कानितानुवंते॥ सूत्रं॥ गंगासिंधूरोहिद्रोहितास्याहरिद्धरिकांतासीतासीतोदाना
रीनरकांताः सुवर्णरूप्यकूलारक्तारक्तोदास्सरितस्तन्मध्यगाः॥ सरितोनवा
प्यः तांकिमंतरालेतसमीपाइत्यतआहतन्मध्यगाः तेषांक्षेत्राणांमध्यातःमध्येन
गच्छंतीतितन्मध्यगाः॥ एकत्रसर्व्वासांप्रसंगनिवृत्यर्थंदिग्विशेषप्रतिपत्यर्थमाह
॥सूत्रं॥ द्वयोर्द्वयोः पूर्वाः पूर्वगाः॥ द्वयोर्द्वयोः सरितोरेकैकक्षेत्रविषयइति
वाक्यविशेषाभिसंबंधात्। एकत्रसर्व्वासांप्रसंगनिवृत्तिः कृता। पूर्वगाइतिवच
नंदिग्विशेषप्रतिपत्यर्थंतत्रपूर्व्वायाः सरितस्ताः। पूर्वंजलधिंगच्छंतीतिपूर्वगा
: किमपेक्षंपूर्वत्वंसूत्रनिर्देशापेक्षंयद्येवंगंगासिंध्वादयः सप्तपूर्वगाइतिप्रा
प्तंनैषदोषः द्वयोर्द्वयोरित्यभिसंबंधात्। द्वयोःपूर्वापूर्वगाइतिवेदितव्याः। इत
रासांदिग्विभागप्रतिपत्यर्थमाह॥ सूत्रं॥ शेषास्त्वपरगाः॥ द्वयोर्द्वयोर्याअव

कृतेवर्षधरवर्षाः। किं सर्वं तेन स्यादिति दोतादिति श्रुयोत्तरेषां कथमित्यत्र आह
॥सूत्रं॥ उत्तरा दक्षिणतुल्याः॥ उत्तरा ऐरावतादयो नीलांताः। भरतादिभिः द-
क्षिणैस्तुल्याः दृष्टव्याः तनीतस्य सर्वस्यार्थं विशेषो वेदितव्यः। तेन ह्रदपुष्क-
रादीनां तुल्यता योज्या अत्र। उक्तेषु भरतादिषु क्षेत्रेषु मनुष्याणां किं तुल्योनुभ-
वादिः। आहोस्वित् कश्चित् सविशेष इत्युच्यते॥ भरतैरावतयोर्वृद्धिह्रा-
सौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्यां॥ वृद्धिश्च ह्रासश्च वृद्धिह्रासौ कार-
मुत्सर्पिण्यवसर्पिणीभ्यां लीभवतः। कयोः भरतैरावतयोः न तयोः क्षेत्रयोर्वृद्धि-
ह्रासौ स्तः। असंभवात् तत्स्थानां मनुष्याणां वृद्धिह्रासौ भवतः। अथवा अधिकरण-
निर्देशः। भरतैरावतेषु मनुष्याणां वृद्धिह्रासाविति। किंकृतौ वृद्धिह्रासौ अनुभ-
वायुःप्रमाणादिकृतौ अनुभवः। उपभोगः आयुर्जीवितपरिमाणं शरीरोत्सेधः

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्वतवर्तिषु तिष्ठंतीत्येवं वेति अथ गंगादीनामेव ग्रहणार्थं गंगासिंध्वादिग्रहणं क्रियते ग्रहणं नदीग्रहणं द्विगुणाद्यभिसंबंधार्थं गंगा चतुर्दशनदीसहस्रपरिवृता सिंधुरपि। एवमुत्तरा अपि नद्यः प्रतिक्षेत्रं तद्द्विगुणा भवंति आविदेहांतात् तत उत्तरा अर्द्धार्द्धहीनाः उक्तानां क्षेत्राणां विष्कंभप्रतिपत्त्यर्थमाह ॥ सूत्रं ॥ भरतः षड्विंशपंचयोजनशतविस्तारः षट्चैकोनविंशतिभागा योजनस्य ॥ षडधिका विंशतिः षड्विंशतिः षड्विंशतिरधिका येष्वेतानि षड्विंशानि पंचयोजनशतानि विस्तारोऽस्य षड्विंशपंचयोजनशतविस्तारो भरतः किमेतावानेवेत्यत्याह षट्चैकोनविंशतिभागा योजनस्य विस्तारोऽस्येत्यभिसंबध्यते ॥ इतरक्षेत्रविष्कंभविशेषप्रतिपत्त्यर्थमाह ॥ सूत्रं ॥ तद्द्विगुणद्विगुणविस्ताराः वर्षधरवर्षा विदेहांताः ॥ ततो भरतात् द्विगुणो द्विगुणो विस्तारो येषां त इमे तद्द्विगुणविस्ताराः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कमनुष्यसभाः ततः क्रमेण हानौ सत्यां दुःखमा भवति एका सागरोपमकोटीकोटी
द्विचत्वारिंशद्वर्षसहस्रोना तदा मनुष्याः विदेहजनतुल्या भवंति। ततः क्रमेण
हानौ सत्यां दुःखमा भवति। एकविंशतिवर्षसहस्राणि। ततः क्रमेण हानौ सत्यां
दुःखमा भवति। एकविंशतिवर्षसहस्राणि एवमुत्सर्पिण्यपि विपरीतक्रमा वेदित
व्या। अथ तरासु भूमिषु कावस्थेत्यतआह॥ सूत्रं॥ ताभ्यामपरा भूमयोवस्थिताः
ताभ्यां भरतैरावताभ्यां अपरा भूमयः अवस्थिता भवंति नहि तत्रोत्सर्पिण्यव स
र्पिण्यौ स्तः। किं तासु भूमिषु मनुष्याणां आयुः आहोस्विदस्थिता इति विशे
षहत्यतआह॥ सूत्रं॥ एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकु
रवकाः॥ हिमवतेत्रवाः हैमवतकाः इत्येवं वुञि मति मनुष्यलक्षणयोतभवति एवमुत्तरे ८९
योरपि हैमवतकादयः त्रयः एकादयस्त्रयः तत्रयथासंख्यमभिसंबंधः क्रियते ए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्येवमादिभिः वृद्धिह्रासौ मनुष्याणां भवतः। किंहेतुकौः पुनस्तौ कालहेतुकौ
स च कालो द्विविधः उत्सर्पिणी अवसर्पिणी चेति तद्भेदाः प्रत्येकं षट्। अन्वर्थसं
ज्ञे चैते। अनुभवादिभिः उत्सर्पणशीला उत्सर्पिणी तद्विपरीतावसर्पणशीला अवसर्पि
णी। तत्रावसर्पिणी षड्विधा सुखमसुखमा। सुखमा सुखमदुःखमा दुःखमा अति
दुःखमा चेति। उत्सर्पिण्यपि अतिदुःखमाद्या सुखमसुखमांता षड्विधैव भवति। अ
वसर्पिण्याः परिमाणं दशसागरोपमकोटीकोट्यः। उत्सर्पिण्या अपि तावत्य एव। सान
टी कल्प इत्याख्यायते। तत्र सुखमसुखमा चतस्रः सागरोपमकोटीकोट्यः। तदादौ
मनुष्याः उत्तरकुरुमनुष्यतुल्याः। ततः क्रमेण हानौ सत्यां सुखमा भवति तिस्रः
सागरोपमकोटीकोट्यः। तदादौ मनुष्या हरिवर्षमनुष्यसमाः। ततः क्रमेण हानौ
सत्यां सुखमदुःखमा भवति। द्विसागरोपमकोटीकोट्यः। तदादौ मनुष्याः हैमवत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालः सर्वेषु विदेहेषु संख्येयकालाः मनुष्याः ॥ तत्र कालः सुखमदुःखमांतोपम
:सदावस्थितः मनुष्याश्च पंचधनुःशतोत्सेधा नित्याहाराः उत्कृष्टेणैकपूर्वको
टीस्थितिकाः जघन्येनांतर्मुहूर्तायुषः । तस्यास्तिसंबंधेन गाथा भवंति । उच्चसए
दुयरिमाणं । सदरिंसुलुकोडि दससदस्साइं । छप्पन्नं च सहस्सा । बोधव्वा ए
वसकोडीणं । एकोनस्तस्य विष्कंभः पुनः प्रकारांतरेण तत्प्रतिपत्यर्थमाह
॥सूत्रं॥ भरतस्य विष्कंभो जंबूद्वीपस्य नवतिशतभागः ॥ जंबूद्वीपविष्कंभस्य ए
जोजनशतसहस्रस्य नवतिशतभागीकृतस्यैको भागः । भरतस्य विष्कंभः
सषड्वीक्षपरउक्कं जंबूद्वीपं परिवृत्य वेदिकास्थितास्ततः । परो लवणोदः स
मुद्रः द्विजोजनशतसहस्रवलयविष्कंभस्ततः परो धातकीखंडो द्वीपः । चतु
र्जोजनशतसहस्रवलयविष्कंभः । तत्र वर्षादीनां संख्यादिविधिप्रतिपत्यर्थं १०

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कपल्योपमस्थितयो हैमवतकाः द्विपल्योपमस्थितयः हारिवर्षकाः त्रिपल्योप
मस्थितयो दैवकुरुवका इति तत्र पंचसु हैमवतेषु सुखमदुःखमा सदावस्थिताः त
त्र मनुष्याः एकपल्योपमायुषः। द्विधनुःसहस्रोच्छ्रिताः चतुर्थकालाहाराः नीलोत्प
लवर्णाः पंचसु हरिवर्षेषु सुखमासदावस्थिता तत्र मनुष्याः द्विपल्योपमायुषः
चतुश्चापसहस्रोत्सेधाः षष्ठभक्ताहाराः शंखवर्णाः पंचसु देवकुरुषु सुखमासु
खमासुखमासदावस्थिता तत्र मनुष्याः त्रिपल्योपमायुषः षड्धनुःसहस्रोच्छ्रा
याः अष्टमभक्ताहाराः कनकवर्णाः अथोत्तरेषु कावस्थेत्यत आह ॥३०॥ तथोत्त
रा॥ यथा दक्षिणा व्याख्याताः तथैवोत्तरा वेदितव्याः हैरण्यवतकाः हैमवतकैस्तु
ल्याः रम्यकाः हारिवर्षकैस्तुल्याः दैवकुरवकैरौत्तरकुरवकाः। व्याख्या
ताः। अथ विदेहेषु स्थितिषु कास्थितिरित्युच्यते ॥ सूत्रं ॥ विदेहेषु संख्येया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सपरिवारः। तद्योगाद्धातकीषंड इति द्वीपस्य नाम प्रतीतं। तं तत्परिक्षेपी कालोद
धिः परिक्षेपी पुष्करद्वीपः। षोडशयोजनशतसहस्रवलयविष्कंभः। तत्र द्वीपां
भोनिधि विष्कंभ तद्विगुण परिक्षेपिवत्। धातकीषंडवर्षादिद्विगुणविधिप्र
संगे विशेषावधारणार्थमाह॥ पुष्करार्द्धे च॥ किं द्विरित्येवानुवर्तते किमपेक्षा
द्विरावृत्ति जंबूद्वीपभरतहिमवदाद्यपेक्षयैव जंबूद्वीपात् पुष्करार्द्धे भरत
तौ द्वौ हिमवंतौ इत्यादि कुतः व्याख्यानतः। यथा धातकीषंडे हिमवदादीनां वि
ष्कंभः। तथा पुष्करार्द्धे हिमवदादीनां द्विगुण इति व्याख्यायते नामानि तान्येव
इष्वाकारो मंदरौ च पूर्ववत्। यत्र जंबूद्वीपे जंबूवृक्षः। तत्र पुष्करं सपरिवारं त
त एव तस्य द्वीपस्य नाम रूढं पुष्करद्वीप इति। अथ कथं पुष्करार्द्धसंज्ञा मानुषो
त्तरशैलेन विलक्षार्द्धत्वात् पुष्करार्द्धसंज्ञा अत्रापि किमर्थं जंबूद्वीपहिमवदा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माद। द्विर्धातकीखंडे। भरतादीनां द्रव्याणां इहाभ्यावृत्तिर्विवक्षिता तत्र कथं
सुच् अध्याहृतक्रियमाणक्रियाभ्यावृत्तिद्योतनार्थः सुच् द्विस्तावानयं प्रासादो
मीयत इति एवं द्विर्धातकीखंडे भरतादयो मीयंत इति ॥ तद्यथा ॥ इष्वा
काकारपर्वताभ्यां दक्षिणोत्तरायताभ्यां लवणोदकालोदवेदिकास्पृष्टको
टिभ्यां विभक्तो धातकीखंडः पूर्वापर इति तत्र पूर्वस्यापरस्य च मध्ये द्वौ मंदरौ
तयोरुभयतः। भरतादीनि क्षेत्राणि हिमवदादयश्च वर्षधरपर्वताः। एवं द्वौ
भरतौ द्वौ हिमवंतौ इत्येवमादि संख्यानं द्विगुणं वेदितव्यं। जंबूद्वीपहिमवदा
दीनां वर्षधराणां यो विष्कंभः। तद्द्विगुणो धातकीखंडे हिमवदादीनां हिमवदा
दयो वर्षधराश्चक्रारवदवस्थिताः। अरविवरसंस्थानानि क्षेत्राणि जं
बूद्वीपे यत्र जंबूद्वीपे यत्र जंबूवृक्षः स्थितः। तत्र धातकीखंडे धातकीवृक्षः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञाः। कर्मभूमिजाश्चेति तत्रांतरद्वीपाः लवणोदे अष्टासु दिक्षु अष्टौ अंतरे
षु चाष्टौ हिमवच्छिखरिणोरंतयोश्च विजयार्द्धयोरंतेष्वष्टौ तत्र दिक्षु द्वीपाः
वेदिकायाः तिर्यक् पंचयोजनशतानि प्रविश्य भवंति। विदिक्ष्वंतरेषु च द्वीपाः
पंचाशत्पंचयोजनशतेषु गतेषु भवंति शैलांतेषु द्वीपाः षट्सु योजनशतेषु न
भवंति दिक्षु द्वीपाः शतयोजनविस्ताराः। विदिक्ष्वंतरेषु च द्वीपाः तदर्द्धवि
ष्कंभाः। शैलांतेषु पंचविंशतियोजनविस्ताराः। तत्र पूर्वस्यां दिशि एकोरुका
ः। अपरस्यां दिशि लांगूलिनः उत्तरस्यामभाषकाः। दक्षिणस्यां विषाणिनः। शश
कर्णशष्कुलीकर्णकर्णप्रावरणलंबकर्णाः। विदिक्षु अश्वसिंहश्वमहिषव
राहव्याघ्रकाककपिमुखाः अंतरेषु मेघमुखविद्युन्मुखाः शिखरिणः। उभयोर २
ंतयोर्मत्स्यमुखाः हिमवतः उभयोरंतयोः हस्तिमुखादर्शमुखाः। उत्तरविज

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिसंख्यद्विरावृत्तात्पुष्करार्द्धेकथ्यतेपुनः कस्मात्पुष्करार्द्धेकथ्यतेपुनः कृ
त्स्नात्पुष्करद्वीपइत्युच्यते॥ सूत्रं॥ प्राङ्मानुषोत्तरान्मनुष्याः॥ पुष्करद्वी
पबहुमध्यदेशभागीवलयवृत्तोमानुषोत्तरोनामशैलः तस्मात्प्रागेवमनुष्
ष्यानबहिरितिततोनबहिः। पूर्वोक्तक्षेत्रविभागोस्तिनास्मात्परंकदाचिदपिवि
द्याधराऋद्धिप्राप्ताअपिमनुष्यागच्छंति। अन्यत्रोपपादसमुद्घाताभ्यांततोस्यान्व
र्थसंज्ञा एवंजंबूद्वीपादिष्वर्द्धतृतीयेषुद्वीपेषुद्वयोश्चसमुद्रयोः मनुष्याः
वेदितव्याः तेद्विविधाः। सूत्रं॥ आर्याम्लेच्छाश्च॥ गुणैर्गुणवद्भिर्वाअर्यंतइत्या
र्याः। तेद्विविधाः ऋद्धिप्राप्तार्याअनृद्धिप्राप्तार्याश्चेति। अनृद्धिप्राप्तार्याः पंच
विधाः क्षेत्रार्याः कर्मार्याः। चारित्रार्याः दर्शनार्याश्चेति ऋद्धिप्राप्तार्याः सप्त
विधाः। बुद्धिविक्रियातपोबलौषधरसाक्षीणभेदात्। म्लेच्छाद्विविधाअंतरद्वीप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्म्मभूमित्वं शुभाशुभलक्षणस्य कर्म्मणः। अधिष्ठानत्वात् ननु सर्वो लोकस्त्रिविधस्य क
र्म्मणोऽधिष्ठानमेव तत एवं प्रकर्षगतिर्विज्ञास्यते प्रकर्षेण यत्कर्म्मणोऽधि
ष्ठानमिति। तत्राशुभकर्म्मणस्तावत्सप्तमनरकप्रापणस्य भरतादिष्वेवार्जनं शु
भस्य च सर्वार्थसिद्ध्यादिस्थानविशेषप्रापणस्य पुण्यकर्म्मण उपार्जनं तत्रै
व कृष्यादिलक्षणस्य षड्विधस्य कर्म्मणः। पात्रदानादिसहितस्य तत्रैवारंभा
त्। कर्म्मभूमिव्यपदेशो वेदितव्यः। इतरास्तु दशविधकल्पवृक्षकल्पितभोगानु
भवनविषयत्वात्। भोगभूमय इति व्यपदिश्यंते उक्तासु भूमिषु मनुष्याणां स्थिति
परिच्छेदार्थमाह॥ सूत्रं॥ नृस्थिती परावरे त्रिपल्योपमांतर्मुहूर्त्ते॥ त्रीणि पल्योपमा
नि यस्याः सा त्रिपल्योपमा अंतर्गतमुहूर्त्तः। यस्याः सांतर्मुहूर्त्ता यथासंख्येन संबं
धः मनुष्याणां परोत्कृष्टा स्थितिः। त्रिपल्योपमा अपरा जघन्या अंतर्मुहूर्त्ता ९२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यार्द्धस्यांतेनयोरंतरयोगोमुखाः।दक्षिणविजयार्द्धस्यांतेनयोरंतरयोः एकोरुका।
ब्दाहाराः।गुहावासिनः।शष्कुलिकर्णाःफलाहाराःवृक्षवासिनः।सर्वेतेपल्योपमा
युषः।तेचतुर्विंशतिरपिकालोदेपितेनयोक्ताःअष्टचत्वारिंशतम्।एतेद्वीपाःद्वीपा
न्तरद्वीपाःजलतलादेकयोजनोत्सेधाः।तथाकालोदेपिवेदितव्याः।तएतेअंत
रद्वीपजाःम्लेच्छाः।कर्मभूमिजाश्चशकयवनशबरपुलिंदादयःकाःपुन
कर्मभूमयइत्यतआह॥ भ॰ सू॰३॥ भरतैरावतविदेहाःकर्मभूमयोन्यत्रदेवकु
रूत्तरकुरुभ्यः। भरतावता॥ विदेहश्चपंचपंचपंचएताःकर्मभूमयः।इतिव्य
पदिश्यंतेतत्रविदेहग्रहणाद्देवकुरूत्तरकुरुग्रहणेप्रसक्तेतत्प्रतिषेधार्थमाह
अन्यत्रदेवकुरूत्तरकुरुभ्यइति।अन्यत्रशब्दोवर्जनार्थः।देवहैमवतःहरिवंश
रम्यकःहैरण्यवतः।अंतरद्वीपाश्चभोगभूमयः।इतिव्यपदिश्यंते।अथक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

दे। अपकृष्यमाणो यावता कालेन निष्ठितो [illegible] कालः उद्धारपल्योपमाख्यः
। एषामुद्धारपल्यानां दशकोटीकोट्यः। एकमुद्धारसागरोपमं। अर्द्धतृतीयोद्धार
सागरोपमाणां यावंतो रोमच्छेदास्तावंतो द्वीपसमुद्राः। पुनरुद्धारपल्यरोमच्छेदै
र्वर्षशतसमयमात्रच्छिन्नैः पूर्णमद्धापल्यं ततः। समये समये एकैकस्मिन् रोमच्छे
दे अपकृष्यमाणे यावता कालेन निष्ठितं भवति तावान् कालः अद्धापल्योपमाख्यः।
एषामद्धापल्यानां दशकोटीकोट्य एकमद्धासागरोपमं दशसागरोपमकोटीको
ट्यः। एकावसर्पिणी तावत्येवोत्सर्पिणी अनेनाद्धापल्येन नारकतैर्यग्योनानां देव
मनुष्याणां च कर्मस्थितिर्भवस्थितिः अयुःस्थितिः कायस्थितिश्च परिछेत्तव्या उक्तं च संग्रहगा
था। ववहारुद्धारद्धापल्ला तिण्णेव होंति बोधव्वा संखा दीवसमुद्दा कम्मट्ठिदि वण्णिदा
तदिए।१। एषैवैते द्वे उत्कृष्टजघन्ये स्थिती नृणां ते ॥३८॥ तिर्यग्योनिजानां च।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मथो विकल्पः। तत्र पल्यं त्रिविधं व्यवहारपल्यं उद्धारपल्यं अद्धापल्यमिति अन्वर्थसं
एताः। आद्यं व्यवहारपल्यमित्युच्यते। उत्तरपल्यद्वयव्यवहारबीजत्वात् नानेन
किंचित्परिच्छेद्यमस्तीति द्वितीयमुद्धारपल्यं ततः। उद्धृतैर्लोमच्छेदैः द्वीपसमुद्राः
संख्यायंत इति तृतीयमद्धापल्यं अद्धा कालस्थितिरित्यर्थः तत्राद्यस्य प्रमाणं कथ्य
ते। तत्परिच्छेदार्थत्वात्तु नच्छाप्रमाणांगुलपरिमितयोजनविष्कंभायामावगाहानि
त्रीणि पल्यानि कुसूला इत्यर्थः। एकादिसप्तांताहोरात्रजातानिवालाग्राणि तावच्छिन्ना
णि यावद्द्वितीयं कर्त्तरिच्छेदं न प्राप्नुवंति तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतं व्यवहारपल्य
मित्युच्यते ततो वर्षशते वर्षशते गते। एकैकरोमापकर्षणविधिना यावता कालेन
तद्रिक्तं भवेत् तावान्कालो व्यवहारपल्योपमाख्यः। तैरेव रोमच्छेदैः प्रत्येकमसंख्येय
वर्षकोटीसमयमात्रच्छिन्नैः। तत्पूर्णमुद्धारपल्यं ततः समये समये एकैकस्मिन् रोमच्छे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

।रा माादिगुणयोगादिंदंतीतींद्राः आज्ञैश्वर्यवर्जितं यत्स्थानायुर्वी[illegible]रिवारभोगो

६ पभोगादितत्समानं तस्मिन्समाने भवाः सामानिकाः महत्तराः पितृगुरूपाध्याय

तुल्याः। मंत्रिपुरोहितस्थानीयाः। त्रायस्त्रिंशाः त्रयस्त्रिंशदेव त्रायस्त्रिंशाः वय

स्यपीठमर्द्दसदृशाः परिषदि भवाः पारिषदाः आत्मरक्षाः शिरोरक्षोपमाः। अर्थ

चरारक्षिकसमाना लोकपालाः। लोकं पालयंतीति लोकपालाः। पदात्यादी

नि सप्तानीकानि दंडस्थानीयानि प्रकीर्णकाः। पौरजानपदकल्पाः। आभियो

ग्याः दाससमानाः। वाहनादिकर्मणि प्रवृत्ताः। अंत्यवासिस्थानीयाः किल्वि

षिकाः किल्विषं पापमेषामस्तीति किल्विषिकाः एकैकस्य निकायस्य एकशः

।एते इंद्रादयो दशविकल्पाः। चतुर्षु निकायेषु उत्सर्गेण प्रशक्तास्ततोपवा ९६

दार्थमाह॥ त्रायस्त्रिंशलोकपालवर्ज्या व्यंतरज्योतिष्काः॥ व्यंतरेषु ज्यो

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कायानामंत। र्थकल्पप्रतिपादनार्थमाह॥ ३॥ सूत्रं दशाष्टपंचद्वादशविकल्पा
पपन्नपर्यंताः॥ चतुर्णां देवनिकायानां दशादिभिः संख्याशब्दैः यथासंख्यमभि
संबंधो वेदितव्यः। दशविकल्पाः भवनवासिनः। अष्टविकल्पाः व्यंतराः। पंचवि
कल्पा ज्योतिष्काः। द्वादशविकल्पा वैमानिका इति सर्वे वैमानिकानां द्वादशवि
कल्पांतःपातित्वप्रसक्तेः ग्रैवेयकादिनिवृत्त्यर्थं विशेषणमुपादीयते। कल्पोपपन्न
पर्यंता इति। अथ कथं कल्पसंज्ञा। इंद्रादयः प्रकारा दश एतेषु कल्प्यंत इति क
ल्पाः। भवनवासिषु तत्कल्पसंभवेपि रूढिवशात् वैमानिकेष्वेव वर्त्तते कल्प
शब्दः। कल्पेषूपपन्नाः कल्पोपपन्नाः पर्यंता येषां ते कल्पोपपन्नपर्यंताः। पुनर
पि तद्विशेषप्रतिपत्त्यर्थमाह॥ सूत्रं॥ ४॥ इंद्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्ष
लोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः॥ अन्यदेवासाधारणाणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रिसंज्ञोलक्षण इति तद्भेददर्शनार्थमुच्यते ॥ सामायिकछेदोपस्था
पनापरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातमितिचारित्रं ॥ अत्रचो
द्यते दशविधे धर्मेसंयमउक्तः सएवचारित्रमिति पुनर्ग्रहणमनर्थकमि
ति नानर्थकं धर्मेंऽतर्भूतमपिचारित्रमंतेगृह्यते मोक्षप्राप्तेः साक्षा
त्कारणमितिज्ञापनार्थंसामायिकमुक्तं क्वदिग्देशानर्थदंडविरतिसाम
यिकं इत्यत्र तद्द्विविधंनियतकालमनियतकालंचस्वाध्यायादिनियतका
लमीर्यापथाद्यनियतकालंच प्रमादकृतानर्थप्रबंधविलोपेसम्यक्प्रतिक्रिया दि
छेदोपस्थापनाविकल्पनिवृत्तिर्वा परिहरणपरिहारः प्राणिवधान्निवृत्तिःते १०१
नविशिष्टाशुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रं अतिसूक्ष्मकषायत्वात्सू

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वधरोगतृणस्पर्शमलपरीषहाः आहव्याख्यातनिमित्तलक्षणविकल्पाः प्रत्यात्मनिप्रा
दुर्भवंतः कतियुगपदवतिष्ठंते इत्यत्रोच्यते॥ एकादयो भाज्या युगपदेकस्मिन्नै
कोनविंशतेः॥ आङभिविध्यर्थः तेनैकस्यैकोनविंशतिरपि क्वचिद्युगपत्संभवतीत्य
वगम्यते तत्कथमितिचेदुच्यते शीतोष्णपरीषहयोरेकः शय्यानिषद्याचर्या
णांचान्यतमएवभवति एकस्मिन्नात्मनि कुतः विरोधात् ततः त्रयाणामपगमे यु
गपदेकात्मनि इतरेषांसंभवादेकान्नविंशतिविकल्पा बोद्धव्याः ननुप्रज्ञा
ज्ञानयोरपिविरोधाद्युगपदसंभवः श्रुतज्ञानापेक्षयाप्रज्ञापरीषहः अ
वधिज्ञानाद्यभावापेक्षया अज्ञानपरीषहइति नास्तिविरोधः आहउक्ता
गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयाः संवरहेतवः पंचसंवरहेतुश्चा

Ganesh Varni Digambar Jain Institute, Narla, Varanasi

॥सौधर्मैशानसनत्कुमारमाहेंद्रब्रह्मब्रह्मोत्तरलांतवकापिष्टशुक्रमहाशु
क्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विज
यवैजयंतजयंतापराजितेषु सर्वार्थसिद्धौ च॥ कथमेषां सौधर्मादिशब्दानां
कल्पाभिधानं चातुरार्थिकेनाणा स्वभावतो वा कल्पस्याभिधानं भवति अथ क
थमिंद्राभिधानं स्वभावतः साहचर्याद्वा कथमिति चेदुच्यते सुधर्मा नाम सभा
स्मिन्नस्तीति सौधर्मः कल्पः तदस्मिन्नस्तीत्यणा तत्कल्पसाहचर्यात् इंद्रोपि
सौधर्मः ईशानो नामेंद्रः स्वभावतः ईशानस्य निवासः कल्पः ऐशानः तस्य नि
वास इत्यण् तत्साहचर्यादिंद्रोपि ऐशानः सनत्कुमारो नामेंद्रः स्वभावतः तस्य
निवासः इत्यण् सानत्कुमारः कल्पः तत्साहचर्यादिंद्रोपि सानत्कुमारः महें १०१
द्रो नामेंद्रः स्वभावतः तस्य निवासः कल्पो माहेंद्रः तत्साहचर्यादिंद्रोपि मा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथास्यादिति अधिकारः क्रियते विशेषेणात्मस्थान सुकृतिनो मानयंतीति
विमानानि विमानेषु भवा वैमानिकाः। तानि विमानानि त्रिविधानि इंद्रकश्रेणि
पुष्पप्रकीर्णकभेदेन तत्र इंद्रकविमानानि इंद्रवन्मध्येऽवस्थितानि तेषां
चतसृषु दिक्षु आकाशप्रदेशश्रेणिवदवस्थानात्। श्रेणिविमानानि विदि
क्षु पुष्पप्रकीर्णवदवस्थानात् पुष्पप्रकीर्णानि तेषां वैमानिकानां भेदावबोध
नार्थमाह ॥१७॥ कल्पोपपन्नाः कल्पातीताश्च ॥ कल्पेषूपपन्नाः कल्पोपपन्नाः
कल्पानतीताः कल्पातीताश्चेति द्विविधाः वैमानिकाः। तेषामवस्थानविशेषनि
र्ज्ञानार्थमाह। उपर्युपरि ॥१८॥ किमर्थमिदमुच्यते तिर्यगवस्थितिप्रतिषेधार्थमु
च्यते न ज्योतिष्कवत्तिर्यगवस्थिता न व्यंतरवत् समवस्थिता उपर्युपरि इत्यु
च्यते के ते कल्पाः। यद्येवं कियत्सु कल्पविमानेषु ते देवा भवंतीत्यत आह ॥१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

:सुखादिकं परापरा स्थितिलेश्याचतुर्थाध्यायेन निरूपितं ॥ इति तत्त्वार्थवृत्तौ सर्वा
र्थसिद्धिसंज्ञिकायां चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥ छ ॥ तैनमः ॥ इदानीं सम्य
ग्दर्शनस्य विषयस्तत्त्वेनोक्तेषु जीवादिषु जीवपदार्थो व्याख्यातः । अथाजी
वपदार्थविचारप्राप्तः तस्य संज्ञाभेदकीर्तनार्थमिदमुच्यते ॥ अजीवकायाः
धर्माधर्माकाशपुद्गलाः ॥ कायशब्दः शरीरे व्युत्पादितः इहोपचारादध्यारोप्य
ते कुतः इहोपचारादध्यारोप्यते कुत उपचारः यथा शरीरं पुद्गलद्रव्यप्रचया
त्मकं तथा धर्मादिष्वपि प्रदेशप्रचयापेक्षया काया इव काया इति अजीवा
श्च ते कायाश्च अजीवकायाः विशेषणं विशेष्येणेति वृत्तिः ननु च नीलोत्पला
दिषु व्यभिचारे सति विशेषणविशेष्ययोगः इहापि व्यभिचारयोगोऽस्ति अ १०८
जीवशब्दः अकाये कालेऽपि वर्तते कायोऽपि जीवे किमर्थः कायशब्दः प्रदेश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णीत्यभिसंबध्यते। व्यंतराणां तर्हि काऽपरा स्थितिरित्यत आह॥ व्यंतराणां
च॥ चशब्दः प्रकृतसमुच्चयार्थः। तेन व्यंतराणामपरा स्थितिर्दशवर्षसहस्रा
णीत्यवगम्यते। अथैषां परा स्थितिः केत्युच्यते॥ परा पल्योपममधिकं॥ परा
उत्कृष्टा स्थितिर्व्यंतराणां पल्योपममधिकं। इदानीं ज्योतिष्काणां परा स्थिति
र्वक्तव्येत्यत आह॥ ज्योतिष्काणां च॥ चशब्दः प्रकृतसमुच्चयार्थः। तेनैवम
भिसंबंधः। ज्योतिष्काणां परा स्थितिः पल्योपममधिकमिति। अथापरा किय
तीत्यत आह॥ तदष्टभागोऽपरा॥ तस्य पल्योपमस्याष्टभागो ज्योतिष्काणा
मपरा स्थितिरित्यर्थः। अथ लौकांतिकानां विशेषाकानां स्थितिविशेषो नोक्त
: स कियानिति। लौकांतिकानामष्टौ सागरोपमाणि सर्वेषां। अविशिष्टाः
सर्वे ते शुक्ललेश्याः पंचहस्तोत्सेधशरीराः। चतुर्णिकायदेवानां स्थाने से

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लगुणनिर्वर्त्तनाधिकरणं उत्तरगुणनिर्वर्त्तनाधिकरणं चेति। तत्र मूलं पंच
विधं शरीरवाङ्मनःप्राणापानाश्च उत्तरं काष्ठपुस्तचित्रकर्म्मादि। निक्षेपश्च
तुर्भेदः अप्रत्यवेक्षितनिक्षेपाधिकरणं दुःप्रमृष्टनिक्षेपाधिकरणं सह
सानिक्षेपाधिकरणं संयोगो द्विविधः भक्तपानसंयोगाधिकरणं उपकर
णसंयोगाधिकरणं उपकरणसंयोगाधिकरणं चेति निसर्गस्त्रिविधः। का
यनिसर्गाधिकरणं वाङ्निसर्गाधिकरणं चेति उक्तः सामान्येन कर्म्मास्रव
भेदः इदानीं कर्म्मविशेषास्रवभेदो वक्तव्यः तस्मिन्वक्तव्ये आद्ययोर्ज्ञा
नदर्शनावरणयोरास्रवभेदप्रतिपत्त्यर्थमाह॥ तत्प्रदोषनिह्नवमात्सर्यां
तरायासादनोपघातरायादनोपघाता ज्ञानदर्शनावरणयोः॥ तत्र ज्ञान १[illegible]
स्य मोक्षसाधनस्य कीर्त्तने कृते कस्यचिदनभिव्याहरतः अन्तःपैशुन्यपरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्तरशब्दः संख्याः संरब्धंतिचत्वारश्च अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनकषाय
भेदकृतांतर्भेदसमुच्चयार्थः परस्याजीवाधिकरणस्य भेदप्रतिपत्त्यर्थमाह
॥ निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः ॥ परं निर्वर्त्यते इति निर्व
र्तना निष्पादना निक्षिप्यत इति निक्षेपः स्थापना संयुज्यत इति संयोगः मि
श्रीकृतं निसृज्यत इति निसर्गः प्रवर्तनं त एते द्व्यादिभिर्यथाक्रममभिसंबध्यं
ते निर्वर्तना द्विभेदा निक्षेपश्चतुर्भेदः संयोगो द्विभेदः निसर्गस्त्रिभेद इति
त एते भेदा अजीवाधिकरणस्य वेदितव्याः परवचनमनर्थकं पूर्वसूत्रे आद्यमि
ति वचनादिदमवशिष्टार्थं भवतीति नानर्थकम् अन्यार्थः परशब्दः संरंभादि
भ्योऽन्यानि निर्वर्तनादीनि इतरथा हि निर्वर्तनादीनाम् आत्मपरिणामसद्भावात्
जीवाधिकरणविकल्प एवेति विज्ञायेत निर्वर्तनाधिकरणं द्विविधं मूल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धनेषु पदेषु प्रदोषादयो योज्याः निमित्तत्वात् । एतेज्ञा… …ज्ञानेनम
रास्रवहेतवः । एककारणसाध्यस्यकार्यस्यानेकस्यदर्शनावरणस्रवसि
द्धिः । अथवाविषयभेदात् आस्रवभेदः ज्ञानविषयाः प्रदोषादयोज्ञाना
वरणस्यदर्शनविषयाः प्रदोषादयोदर्शनावरणस्येति । यथानयोः क
र्मप्रकृत्योरास्रवभेदास्तथा ॥ दुःखशोकतापाक्रंदनवधपरिदेवना
न्यात्मपरोभयस्थान्यसद्वेद्यस्य ॥ पीडालक्षणः परिणामोदुःखं । अनुग्रा
हकसंबंधविच्छेदेवैक्लव्यविशेषः शोकः परिवादादिनिमित्तादाविलां
तःकरणस्यतीव्रानुशयस्तापः । परितापजाश्रुपातप्रचुरविलापादि ।
लिंगाभिव्यक्तंक्रंदनं आक्रंदनं आयुरिंद्रियबलप्राणवियोगकरणंवधः ।
संक्लेशपरिणामावलंबनंस्वपरानुग्रहाभिलाषविषयमनुकंपा १०५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऽतेकस्यचिदनभिव्याहरतः अंतः पैशुन्यपरिणामः प्रदोषः कुतश्चित्कार
णान्नास्तिनवेद्मीत्यादिज्ञानस्यव्यपनंनिन्हवः कुतश्चित्कारणाद्भावि
तमपिविज्ञानंदानार्हमपियतोनदीयतेतन्मात्सर्यंज्ञानव्यवच्छेदकरण
मंतरायः कायेनवाचाचपरप्रकाश्यज्ञानस्यवर्जनंआसादनंप्रशस्त
ज्ञानदूषणंउपघातः आसादनमेवेतिचेत्नमतोज्ञानस्यविनयप्रदाना
दिगुणकीर्त्तनानुष्ठानमासादनंउपघातस्तुज्ञानमज्ञानमेवेति प
ज्ञाननाशाभिप्रायइत्यनयोरयंभेदः तत्प्रदोषेनज्ञानदर्शनयोः प्रतिनि
र्दिष्टः क्रियतेकथंतयोः प्रकृतयोः अनिर्दिष्टयोः तत्प्रदोषेनपरामर्शः क
र्तुंशक्यः प्रश्नापेक्षयाज्ञानदर्शनावरणयोः कथमास्रवइतिप्रश्नेकृतेप
तदपेक्षयातत्प्रदोषेः ज्ञानदर्शनयोः प्रतिनिर्दिश्यतीति तच्छब्देनज्ञानदर्शनवस्तमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षदोः अंतरंगक्रोधाद्यावेशापूर्वकाणि दुःखादीनि असद्वेद्यास्रवनिमित्ता॥
नीति विशेष्योक्तत्वात् यथा कस्यचिद्भिषजः परमकरुणाशयस्य निःशल्यस्य
संयतस्योपरि गंडं पाटयतः दुःखहेतुत्वे सत्यपि न पापबंधो बाह्यनिमित्तमा
त्रादेव भवति एवं संसारविषयमहादुःखादुद्विग्नस्य भिक्षोः तन्निवृत्त्युपा
यं प्रति समाहितमनस्कस्य शास्त्रविहिते कर्मणि प्रवर्त्तमानस्य संक्लेशप
रिणामाभावात् दुःखनिमित्तत्वे सत्यपि न पापबंधः॥ उक्तं च॥ दुःखं न सु
खं यद्वद्धेतुर्दृष्टः। चिकित्सिते चिकित्सायां तु युक्तस्य स्यात् दुःखमथवा
सुखं। न दुःखं न सुखं तद्वद्धेतुर्मोक्षस्य साधने मोक्षोपाये तु युक्तस्य स्या
त् दुःखमथवा सुखं। उक्ताः असद्वेद्यास्रवहेतवः सद्वेद्यस्य पुनः के इ १[illegible]२
त्यत आह॥ भूतव्रत्यनुकंपादानसरागसंयमादियोगः। क्षांतिः शौच।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रवृत्तंपरिदेवनंनन्तुचशोकादीनांदुःखविशेषत्वात्दुःखग्रहणमेवास्त्व
सत्यमेवंतथापिकतिपयविशेषप्रतिपादनेनदुःखजात्यनुविधानं
क्रियतेयथागौरित्युक्तेअनिर्ज्ञातेविशेषेतत्प्रतिपादनार्थंखंडमुंड
कृष्णशुक्लाद्युपादानंक्रियते तथादुःखविषयाअसंख्येयलोकभेदसं
भवात्दुःखमित्युक्तेविशेषानिर्ज्ञानात् कतिपयविशेषनिर्देशेनतद्विवे
कप्रतिपत्तिःक्रियतेतानिएतानिदुःखादीनिक्रोधाद्यावेशवशात् आ
त्मस्थानिपरत्रचेतिपरस्थानितदुभयस्थानिचएतानिसर्वाणिअसद्वेद्या
स्रवकारणानिवेदितव्यानिअत्रचोद्यतेयदिदुःखादीनिआत्मपरोभ
यस्थानिअसद्वेद्यास्रवनिमित्तानिकिमर्थंमार्हतैःकेशलुंचनानशना
तपःस्थानादीनिदुःखनिमित्तानिआस्थीयंतेपरेषुचप्रतिपाद्यंतइति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विनाशनपापशीलसंसर्गादिः। अरतिवेदनीयस्य। स्वशोकातःसदनापर
शोकप्लुताभिनंदादिः शोकवेदनीयस्य स्वभयपरिणामपरभयोत्पाद
नादिः भयवेदनीयस्य। कुशलक्रियाचारजुगुप्सापरिवादशीलत्वादिः
।जुगुप्सावेदनीयस्य अलीकाभिधायितातिसंधानपरत्वं प्रवृद्धरा
गादिः स्त्रीवेदस्य स्तोकक्रोधानुत्सेकत्वस्वदारसंतोषादिः पु
वेदनीयस्य प्रचुरकषायगुह्येंद्रियव्यपरोपणपरांगनावस्कंदनादिः।
नपुंसकवेदनीयस्य निर्दिष्टो मोहनीयस्याश्रवभेदः। इदानीं तदनंतरं
निर्दिष्टस्यायुषः। आश्रवहेतोः कथ्यते आद्यस्य नियतकालपरिपाकस्य ५
आयुषः कारणप्रदर्शनार्थमिदमुच्यते॥ बह्वारंभपरिग्रहत्वं नारकस्यायुष
॥ आरंभः प्राणिपीडाहेतुर्व्यापारः ममेदंबुद्धिलक्षणः परिग्रहः आरंभ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्णवादः।मांसभक्षणाद्यनवद्याभिधानंश्रुतावर्णवादः शूद्रत्वाशुचित्वाद्यावि
र्भावनंसंघावर्णवादः।जिनोपदिष्टोधर्मोनिर्गुणः तदुपसेविनोयेतचासु
राभविष्यंतीत्येवमादिरभिधानंधर्मावर्णवादः।सुरामांसोपसेवाद्याघोषणं
देवावर्णवादः।द्वितीयमोहस्यास्रवस्तत्प्रतिदर्शनमोहः॥कषायोदया
त्तीव्रपरिणामश्चारित्रमोहस्य॥कषायाःनिरुक्ताउदयोविपाकःकषा
याणामुदयोविपाकः।कषायाणामुदयात्तीव्रपरिणामश्चारित्रमोह
स्यास्रवोवेदितव्यः।तत्रस्वपरकषायोत्पादनंतपस्विजनवृत्तदूषणं
संक्लिष्टलिंगव्रतधारणादिःकषायवेदनीयस्यास्रवःसद्धर्मोपहसनदी
नातिहासबहुविप्रलापोपहासशीलतादिःहास्यवेदनीयस्यविचित्रकी
डनपरताव्रतशीलारुच्यादिरतिवेदनीयस्य।परारतिप्रादुर्भावनरति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधः व्यावहारिको मुख्यश्च व्यावहारिकः कालविभागः तत्कृतः समयावलिका
दिः क्रियाविशेषपरिच्छिन्नोऽन्यस्यापरिच्छिन्नस्य परिच्छेदहेतुः मुख्योऽन्यो वक्ष्य
माणलक्षणः इतरत्र ज्योतिषामवस्थानप्रतिपादनार्थमाह ॥ बहिरवस्थि
ता ॥ बहिरित्युच्यते कुतो बहिः नृलोकात् कथमवगम्यते अर्थवशाद्विभक्ति
परिणामो भवति ननु च नृलोके नित्यगतिवचनादन्यत्रावस्थानं ज्योतिष्काणां
सिद्धं अतो बहिरवस्थिता इति वचनमनर्थकमिति तन्न किं कारणं नृलोकाद
न्यत्र हि ज्योतिषां अस्तित्वमवस्थानं च असिद्धं अतस्तदुभयसिद्ध्यर्थं बहिर
वस्थिता इत्युच्यते विपरीतगतिनिवृत्त्यर्थं कदाचिद्गतिनिवृत्त्यर्थं च सूत्रमा
रभ्य तुरीयस्य निकायस्य सामान्यसंज्ञासंकीर्तनार्थमाह ॥ वैमानिकाः ॥ १०
वैमानिकग्रहणमधिकारार्थं इत उत्तरं ये वक्ष्यन्ते तेषां वैमानिकसंप्रत्ययो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्योतिष्काणां गतिविशेषप्रतिपत्त्यर्थमाह ॥ मेरुप्रदक्षिणानित्यगतयो नृलोके ॥ १
मेरोः प्रदक्षिणा मेरुप्रदक्षिणा मेरुप्रदक्षिणा इति वचनं गतिविशेषप्रतिपत्तिपरी
ता गतिर्मा विज्ञायीति नित्यगतय इति विशेषणमनुपरतक्रियाप्रतिपादनार्थं
नृलोकग्रहणं विषयार्थमर्द्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोर्ज्योतिष्का नित्यग
तयो नान्यत्रेति ज्योतिष्कविमानानां गतिहेत्वभावात्तद्वृत्त्यभाव इति चेन्नासि
द्धत्वाद्गतिरतानाभियोग्यदेवप्रेरितगतिपरिणामात् कर्मविपाकस्य वैचित्र्यात्ते
षां हि गतिमुखेनैव कर्मविपच्यत इति ॥ एकादशभिर्योजनशतैरेकविंशैर्मेरुमप्रा
प्य ज्योतिष्काः प्रदक्षिणाश्चरंति नृलोके ज्योतिःसंबंधेन व्यवहारकालप्रतिपत्त्यर्थमाह ॥ त
त्कृतः कालविभागः ॥ १४ तत्कृतग्रहणं गतिमज्ज्योतिःप्रतिनिर्देशार्थं न केवलया गत्या
नापि केवलैः ज्योतिर्भिः कालः परिच्छिद्यते अनुपलब्धेः [illegible] वर्तमानाद्यकालो हि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्नं परिहत्सग्रैवेयकेषु अनुदिशविमानेषु सर्वार्थसिद्धौ रत्निप्रमाणं आनतारेषु रत्नि
प्रमाणं परिग्रहश्च विमानपरिच्छदादिः उपर्युपरि हीनः अभिमानश्च उपर्युपरि
तनुकषायत्वाद्धीनः पुरस्तात् त्रिषु निकायेषु देवानां लेश्याविधिरुक्तः इदा
नीं वैमानिकेषु लेश्याविधिप्रतिपत्त्यर्थमाह २१ पीतपद्मशुक्ललेश्या द्वित्रिशे
षेषु पीता च पद्मा च शुक्ला च पीतपद्मशुक्लाः पीतपद्मशुक्ला लेश्या येषां ते
पीतपद्मशुक्ललेश्याः कथं ह्रस्वत्वं औत्तरपदिकं यथाहुः द्रुतायां तपरकरणे
मध्यमविलंबितयोरुपसंख्यानमिति द्रुतमध्यविलंबिता इति अथवा पीतश्च
पद्मश्च शुक्लश्च पीतपद्मशुक्लाः वर्णवंतोऽर्थाः तेषामिव लेश्या येषां ते
पीतपद्मशुक्ललेश्याः तत्र कस्य का लेश्येत्यत्रोच्यते सौधर्मैशानयोः पीतलेश्याः २।
सनत्कुमारमाहेंद्रयोः पीतपद्मलेश्याः ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्ठेषु प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यं प्रति प्रस्तारं च वैमानिकाः स्थित्यादिभिरधिका इत्यर्थः यथा स्थित्यादिभि
रुपर्युपरि अधिकाः एवं गत्यादिभिरपीत्यतिप्रसंगे तन्निवृत्त्यर्थमाह ॥ गति
शरीरपरिग्रहाभिमानतो हीनाः ॥ देशाद्देशान्तरप्राप्तिहेतुर्गतिः शरीरं वै
क्रियिकमुक्तं लोभकषायोदयाद्विषयेषु संगः परिग्रहः मानकषायादुत्प
न्नोऽहंकारः अभिमानः एतैर्गत्यादिभिरुपर्युपरि हीनाः देशान्तरविषयक्री
डारतिप्रकर्षाभावात् उपर्युपरि गतिहीनाः शरीरं सौधर्मैशानयोर्देवानां स
प्तारत्निप्रमाणं सानत्कुमारमाहेंद्रयोः षडरत्निप्रमाणं ब्रह्मलोकब्रह्मोत्तरलां
तवकापिष्ठेषु पंचारत्निप्रमाणं शुक्रमहाशुक्रशतारसहस्रारेषु चतुररा
त्निप्रमाणं आनतप्राणतयोरर्द्धचतुर्थारत्निप्रमाणं आरणाच्युतयोस्त्र्यरत्निप्रमा
णं अधोग्रैवेयकेषु अर्द्धतृतीयारत्निप्रमाणं मध्यग्रैवेयकेषु द्व्यरत्निप्रमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रयोरष्टादशसागरोपमाणि साधिकानि आनतप्राणतयोर्विंशतिसा
गरोपमाणि आरणाच्युतयोर्द्वाविंशतिसागरोपमाणि ततः ऊर्ध्वं स्थि
तिविशेषप्रतिपत्यर्थमाह ॥ आरणाच्युतादूर्ध्वमेकैकेन नवसु
ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥ अधिकग्रहणमनुवर्त्तते
तेनेदं संबंधो वेदितव्यः एकैकेनाधिकानीति नवग्रहणं किमर्थं प्रत्ये
कमेकैकमधिकमिति ज्ञापनार्थं इतरथा हि ग्रैवेयकेष्वेकमेवाधिकं
स्यात् विजयादिष्विति आदिशब्दस्य प्रकारार्थत्वात् अनुदिशानामपि ग्र रा
हणं सर्वार्थसिद्धौ पृथग्ग्रहणं जघन्याभावप्रतिपादनार्थं तेनायमर्थः
अधोग्रैवेयकेषु प्रथमे त्रयोविंशतिर्द्वितीये चतुर्विंशतिस्तृतीये पंचविं १०९
शतिः मध्यमग्रैवेयकेषु प्रथमे षड्विंशतिः द्वितीये सप्तविंशतिः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिविशेषप्रतिपत्त्यर्थमाह ॥ सानत्कुमारमाहेंद्रयोःसप्त ॥ अनयोः
कल्पयोः कल्पयोर्देवानां सप्तसागरोपमाणि साधिकानि उत्कृष्टा स्थिति
:ब्रह्मलोकादिष्वच्युतावसानेषु स्थितिविशेषप्रतिपत्त्यर्थमाह ॥ त्रि
सप्तनवैकादशत्रयोदशपंचदशभिरधिकानि तु ॥ सप्तग्रहणं प्रकृ
तं तस्येदं त्र्यादिभिर्निर्दिष्टैरभिसंबध्यते वेदितव्यः सप्त त्रिभिरधिकानि सप्त
त्रिरधिकानीत्यादि द्वयोर्द्वयोरभिसंबंधो वेदितव्यः ॥ तु शब्दो विशेषणार्थः किं
विशिष्टिनष्टि अधिकशब्दोनुवर्तमानश्चतुर्भिरिह संबध्यते नोत्तराभ्यामि
त्ययमर्थो विशिषोते तेनायमर्थो भवति ब्रह्मलोकब्रह्मोत्तरयोर्दशसाग
रोपमानि साधिकानि लांतवकापिष्टयोश्चतुर्दशसागरोपमानि साधिका
नि शुक्रमहाशुक्रयोः षोडशसागरोपमाणि साधिकानि सतारसहस्रा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधिकानितानिसाधिकानिभवन्तु।अनयोर्जघन्यास्थितिरित्यादि।नारका
णामुत्कृष्टास्थितिरुक्ता।जघन्यांतांसूत्रेऽनुपात्तांमुद्रीतांप्रकृतामपिलघुनो
पायेनप्रतिपादयितुमिच्छन्नाह॥ग:॥नारकाणांचद्वितीयादिषु॥चशब्द
:किमर्थः।प्रकृतसमुच्चयार्थः।किंचप्रकृतंपरतःपरतःपूर्वापूर्वानंतराऽपरास्थिति
रितितेनायमर्थोलभ्यते।रत्नप्रभायांनारकाणांपरास्थितिरेकंसागरोपमं
शर्कराप्रभायांजघन्यास्थितिस्त्रीणिसागरोपमाणिसावालिकाप्रभायांजघन्ये
त्यादि।एवंद्वितीयादिषुजघन्यास्थितिरुक्ता।प्रथमायांकाजघन्येतितत्प्रद
र्शनार्थमाह॥दशवर्षसहस्राणिप्रथमायां॥अपरास्थितिरित्यनुवर्त्तते।अथ
भवनवासिनांकाजघन्यास्थितिरित्यतआह॥भवनेषुच॥चशब्दःकि २५
मर्थःप्रकृतसमुच्चयार्थः तेनभवनवासिनामपरास्थितिर्दशवर्षसहस्रा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तृतीयेऽष्टाविंशतिः। उपरिमग्रैवेयकेषु प्रथमे एकोनत्रिंशत्। द्वितीये त्रिंशत्। तृ
तीये एकत्रिंशत्। अनुदिशविमानेषु द्वात्रिंशत्। विजयादिषु त्रयस्त्रिंशत्
सागरोपमान्युत्कृष्टा स्थितिः। सर्वार्थसिद्धे त्रयस्त्रिंशदेवेति निर्दिष्टोत्कृष्टस्थिति
केषु जघन्यस्थितिप्रतिपादनार्थमाह ॥ अपरापल्योपममधिकं पल्योपमं व्या
ख्यातं॥ अपरा जघन्या स्थितिः। पल्योपमं साधिकं केषां सौधर्मैशानीयानां।
कथं गम्यते परतः परत इत्युत्तरत्र वक्ष्यमाणत्वात्। ततः ऊर्द्ध्वं जघन्यस्थिति
प्रतिपादनार्थमाह ॥३४॥ परतः परतः पूर्वापूर्वानंतरा॥ परस्मिन् देशे परतः।
वीप्सायां द्वित्वं२ ई शब्दस्यापि अधिकग्रहणमनुवर्त्तते तेनैवमभिसंबंधः क्रि
यते सौधर्मैशानयोर्द्वे सागरोपमे साधिके उक्ते ते साधिके सानत्कुमारमाहें
द्रयोर्जघन्या स्थितिः। सानत्कुमारमाहेंद्रयोः परा स्थितिः सप्त सागरोपमाणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मर्थोनकल्पाते सौधर्मादयःप्राग्ग्रैवेयकेभ्यःकल्पाइतिपारिशेष्यादितरेकल्पातीा
ताइतिलौकांतिकादेवावैमानिकाःसंतःक्वगृह्यंतेकल्पोपपन्नेषुकथमितिचेदु
च्यते ब: ब्रह्मलोकालयाःलौकांतिकाः एत्यतस्मिन्नलीयंतइत्यालयःआ
वासोब्रह्मलोकालयोयेषांतेब्रह्मलोकालयाः लौकिकांतिकाःदेवाःवेदि
तव्याःयद्येवंसर्वेषांब्रह्मलोकालयानांदेवानांलौकांतिकत्वप्रसंगः अन्वर्थ
संज्ञाग्रहणाददोषःब्रह्मलोकोलोकः तस्यांतोलोकांतः तस्मिन्भवालौकां
तिकाः इतिनसर्वेषांग्रहणंतेषांहिविमानानिब्रह्मलोकस्यांतेषुस्थितानि
अथवाजन्मजरामरणाकीर्णोलकः संसारःतस्यांतोलोकःसं:लोकांतेभे
वाःलौकांतिकाःतेसर्वेपरीतसंसाराःततश्च्युताएकंगर्भावासंप्राप्यपरि
निर्वास्यंतीतितेषांसामान्येनोपदिष्टानांभेददर्शनार्थमाह ब: सारस्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्मलेश्याः शुक्रमहाशुक्रशतारसहस्रारेषु पद्मशुक्ललेश्याः आनतादिषु शुक्लले
श्याः तत्राप्यनुदिशानुत्तरेषु परमशुक्ललेश्याः सूत्रेण नास्ति इति तत्कथं मिश्रग्रह
णं सामर्थ्यात् लोकवत् तद्यथा छत्रिणो गच्छंतीति अछत्रिषु छत्रिव्यवहारः ए
वमिहापि मिश्रयोरन्यतरग्रहणं भवति अथ प्रश्नः सूत्रतः कथं गम्यते इति चे
दुच्यते एवमभिसंबंधः क्रियते द्वयोः कल्पयुगलयोः पीतलेश्या सनत्कुमार
माहेंद्रयोः पद्मलेश्यायाः अविवक्षातः ब्रह्मलोकादिषु कल्पयुगलेषु पद्मले
श्याः शुक्रमहाशुक्रयोः शुक्ललेश्यायाः अविवक्षातः शेषेषु सतारादिषु
शुक्ललेश्या पद्मलेश्यायाः अविवक्षा इति नास्ति दोषः आह कल्पोपपन्ना इत्यु
क्तं तत्रेदं न ज्ञायते के कल्पा इत्यत्रोच्यते ब: प्राग्ग्रैवेयकेभ्यः कल्पाः
इदं न ज्ञायते इत आरभ्य कल्पा भवंति सौधर्मादिग्रहणमनुवर्तते तेनाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यानिष्टया ऽत्वयोगान्नाऽव्याप्तमिति चेन्नोत्तया सिद्धेः यथा दंडः दंडिनो योगी दंड:
वतिप्रसक्तिः द्वयोर्न्नैवं तथा द्रव्यत्वेन घटक सिद्धेस्तः । यत्र घट प्रवृत्ति द्वयोर
योगः स्यात् आकाश कुसुम स्या प्रकृति पुरुषवद्धितीयत्र रागश्च योगः स्या
दिति अघट घट कुसिद्धिः सुवर्णमतेऽव्यवच्छेदकल्पना निरर्थिका ।। संज्ञा वे
ऽव्याप्तमिति चेन्न चापि सुवर्णनामसमुदायस्य चेतेदा ना चेत तत्व पदेशान् ...
भेदा सुवर्णमेव पूर्वो रूपा व दोषः नन्वेवं ऽवति गुणे ह्यद्वयतद्भृति
प्रसंगापादोष इति चेत् न कथंचित् भेदाद्भेदा पदेशः तथा पदेशात्सिद्धिः व्या
तत्रैकेणानुपलब्धेः सदः संज्ञा लक्षण प्रयोजनादि भेदाद्भेदः इति प्रसंगता
धर्माद्याद्वव्यत्त्व सामानाधिकरण्याद्यज्ञवन्निर्देशः स्याद्देवमसंख्यात्तु ... ११०
वस्तुष्टिं गानुवृत्ति निरशिप्राप्नोति नैष दोषः आविष्टलिंगाः शब्दाः नकादा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वहुत्वज्ञापनार्थः धर्मादीनां प्रदेशा बहव इति ननु च असंख्येयाः प्रदेशा धर्मा
धर्मैकजीवानामित्यनेन प्रदेशवत्त्वं विज्ञापितं तस्मादिदं परं किंतु आ
स्मिन् विशेषेवमतिन्न दवधारणं विज्ञायते च असंख्येयाः प्रदेशाः न संख्येया ना
प्यनंता इति कालप्रदेशप्रचयाभावज्ञापनार्थं च इदं कायग्रहणं कालोव
क्ष्यते तस्य प्रदेशप्रचयप्रतिषेधार्थमिदं कायग्रहणं यथाणोः प्रदेशमात्र
त्वात् द्वितीयादयोस्य प्रदेशा न संतीत्यप्रदेशोणुः तथा कालपरमाणुरप्ये
कप्रदेशत्वादप्रदेश इति तेषां धर्मादीनामजीवा इति सामान्यसंज्ञा जीव
लक्षणाभावमुखेन प्रवृत्ता धर्मोऽधर्म्मो आकाशं पुद्गला इति विशेषसंज्ञाः
सामायिकाः अत्राह सर्वद्रव्यपर्यायेषु केवलस्येत्युक्तं तत्र कानि
नि कानि तानीत्युच्यंते ॥ द्रव्याणि ॥ यथास्वं पर्यायैर्द्रूयंते द्रवंति वा तानि द्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

इत्यर्थः तथोऽवस्थितानीत्युक्ते तेन विद्यते रूपं येषां इत्यरूपाणि रूपप्रतिषेधे
तत्सहचारिणां रसादीनामपि प्रतिषेधः तेन अरूपाण्यमूर्त्तानीत्यर्थः यथास
र्वेषां द्रव्याणां नित्यावस्थितानीत्येतत्साधारणं लक्षणं प्राप्तं तथा पुद्गलानामपि अ
रूपित्वमपित्वमपि प्राप्तं अतस्तदपवादार्थमाह॥ रूपिणः पुद्गलाः॥ रूपं मूर्त्ति
इत्यर्थः का मूर्त्तिः रूपादिसंस्थानपरिणामो मूर्त्तिः रूपमेषामस्तीति रूपिणः मूर्त्तिमं
इत्यर्थः अथवा रूपमिति गुणविशेषवचनशब्दः तेषामस्तीति रूपिणः रसाद्य
त ग्रहणमिति चेन्न तदविनाभावात्तत्सविः पुद्गलाः इति बहुवचनं भेदप्रतिपा
दनार्थं भिन्ना हि पुद्गलाः स्कंधपरमाणुभेदाद्विकल्पः उपरिष्टाद्वक्ष्यते यदि
प्रधानवदेकं रूपित्वमेकत्वं चेष्टं स्यात् विश्वरूपकार्यदर्शनविरोधः स्यात् आ ११
दि किं पुद्गलवत् धर्मादीन्यपि द्रव्याणि प्रत्येकं भिन्नानीत्याशंक्यते॥ आ आकाशा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नतथावायुमनसोरूपादिमत्कार्यदर्शनात्तेषामपितदुपपत्तेः सर्वेषां प
रमाणूनां सर्वरूपादिमत्कार्यत्वप्राप्तियोग्यताभ्युपगमात् न च केचित्पा
र्थिवादिजातिविशेषयुक्ताः परमाणवः संति सकरणारंभदर्शनात् दि ह
शोप्याकाशेऽन्तर्भावः आदित्योदयाद्यपेक्षयाकाशप्रदेशपंक्तिषु इ
तः इदमिति व्यवहारोपपत्तेः उक्तानां द्रव्याणां विशेषप्रतिपत्त्यर्थमाह
॥नित्यावस्थितान्यरूपाणि॥ निध्रुवमित्यर्थः निध्रुवे नित्य इति निष्पादितत्वात्
धर्मादीनि द्रव्याणि गतिहेतुत्वादिविशेषलक्षणद्रव्यार्थादेशादस्तित्वादिसामा
न्यलक्षणद्रव्यार्थादेशाच्च कदाचिदपि न व्ययंतीति नित्यानि वक्ष्यते हि तद्भावाव्य
यं नित्यमिति इयत्ताव्यभिचारादवस्थितानि धर्मादीनि षडपि द्रव्याणि कदा
चिदपि षडिति इयत्त्वं नातिवर्तंते उभयतो द्रव्यनयविवक्षया द्रव्यस्य रूपत॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यानिमित्तोत्पादाभावेप्येषांधर्मादीनांअन्यथोत्पादःकल्प्यतेतद्यथाद्विविः
उत्पादः स्वनिमित्तस्तावदनंतानांअगुरुलघुगुणानांआगमप्रामाण्याद
भ्युपगम्यमानानांषट्स्थानपतितयावृद्ध्याहान्याचवर्त्तमानानांस्वभावादेतेषा
मुत्पादःव्ययश्चपरप्रत्ययोपिअश्वादिगतिस्थित्यवगाहनहेतुत्वात्क्षणे
क्षणेतेषांभेदात्तद्धेतुत्वमपिभिन्नमितिपरप्रत्ययापेक्षउत्पादोविनाशश्च
व्यवह्रियतेननुयदिनिःक्रियाणिधर्मादीनिजीवपुद्गलानांगत्यादिहेतुत्वं
नोपपद्यतेजलादीनिहिक्रियावंतिमत्स्यादीनांगत्यादिनिमित्तानिदृष्टानी
तिनैषदोषःबलाधाननिमित्तत्वाच्चक्षुर्वत्यथारूपोपलब्धौचक्षुर्निमित्तमितिन
व्याक्षिप्तमनस्कस्यापिभवतिअधिकृतानांधर्माधर्माकाशानांनिःक्रियत्वे ११३
ऽभ्युपगतेजीवपुद्गलानांसक्रियत्वमर्थादापन्नंकालस्यापिसक्रियत्वमितिचे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देकद्रव्याणि॥ आङ् अयमभिविध्यर्थः सोत्रीमानुपूर्वी(मास्त्रित्यैतदुक्तं तेन धर्ममधि
कृत्याकाशानि गृह्यंते एकशब्दः संख्यावचनः तेन द्रव्यं विशेष्यते एकं द्रव्यं एकद्र
व्यस्कलघुत्वात् द्रव्यग्रहणमनर्थकं तज्ज्ञापयते द्रव्यापेक्षया एकत्वख्यापनार्थं द्र
व्यग्रहणं क्षेत्रभावापेक्षया असंख्येयत्वानंतत्वविकल्पस्येष्टत्वात् न जीवपुद्ग
लवदेषां बहुत्वमित्येतदनेनाख्याप्यते अधिकृतानामेव एकद्रव्याणां विशे
षप्रतिपत्त्यर्थमिदमुच्यते॥ निःक्रियाणि च॥ उभयनिमित्तवशादुत्पद्यमानः पर्या
यो द्रव्यस्य देशांतरप्राप्तिहेतुः क्रिया तस्याः निष्क्रांतानि निःक्रियाणि अत्र चोद्य
ते धर्मादीनि द्रव्याणि यदि निःक्रियाणि ततस्तेषामुत्पादो न भवेत् परिस्पंदक्रिया
पूर्वको हि घटादीनां उत्पादो दृष्टः उत्पादाभावाच्च व्ययाभाव इति अतः सर्वद्र
व्याणामुत्पादादित्रयकल्पनाव्याघात इति तन्न किं कारणमन्यथोपपत्तेः क्रि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्यैकस्वस्थं लोकाकाशं व्याप्नुवंते अथाकाशस्य कति प्रदेशाः इत्यत आह॥ आ
काशस्यानंताः॥ अविद्यमानो ऽन्तो येषां ते अनंताः के प्रदेशाः कस्य आका
शस्य पूर्ववदस्यापि प्रदेशकल्पनावसेया उक्तममूर्त्तानां प्रदेशपरिमाणं
इदानीं मूर्त्तानां पुद्गलानां प्रदेशपरिमाणनिर्ज्ञानार्थमित्यत आह॥ संख्येयासं
ख्येयाश्च पुद्गलानां॥ चशब्दादनंताश्चेत्यनुवर्त्तते कस्यचित्पुद्गलस्य द्व्यणु
कादेः संख्येयाः प्रदेशाः कस्यचिदसंख्येयाः अनंतानंतोपसंख्यानमिति चेन्ना
नंतसामान्यात् अनंतप्रमाणं त्रिविधमुक्तं परीतानंतं युक्तानंतं अनंतानंतं चेति
तत्सर्वमनंतसामान्येन गृह्यते स्यादेतत् असंख्यातप्रदेशो लोकः अनंत
प्रदेशस्यानंतप्रदेशस्य स्कंधस्याधिकरणमिति विरोधः ततो नानंत्यमि ११४
ति नैष दोषः सूक्ष्मपरिणामावगाहनशक्तियोगात् परमाणवादयो हि सूक्ष्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुनानधिकारादेतेषामभावैस्तैःसदनाधिक्रियते अजीवकायाइत्यत्रकाय
ग्रहणेनप्रदेशावयवबहुत्वंनिर्ज्ञातंनत्वियत्तावधारितानाप्रदेशानां अतस्तन्निर्धा
रणार्थमिदमुच्यते॥ **असंख्येयाःप्रदेशाधर्माधर्मैकजीवानां॥** संख्यामतीतांअ
संख्येयाः असंख्येयस्त्रिविधः जघन्यः उत्कृष्टः अजघन्योत्कृष्टश्चेति तत्रे
हाजघन्योत्कृष्टासंख्येयः परिगृह्यते प्रदिश्यंतइतिप्रदेशाः वक्ष्यमाणलक्षण
ःसयावतिक्षेत्रेव्यवतिष्टतेसप्रदेशइतिव्यवह्रियतेधर्मैकजीवास्तुल्यासं
ख्येयप्रदेशाः तत्रधर्माधर्म्मौनिष्क्रियौलोकाकाशंव्याप्यस्थितौ जीवस्तावत्प्रदे
शोपिसन्संहरणविसर्पणस्वभावत्वात्कर्म्मनिर्वर्तितंशरीरमणुमहद्वाधिति
ष्टंस्तावदवगाह्यवर्त्तते यदातुलोकपूरणंभवतितदामंदरस्याधःचित्रावज्र
पटलमध्येजीवस्याष्टौमध्यप्रदेशाव्यवतिष्टंते इतरेप्रदेशाःऊर्द्धमधस्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यकः आधार इति आकाशस्य नास्त्यन्य आधारः स्वप्रतिष्ठमाकाशं यद्या
काशं स्वप्रतिष्ठं धर्मादीन्यपि स्वप्रतिष्ठान्येव अथ धर्मादीनां अन्य आधा
रः कल्प्यं तथा सत्यनवस्थाप्रसंग इति नैष दोषः नाकाशादन्यदधिकपरि
माणं द्रव्यमस्ति यत्राकाशं स्थितमित्युच्यते सर्वतोऽनंतं हि तत् धर्मादीनां
पुनरधिकरणमाकाशमित्युच्यते व्यवहारनयवशात् एवंभूतनयापेक्ष
या तु सर्वाणि द्रव्याणि स्वप्रतिष्ठान्येव तथा चोक्तं क्व भवानास्ते आत्मनी
ति धर्मादीनि लोकाकाशान्न बहिः संतीति एतावत् अत्र आधाराधेयक
ल्पनासाध्यं फलं ननु च लोके पूर्वोत्तरकालभाविनामाधाराधेयभावो दृष्टः
यथा कुंडे बदरादीनां न तथाकाशं पूर्वं धर्मादीनि उत्तरकालभावीनि अतो ११
व्यवहारनयापेक्षयापि आधाराधेयकल्पनानुपपत्तिरिति नैष दोषः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्ष्मत्वेनपरिणताः एकैकस्मिन्नपि आकाशप्रदेशे अनंतानंता अवतिष्ठंति
अवगाहनशक्तिश्चैषां अव्याहतास्ति तस्मादेकस्मिन्नपि प्रदेशे अनंतानंतानां
अवस्थानं न विरुध्यते उक्तं नानामित्यविशेषवचनात्परमाणोरपि प्रदेशाव
प्रसंगे तत्प्रतिषेधार्थमाह ॥ नाणोः ॥ अणोः प्रदेशा न संतीति वाक्यशेषः कु
तो न संतीति वाक्यशेषः कुतो न संतीति चेत् प्रदेशमात्रत्वात् यथाकाशप्रदे
शस्यैकस्य प्रदेशभेदाभावात् अप्रदेशत्वं एवमणोरपि प्रदेशमात्रत्वात्प्रदे
शभेदाभावः किंच ततोऽल्पपरिमाणाभावात् न ह्यणोरल्पीयानन्योस्ति यत
तोस्य प्रदेशा भिद्येरन् एषामवधृतप्रदेशानां धर्मादीनामाधारप्रतिपत्त्यर्थं
मिदमुच्यते ॥ लोकाकाशेवगाहः ॥ उक्तानां धर्मादीनां द्रव्याणां लोकाका
शेवगाहो न बहिरित्यर्थः यदि धर्मादीनां लोकाकाशमाधारः आकाश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आकाशस्योपकारो वेदितव्यः आह जीवपुद्गलानां क्रियावतामवगाहिनाम
वकाशदानं युक्तं धर्मास्तिकायादयः पुनर्निःक्रिया नित्यसंबंधाः तेषां क
थमवगाह इति चेन्नोपचारतस्तत्सिद्धेः यथा गमनाभावेपि सर्वगतमाकाश
मित्युच्यते सर्वत्र सद्भावात् एवं धर्माधर्मावपि अवगाहनक्रियाऽभावेपि
सर्वत्र व्याप्तिदर्शनात् अवगाहिनाविति उपचर्यते आह यद्यवकाशदानम
स्य स्वभावः वज्रादिभिर्लोष्टादीनां भित्त्यादिभिर्गवादीनां च व्याघातो न प्रा
प्नोति दृश्यते च व्याघातः तस्मादस्यावकाशदानं हीयत इति नैष दोषः वज्रा
लोष्टादीनां स्थूलानां परस्परव्याघात इति नास्यावकाशदानसामर्थ्यं हीय
ते तत्रावगाहिनामेव व्याघातात् वज्रादयः पुनः स्थूलत्वात् परस्परं प्रत्यव ११
काशदानं न कुर्वन्तीति नासावाकाशदोषः ये खलु पुद्गलाः सूक्ष्माः तेपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योऽनेककल्पनायां लोकालोकविभागाभावः। इष्टमिंडानादीन्प्रवर्तस्य योऽन
समर्थो निमित्तौ धर्माधर्मास्तिकायाविति चेन्न समाक्षरणस्य इति विशेषोक्त्वा
अनेककारणसाध्यत्वाच्चैकस्य कार्यस्य मृत्पिण्डवत्तद्वारयोगोतिस्थितिइति
ध्द इति चेत्तन्नाभेरकत्वात् अनुपलब्धेर्नास्ति खरविषाणवदिति चेन्न। नाम
र्वप्रवाद्यविप्रतिपत्तेः सर्वे हि प्रवादिनः प्रत्यक्षाप्रत्यक्षानर्थानिति वांछं
ति अस्मान्प्रति हेतोरसिद्धेश्च सर्वज्ञेन निरतिशयप्रत्यक्षज्ञानचक्षुषा ध
र्मादयः सर्वे उपलभ्यंते तदुपदेशाच्च श्रुतज्ञानिभिरपि अत्राह यदि अतीं
द्रिययोर्धर्माधर्मयोरुपकारसंबंधेनास्तित्वमवध्रियते तदनंतरमुद्दिष्ट
स्य नभसोऽतींद्रियस्याधिगमे क उपकार इत्युच्यते ॥ आकाशस्यावगाहः ॥१८॥
उपकार इति वर्त्तते जीवपुद्गलादीनामवगाहिनामवकाशदानमवगाहः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिष्टते। लोकाकाशेसूक्ष्मबादरभेदादवस्थानंप्रत्येतव्यंबादरास्तावत्सप्रतिघातश
रीराः सूक्ष्मास्त्वसप्रतिघशरीराश्चेपिसूक्ष्मतावादेवएकनिगोदजीवावगाहेपिप्रदेशे
साधारणशरीराः। अनंतानंताः वसंति नतेपरस्परेणबादरैश्चव्याहन्यंतइतिना
स्त्यवगाहविरोधः। अत्राह लोकाकाशतुल्यप्रदेशएकोजीवइत्युक्तंतस्यकथंलोक
स्यासंख्येयभागादिषुवृत्तिः। ननुसर्वलोकव्याप्त्यैवभवितव्यमित्यत्रोच्यते॥ प्र
देशसंहारविसर्पाभ्यांप्रदीपवत्॥ अमूर्त्तस्वभावस्यात्मनोनादिबंधंप्रत्ये
कत्वात्। कथंचिन्मूर्त्ततांविभ्रतःकार्मणशरीरवशान्महदणुचशरीरमधि
तिष्ठतः। तद्वशात्प्रदेशसंहरणविसर्पणस्वभावस्यतावत्प्रमाणतायांसत्यां
असंख्येयभागादिषुवृत्तिरुपपद्यतेप्रदीपवत्। यथानिरावरणव्योमप्रदेशेवह्न ११
वर्त्तनःप्रकाशपरिमाणस्यप्रदीपस्यशरावमानिकाप्रवरकाद्यावरणवशात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वदमूर्त्तयोर्धर्माधर्मयोरेकत्राविधेरोनावरोध इति मूर्त्तिमतां पुद्गलानां क-
थमित्याचोद्यते आगमप्रामाण्यान्न तथाध्यवसेयं ॥ उक्तं च ॥ उगाढगाढणिचि-
उ पोग्गलकायेहिं सव्वदो लोगो । सुहुमेहिं बादरेहिं अणंताणंतेहिं विविहेहिं-
हिं ॥ अथ जीवानां कथमवगाह इत्यत्रोच्यते ॥ असंख्येयभागादि ॥ असं-
ख्येयभागादिषु जीवानां ॥ लोकाकाशस्य इत्यनुवर्त्तते । तस्यासंख्येयभागीकृ-
तस्यैको भागः । असंख्येयभागः इत्युच्यते स आदिर्येषां ते असंख्येयभागा-
दयः । तेषु जीवानामवगाहो वेदितव्यः ॥ तद्यथा ॥ एकस्मिन्नसंख्येयभागे ए-
को जीवोऽवतिष्ठते । एवं द्वित्रिचतुरादिष्वपि असंख्येयभागेषु आसर्वलो-
कादवगाहः प्रत्येतव्यः नानाजीवानां तु सर्वलोक एव यद्येकस्मिन्नसंख्येयभा-
गे एको जीवोऽवतिष्ठते कथं द्रव्यप्रमाणेनानन्तानन्तो जीवराशिः सशरीरो व-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णामिनां जीवपुद्गलानां गत्युपग्रहे कर्त्तव्ये धर्म्मास्तिकायः साधारणाश्रयः साधार
णाश्रयः जलवन्मत्स्यगमने तथा स्थितिपरिणामिनां जीवपुद्गलानां स्थित्युप
ग्रहे कर्त्तव्ये अधर्म्मास्तिकायः साधारणाश्रयः पृथ्वीधातुरिवाश्वादिस्थित
विति ननु चत्तुपग्रहवचनमनर्थकमुपकार इत्येव सिद्धत्वात् गतिस्थिती धर्म
ाधर्मयोरुपकार इति नैष दोषः यथासंख्यनिवृत्यर्थमुपग्रहवचनं धर्मा
धर्म्मयोर्गतिस्थित्योश्च यथासंख्यं भवति यथापकं जीवपुद्गलानां यथासं
ख्यं प्राप्नोति धर्म्मस्योपकारो जीवानां गतिः अधर्म्मस्योपकारः पुद्गलानां
स्थितिरिति तन्निवृत्यर्थमुपग्रहवचनं क्रियते आह धर्म्माधर्म्मयोर्य उप
कारः स आकाशस्य युक्तः सर्वगतत्वादिति चेत्तदयुक्तं तस्यान्योपकार ११९
सद्भावात् सर्वेषां धर्म्मादीनां द्रव्याणामवगाहनं तत्सयोजनं एकस्यानेकप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यरिणमतेति। अत्राह॥ धर्म्मादीनामन्योन्यप्रदेशानुप्रवेशात्संकरे सति परक
र्मज्ञानां तिनं परस्परमत्यंतश्लेषे सत्यपि स्वतावं न जहतीति॥ उक्तं च॥ अ
ण्णोण्णं पविसंता। देंता उगासमण्णमण्णस्स। मेलंता वि य णिच्चं। सगसभावं न
विजहंति। यद्येवं धर्मादीनां स्वभावभेद उच्यंतामित्यत आह॥ गतिस्थि
त्युपग्रहौ धर्माधर्मयोरुपकारः॥ देशांतरप्राप्तिहेतुर्गतिः। तद्विपरीता स्थि
तिः उपग्रहस्तदुपग्रहः। गतिश्च स्थितिश्च गतिस्थिती एव उपग्रहौ गतिस्थि
त्युपग्रहौ धर्माधर्मयोरिति कर्तृनिर्देशः। उपक्रियत इत्युपकारः कः पुन
रसौ गत्युपग्रहः स्थित्युपग्रहश्च यद्येवं द्वित्वनिर्देशः प्राप्नोति नैष दोषः सा
मान्येन व्युत्पादितः शब्दः उपात्तसंख्यः शब्दांतरसंबंधे सत्यपि न पूर्वोपात्तां
संख्यां जहाति। यथा साधोः कार्यं तपःश्रुते इति। तदुक्तं भवति गतिपरि

निर्वृत्तशरीराणि तेषां कारणत्वात्तानि कर्माण्यपि शरीरग्रहणेन गृह्यंते । प्रा
तानि पौद्गलिकानीति कथं अजीवानामुपकारेषु गताः एवं चेति स्यान्मतं का
र्मणमपौद्गलिकं अनाकारत्वात् आकारवतां हि औदारिकादीनां पौद्गलि
कत्वं युक्तमिति तन्न तदपि पौद्गलिकमेव तद्विपाकस्य मूर्तिमत्संबंधा
निमित्तत्वात् दृश्यते हि व्रीह्यादीनां उदकादिद्रव्यसंबंधप्रापितपरिपाका
नां पौद्गलिकत्वं तथा कार्मणमपि गुडकंटकादिमूर्तिमद्द्रव्योपनिपाते स
ति विपच्यमानत्वात् पौद्गलिकमित्यवसेयं वाक् द्विविधा द्रव्यवाग्भावव
गिति तत्र भाववाक् तावत् वीर्यान्तरायमतिश्रुतज्ञानावरणक्षयोपशमांगो
पांगनामलाभनिमित्तत्वात् पौद्गलिकी तदभावे तद्वृत्त्यभावात् तत्सामर्थ्यो १२१
पेतेन क्रियावतात्मना प्रेर्यमाणाः पुद्गलाः वाक्त्वेन विपरिणमंत इति द्रव्य

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परस्परंप्रत्यवकाशदानंक्रियतइतियद्येवंनेदमाकाशस्यासाधारणलक्षणमिति
परेषामपितत्सद्भावादितितन्नसर्वपदार्थानांसाधारणावगाहनहेतुत्वम
स्यासाधारणलक्षणमितिनास्तिदोषः। अलोकाकाशेतदभावादि
तिचेतन्नस्वभावापरित्यागादुक्तः। आकाशस्योपकारः। अथतदनंतरोद्दि
ष्टानांपुद्गलानांकःउपकारइत्यत्रो॥: शरीरवाङ्मनःप्राणापानाःपुद्गलानां
॥ इदमयुक्तंवर्त्ततेकिमत्रायुक्तंपुद्गलानांकउपकारइतिपरिप्रश्नेपुद्ग
लानांलक्षणमुच्यतेशरीरादीनिपुद्गलमयानीतिनैतदयुक्तंपुद्गलानांलक्ष
णं। उत्तरत्रवक्ष्यते। इदंतुजीवान्प्रतिपुद्गलानामुपकारप्रतिपादनार्थमेवेति
उपकारप्रकरणउच्यतेशरीराणिउक्तानि। औदारिकादीनिसौक्ष्म्यादप्र
त्यक्षाणितदुदयापादितवृत्तीन्युपचयशरीराणिकानिचित्प्रत्यक्षाणिका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तत्त्वार्थवृत्ति
१५१

ति अथ संबंधः । कस्मिन् पुद्गले नो संबद्धसंबद्धः इतरेषु पुद्गलेषु तत्प्रकार
तक्कयात् अदृष्टवशादस्य अलातचक्रवत्परिभ्रमणमिति चेन्न तस्या
त्मगुणत्वात् अमूर्तस्यात्मनो निःक्रियस्यादृष्टो गुणः सोऽपि निःक्रियः सन् अन्य
त्र क्रियारंभे न समर्थः दृष्टो हि वायुद्रव्यविशेषः क्रियावान् स्पर्शवान् प्राप्तः
वनस्पतेर्हेतुः तद्विपरीतलक्षणश्चायं इति क्रियाहेतुत्वाभावः वीर्यान्तराय
ज्ञानावरणक्षयोपशमांगोपांगनामोदयापेक्षेणात्मना उदस्यमानः कोष्ठ्यो वा
युरुच्छ्वासलक्षणः प्राण इत्युच्यते तेनैवात्मना बाह्यो वायुरभ्यन्तरीक्रियमा
णो निःश्वासलक्षणोऽपान इत्याख्यायते एवं तावप्यात्मानुग्राहिणो जीवित
हेतुत्वात् तेषां मनःप्राणापानानां मूर्तिमत्त्वमवसेयं कुतः मूर्तिमद्भिः प्रतीघा १
तादिदर्शनात् प्रतिभयहेतुभिरशनिपातादिभिर्मनसः प्रतीघातो दृश्यते

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वागपियोग्यत्विकी श्रोत्रेंद्रियविषयत्वात् इतरेंद्रियविषयाकस्मान्नभवति
तद्ग्रहणायोग्यत्वात् घ्राणग्राह्ये गंधद्रव्ये रसाद्यनुपलब्धिवत् अमूर्त्ता वामि
तिचित्र। नमूर्त्तिमद्ग्रहणावरोधव्याघाताभिभवादिदर्शनात् मूर्त्तिमत्त्वसि
द्धेः। मनोद्विविधं द्रव्यमनो भावमनश्चेति भावमनस्तावत् लब्ध्युपयोगलक्ष
णं। पुद्गलावलंबनत्वात् पौद्गलिकं द्रव्यमनश्च ज्ञानावरणवीर्यांतराय
क्षयोपशमांगोपांगनामलाभप्रत्ययाः गुणदोषविचारस्मरणादिप्रणिधा
नाभिमुखस्यात्मनोऽनुग्राहकाः पुद्गलाः मनस्त्वेन परिणता इति पौद्गलिकं
कश्चिदाह। मनो द्रव्यांतरं रूपादिपरिणामविरहितं अणुमात्रं तस्य पौद्गलिक
त्वमयुक्तमिति तन्न युक्तं कथं उच्यते। तदिंद्रियेणात्मना च संबद्धं वा स्यादसंबद्धं वा
यद्यसंबद्धं तन्नात्मन उपकारकं नवितुमर्हति इंद्रियस्य च साचिव्यं न करो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेः उपकाराधिकारादुपग्रहणवचनमनर्थकं नानर्थकं स्वोपग्रहदर्शनार्थमिदं
पुद्गलानां पुद्गलकृतउपकारइति॥ तत्रयथा॥ कंसादीनां भस्मादिभिर्जलादीनां
कतकादिभिरयःप्रभृतीनामुदकादिभिरुपकारः क्रियते चशब्दः किमर्थः स
मुच्चयार्थः समुच्चयार्थः अन्योपि पुद्गलकृतउपकारोस्तीति समुच्चीयते यथा
शरीराणि एवं चक्षुरादीनां इंद्रियाण्यपीति एवमायुर्जीवकृतमुपकारं प्रदर्श्य जीव
कृतोपकारोपकारं प्रदर्शनार्थमाह॥ परस्परोपग्रहो जीवानां ॥२१॥ परस्परशब्दः
कर्मव्यतिहारे वर्त्तते कर्मव्यतिहारश्च क्रियाव्यतिहारः परस्परस्य उपग्रह
:परस्परोपग्रहः जीवानामुपकारः कः पुनरसौ स्वामी भृत्यः आचार्याः शिष्याः इ
त्येवमादिलक्षणेन वृत्तिः परस्परोपग्रहः स्वामी तावद्वित्तत्यागादिना भृत्याना १२२
मुपकारे वर्त्तते भृत्याश्च हितप्रतिपादनेनाहितप्रतिषेधनेन च आचार्य उ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुरादिभिश्चाभिभवः हस्ततलपुटादिभिरास्यसंवरणात् प्राणापानयोः प्रति
घात उपलभ्यते श्लेष्मणा चाभिभवः। न चामूर्तस्य मूर्तिमद्भिरभिघातादयः स्
युः अत एवात्मास्तित्वसिद्धिः। यथा यंत्रप्रतिमाचेष्टितं प्रयोक्तुरस्तित्वं
गमयति तथा प्राणापानादिकर्मापि क्रियावंतमात्मानं साधयति किमेतावाने
व पुद्गलानामुपकारः। आहोस्विदन्योप्यस्तीत्यत आह॥ **सुखदुःखजीवित
मरणोपग्रहाश्च॥** सदसद्वेद्योदयेंतरंगहेतौ सति बाह्यद्रव्यादिपरिपाकनिमि
त्तवशादुत्पद्यमानः प्रीतिपरितापरूपः परिणामः सुखदुःखमित्याख्यायते। भ
वधारणकारणायुराख्यकर्मोदयाद्भवस्थितिमादधानस्य जीवस्य पूर्वोक्तः
प्राणापानक्रियाविशेषाव्युच्छेदः। जीवितमित्युच्यते तदुच्छेदो मरणं एतानि सुखा
दीनि जीवस्य पुद्गलकृत उपकारः कुतः मूर्तिमद्धेतुसंनिधाने सति तदुत्प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वत्वंप्राप्नोतियथाशिष्योऽधीतेउपाध्यायोध्यापयतीतिनैषदोषः निमित्तमा
त्रेपिहेतुकर्तृव्यपदेशोदृष्टः यथाकारीषोग्निरध्यापयतिएवंकालस्यहेतुक
र्तृतासकथंकालइत्यवसीयतेसमयादीनांक्रियाविशेषाणांसमयादिभि
र्निर्वर्त्यमानानांचपाकादीनांसमयःपाकइत्येवमादिस्वसंज्ञारूढिसद्भा
वेपिसमयःकालःओदनपाककालइतिअध्यारोप्यमाणःकालव्यपदेशस्तद्
व्यपदेशनिमित्तस्यमुख्यस्यकालस्यास्तित्वंगमयतिकुतोगौणस्यमुख्यापेक्ष
त्वात्द्रव्यस्यपर्यायःधर्मांतरनिवृत्तिधर्मांतरोपजननरूपःअपरिस्पंदा
त्मकःपरिणामःजीवस्यक्रोधादिःपुद्गलस्यवर्णादिःधर्माधर्माकाशानां
अगुरुलघुगुणवृद्धिहानिकृतःक्रियापरिस्पंदात्मिकासाद्विधाप्रायोगवैस्र
सिकभेदात्तत्रप्रायोगिकीशकटादीनांवैस्रसिकीमेघादीनांपरत्वापरत्वे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यलोकफलप्रदोपदेशादर्शनेनतदुपदेशविहितक्रियानुष्ठायिनेनचशिष्या
णांअनुग्रहेवर्त्तन्तेशिष्याश्चविनीतदानुकूलवृत्त्याआचार्याणांउपकाराधिका
रेषुनरुपग्रहवचनंकिमर्थंपूर्वोक्तसुखादिचतुष्टयप्रदर्शनार्थंपुनरुपग्र
हवचनंक्रियतेसुखादीन्यपिजीवानांजीवकृतःउपकारः।इतिआहयद्युत्
पन्नंपसतोपकारिणाभवितव्यंसंश्चकालोभिमतःतस्यकउपकारइतिअत्रो
च्यते॥ वर्त्तनापरिणामक्रियाःपरत्वापरत्वेचकालस्य॥ वृत्तेर्णिजंतात्कर्मणिभा
वेवायुचिस्त्रीलिंगेवर्त्तनेतिभवति वर्त्यतेवर्त्तमानमात्रंवावर्त्तनेतिधर्मादी
नांद्रव्याणांस्वपर्यायनिर्वृत्तिंप्रतिस्वात्मनैववर्त्तमानानांबाह्योपग्रहाद्विनातद्वृ
त्त्यभावात्तत्प्रवर्त्तनोपलक्षितःकालइतिकृत्वावर्त्तनाकालस्योपकारः को
णिजर्थः वर्त्ततेद्रव्यपर्यायःतस्यवर्त्तयिताकालः यद्येवंकालस्यक्रि.या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्त्वार्थवृत्ति पुद्गलानां तु सामान्यलक्षणमुक्तं विशेषलक्षणं नोक्तं तत्किमित्युच्यते ॥
१२५ स्पर्शरसगंधवर्णवंतः पुद्गलाः ॥ स्पृश्यते स्पर्शनमात्रं वा स्पर्शः सोऽष्टविधः मृ
दुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षभेदात् रस्यते रसनमात्रं वा रसः स
पंचविधः तिक्ताम्लकटुकमधुरकषायभेदात् गंध्यते गंधनमात्रं वा गंधः स
द्वेधा सुरभिर्दुरभिश्च वर्ण्यते वर्णनमात्रं वा वर्णः स पंचविधः कृष्णनी
लपीतशुक्ललोहितभेदात् तद्भेदात् तद्भेदमूलभेदाः प्रत्येकं संख्येयासं
ख्येयानंतभेदाश्च भवंति स्पर्शश्च रसश्च गंधश्च वर्णश्च स्पर्शरसगंधवर्णाः
ते विद्यंते येषां संतीति स्पर्शरसगंधवर्णवंतः इति नित्ययोगे वतुर्निर्देशः यथा
क्षीरिणो न्यग्रोधा इति ननु च रूपिणः पुद्गलाः इत्यत्र पुद्गलानां रूपवत्त्वमुक्तं १२६
तदविनाभाविनश्च रसादयः तेनैव परिगृहीता इति व्याख्यानं तस्मात्तेनैव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वेतद्धृतेकालद्धृतेचसूत्रः तत्रकालोपकारप्रकरणात्काललक्षणंसूच्यतेव
र्त्तनादयः उपकाराःकालस्यास्तित्वंगमयंतिननुवर्त्तनाग्रहणमेवा
स्तुतद्भेदाःपरिणामादयः तेषांपृथग्ग्रहणमनर्थकंकालद्वयसूचना
र्थातस्पष्टंतस्यकालोद्विविधःपरमार्थकालोव्यवहारकालश्चपरमा
र्थकालोवर्त्तनालक्षणः परिणामादिलक्षणोव्यवहारकालः अन्येनपरि
च्छिदेहेतुः क्रियाविशेषःकालइतिव्यवह्रियतेसत्रेधाव्यवतिष्ठतेभूतोव
र्त्तमानोभविष्यन्निति तत्रपरमार्थकालेकालव्यपदेशोमुख्यः भूतादिव्य
पदेशोगौणः व्यवहारकालेभूतादिव्यपदेशोमुख्यः कालव्यपदेशोगौणः
क्रियावद्द्रव्यापेक्षत्वात्कालकृतत्वाच्च आह धर्माधर्माकाशपुद्गल
जीवकालानामुपकाराउक्ताः लक्षणंचोक्तंउपयोगलक्षणमित्येवमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्लवः ततः तंत्रीकृतवीणासुघोषादिसमुद्भवो वितत: तालकंस्यतालनाद्यभि
घातजः घनः वंशसंखादिनिमित्तः सौषिरः बंधो द्विविधः वैश्रसिकः प्रायो
गिकश्च पुरुषप्रयोगानपेक्षो वैश्रसिकः ॥ तद्यथा ॥ स्निग्धरूक्षत्वगुणनिमित्तो
विद्युदुल्काजलधराग्नींद्रधनुरादिविषयः पुरुषप्रयोगनिमित्तः प्रायोगिकः अजीववि
षयो जीवाजीवाजीवविषयश्चेति द्विविधस्तत्राजीवविषयो जतु
काष्ठादिलक्षणः जीवाजीवविषयः कर्मनोकर्मबंधः सौक्ष्म्यं द्विविधं
अंत्यमापेक्षिकं च तत्रांत्यं परमाणूनां आपेक्षिकं विल्वामलकबदरादीनां
स्थौल्यमपि द्विविधं अंत्यमापेक्षिकं चेति तत्रांत्यं जगद्व्यापिनि महास्कंधे
आपेक्षिकं बदरामलकविल्वतालादिषु संस्थानमाकृतिः तद्द्विविधमि १२९
त्थंलक्षणमनित्थंलक्षणं चेति वृत्तत्र्यस्रचतुरस्रायतपरिमं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उक्तानां रूपादिमत्त्वसिद्धेः सूत्रमिदमनर्थकमिति नैष दोषः नित्यावस्थिता
न्यरूपाणीत्यत्र धर्मादीनां नित्यत्वादिनिरूपणेन पुद्गलानामरूपित्वप्रसंगे त
दपाकरणार्थं तदुक्तं इदं तु तेषां स्वरूपविशेषप्रतिपत्त्यर्थमुच्यते अवशिष्टपु
द्गलविकारप्रतिपत्त्यर्थमिदमुच्यते ॥ शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतम
श्छायातपोद्योतवंतश्च ॥ शब्दो द्विविधो भाषालक्षणो विपरीतश्चेति भाषाल
क्षणो द्विविधः साक्षर अनक्षरश्चेति अक्षरीकृतः शास्त्राभिव्यंजकः संस्कृ
तविपरीतभेदादार्यम्लेच्छव्यवहारहेतुः अनक्षरात्मको द्वीन्द्रियादीनामत्
िशयज्ञानस्वरूपप्रतिपादनहेतुः स एषः सर्वः प्रायोगिकः अभाषात्मको द्विवि
धः प्रायोगिको वैस्रसिकश्चेति वैस्रसिको वलाहकादिप्रभवः प्रयोगिकश्च[illegible]
र्धा ततविततघनसौषिरभेदात् तत्र चर्म[illegible]निमित्तः पुष्करभेरीदर्दुरादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेद तमः छायातपोद्योतवंतः पुद्गला इत्यासंबंधः तेवः ...चेननोदनादिघ
गादयः पुद्गलपरिणामाः आगमे प्रसिद्धाः समुच्चीयंते तेषां पुद्गलानां भेद
प्रदर्शनार्थमाह ॥सूत्रं॥ अणवः स्कंधाश्च॥ एकदेशमात्रत्वाविस्पर्शादिपर्या
यप्रसवसामर्थ्येनाण्यंते शब्द्यंते इति अणवः सौक्ष्म्यादात्मादयः आत्ममध्या
आत्मांताश्च उक्तंच अत्तादिअत्तमज्झं अत्तंतं णेव इंदिएगिज्झं जं दव्वं
अविभागी तं परमाणुं वियाणेहि स्थूलत्वेन ग्रहणनिक्षेपणादि व्यापार
स्कंधा इति संज्ञायंते रूढौ क्रियाक्वचित्सती उपलक्षणत्वेनाश्रीयतइ
ति ग्रहणादिव्यापारायोग्या अपि द्व्यणुकादिषु स्कंधाख्या प्रवर्त्तते अनंतभेदा
अपि पुद्गला अणुजात्या स्कंधजात्या च द्वैविध्यमापद्यमानाः सर्वे गृह्यंतेइ १२६
ति तज्जात्याधारानंतभेदसंसूचनार्थं बहुवचनं क्रियते अणवः स्कंधाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कलादीवंलक्षणं अतोदृश्यमेघादीनांसंस्थानमनेकविधं इत्थमिदमितिनि
रूपणाभावादनित्थंलक्षणं भेदः षोढा उत्करचूर्णखंडचूर्णिकाप्रतराणुच
टनविकल्पात् तत्रोत्करः काष्ठादीनांकरपत्रादिभिरुत्करणं चूर्णो यव
गोधूमादीनां शकलकणिकादिः खंडो घटादीनां कपालशर्करादिश्चूर्णि
का माषमुद्गादीनां प्रतरोऽभ्रपटलादीनां अणुचटनं संतप्तायस्पिंडादय
योघनादिभिर्हन्यमानेषु स्फुलिंगनिर्गमः तमो दृष्टिप्रतिबंधकारणं प्रका
शविरोधि छाया प्रकाशावरणनिमित्ता सा द्वेधा वर्णादिविकारपरिणता प्र
तिबिंबमात्रात्मिका चेति आतपः आदित्यादिनिमित्तः उष्णप्रकाशात्मक
लक्षणः उद्योतश्चंद्रमणिखद्योतादिप्रभवः प्रकाशः त एते शब्दादय
ः पुद्गलद्रव्यविकाराः त एतेषां संतीति शब्दबंधसौक्ष्म्यस्थौल्यसंस्थान

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्राप्रणिहितचेतसः चर्याग्नायया। निषद्यासुप्राणिपीडापरिहारे नित्यमप्रमत्तचेत
सो मुनेस्तृणादिस्पर्शविक्षापरीषहविजयो वेदितव्यः अप्कायिकजंतुपीडापरिहा
रायामरणादस्नानव्रतधारः पटुरविकिरणप्रतापजनितप्रस्वेदाक्तपवनानीतपां
सुनिचयस्य सिध्मकच्छूदद्रुदीर्णकंडूयायामुत्पन्नायामपि कंडूयनविमर्दनसंघ
ट्टनविवर्जितमूर्तेः स्वगतमलोपचयपरगतमलापचययोरसंकल्पितमनसः
सम्यग्ज्ञानचारित्रविमलसलिलप्रक्षालनेन कर्ममलपंकनिराकरणाय नित्यमुद्य
तः मुनेः मलपीडासहनमाख्यायते सत्कारः पूजाप्रशंसात्मकः पुरस्कारो नामक्रि
यारंभादिष्वग्रतः करणमामंत्रणं वा तत्रानादरो मयि क्रियते चिरोषितब्रह्मचर्य।
स्य महातपस्विनः स्वपरसमयनिर्णयज्ञस्य बहुकृत्वः परवादिविजयिनः प्रण १९६
मभक्तिसंभ्रमासनप्रदानादीनि मे न कश्चित्करोतीति मिथ्यादृष्टय एवातीव भक्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

णिपुटमनपायत्नस्यावकुंठ्ठदिवसेषु बहुगृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसः दा
तृविशेषपरीक्षानिरुत्सुकस्य लाभादलाभो मे परमं तप इति संतुष्टस्यालाभविजयोऽवसेयः
सर्वाशुचिनिधानमिदमनित्यमपरित्राणमिति शरीरे निःसंकल्पत्वाद्विगतसंस्कार
स्य गुणरत्नभांडसंचयप्रवर्द्धनसंरक्षणसंधारणकारणत्वादभ्युपगतस्थितिविधा
नस्य अक्षम्रक्षणवद्व्रणानुलेपनवद्वा बहूपकारमाहारमभ्युपगच्छतः विरुद्धा
हारपानसेवनवैषम्यजनितवातादिविकाररोगस्य युगपदनेकशतसंख्यान
व्याधिप्रकोपे सत्यपि तद्वशवर्त्तितां विजहतः जल्लौषधिप्राप्त्याद्यनेकतपोवि
शेषर्द्धियोगे सत्यपि शरीरनिस्पृहत्वात्तत्प्रतीकारानपेक्षिणः रोगपरीषहसहनमव
गंतव्यं तृणग्रहणमुपलक्षणं कस्यचिद्व्यधनदुःखकारणस्य तेन शुष्कतृ
णपरुषशर्कराकंटकनिसितमृत्तिकाशूलादिव्यधनकृतपादवेदनाप्राप्तौ सत्यां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

शयोः।त्रिप्रदेशस्याणोश्चद्व्यणुकस्य वा एकसंघातात्त्रिप्रदेशः। एवंसंख्येयासंख्ये
यानंतानंतानांचसंघातात्तावत्प्रदेशः। एषामेवभेदात् द्विप्रदेशपर्यंताःस्कंधा उत्प
द्यंते। एवंभेदसंघाताभ्यांएकसमयिकाभ्यांद्विप्रदेशादयःस्कंधाउत्पद्यंते
अन्यतोभेदेनान्यस्यसंघातेनेति। एवंस्कंधानामुत्पत्तिर्निर्देशकः अणोरुत्प
त्तेर्हेतुप्रदर्शनार्थमाह॥भेदादणुः॥ सिद्धेविधिरारभ्यमाणोनियमार्थो भवति
अणोरुत्पत्तिर्भेदादेवनसंघातान्नापिभेदसंघाताभ्यामितिआह॥संघातादे
वस्कंधानामात्मलाभेसिद्धेभेदसंघातग्रहणमनर्थकमिति। तदुच्चारणप्रयोज
नप्रतिपादनार्थमिदमुच्यते॥भेदसंघाताभ्यांचाक्षुषः॥अनंतानंतपरमाणुसमुद
यनिष्पाद्योऽपिकश्चिच्चाक्षुषः तत्रयो ह्यचाक्षुषःसकथंचाक्षुषोभवतीतिचे
दुच्यतेभेदसंघाताभ्यांचाक्षुषःनभेदादितिकारणोपपत्तिरितिचेतद्ब्रुमः सूक्ष्मःस्कंध

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति भेदाभिधानं पूर्वोक्तसूत्रद्वये भेदसंबंधेनार्थस्य स्पर्शरसगंधवर्णवंतोऽणवः
स्कंधाः पुनः शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च स्प
र्शादिमंतश्चेति आह किमेषां पुद्गलानां अणुस्कंधलक्षणः परिणामो ऽनादिरु
त आदिमानिति उच्यते । स खलूत्पत्तिमत्वादादिमान् प्रतिज्ञायते यद्येवं तस्मादु
त्पद्यते कस्मान्निमित्तादुत्पद्यंत इति तत्र स्कंधानां तावदुत्पत्तिहेतुप्रति
पादनार्थमुच्यते ॥ भेदसंघातेभ्य उत्पद्यंते ॥ संघातानां द्वितयनिमित्तवशाद्
विदारणं भेदः पृथग्भूतानां एकत्वापत्तिः संघातः ननु च द्वित्वाद् द्विवचनेन भ
वितव्यं बहुवचननिर्देशस्त्रितयसंग्रहार्थः भेदात् संघातात् संघातात् भेदा
संघाताभ्यां च उत्पद्यंत इति तद्यथा द्वयोः परमाण्वोः संघातात् द्विप्रदेशः स्कं
धः उत्पद्यते द्विप्रदेशस्याणोश्च त्रयाणां वा अणूनां संघातात् त्रिप्रदेशः द्वयोर्द्विप्रदे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाभाव ... क्ता

यद्येवं युक्तं सदिति आह । भेदे सति युक्तशब्दो दृष्टः । यथा दंडेन युक्तो देव
दत्त इति तथा सति तेषां त्रयाणां तैर्युक्तस्य द्रव्यस्य चाभावः प्राप्नोति नैष दोषः
अभेदेऽपि कथंचिद्भेदनयापेक्षया युक्तशब्दो दृष्टः यथा सारयुक्तः स्तंभ इति
। तथा सति तेषामविनाभावात्सद्व्यपदेशो युक्तः समाधिवचनो वा युक्तश
ब्दः युक्तः समाहितः तदात्मक इत्यर्थः उत्पादव्ययध्रौव्ययुक्तं सत् । उत्पादव्य
यध्रौव्यात्मकमिति यावत् । एतदुक्तं भवति उत्पादादीनि द्रव्यस्य लक्षणा
नि द्रव्यं लक्ष्यं तत्र पर्यायार्थिकनयापेक्षया परस्परतो द्रव्याच्चार्थांतरभाव
: द्रव्यार्थिकनयाव्यतिरेकेणानुपलब्धेः । अनर्थांतरभाव इति लक्ष्यलक्ष
णभावाभावसिद्धिः आह नित्यावस्थितान्यरूपाणीत्युक्तं तत्र न ज्ञायते किं
नित्यमित्यत आह ॥ तद्भावाव्ययं नित्यं तद्भावाव्ययं नित्यं ॥ तद्भाव इत्युच्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिणामस्य स्कंधस्य तदेशोऽस्याः परिस्पाणद्वाः स्कंधद्वये मेव सोऽस्य परिणतः पुनरे
परः सत्यपि तस्मिन् देहस्य संघातांतरसंयोगान्मोऽस्याः परिणामोपरमेस्यो स्यैपोऽस्य
नौ वा स्कंधोत्तवति आह धर्मादीनां द्रव्याणां विशेषलक्षणानुक्तानि । साधान्य
लक्षणं नोक्तं तदुक्तं वक्तव्यं उच्यते ॥ सद्द्रव्यलक्षणमिति ॥ यत्सत्तद्द्रव्यमित्यर्थः
यद्येवं तदेव तावद्वक्तव्यं किं सदित्यत आह ॥ उत्पादव्ययध्रौव्ययुक्तं स
त् ॥ चेतनस्याचेतनस्य वा द्रव्यस्य स्वां जातिमजहतः निमित्तवशात् भावांतरावा
प्तिरुत्पादनमुत्पादः । मृत्पिंडस्य घटपर्यायवत् । तथा पूर्वभावविगमनं व्य
यः । यथा घटोत्पत्तौ पिंडाकृतेः अनादिपारिणामिकस्वभावेन व्ययोदया
भावात् । ध्रुवति स्थिरीभवतीति ध्रुवः ध्रुवस्य भावः । कर्मणा ध्रौव्यं यथा
मृत्पिंडघटाद्यवस्थासु मृदाद्यन्वयात् । तैरुत्पादव्ययध्रौव्यैर्युक्तं सत्पादव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीतमित्यविवक्षितमनर्पितं प्रयोजनाभावात् सतोप्यविवक्षा भवतीति उप
सर्जनीभूतमनर्पितमित्युच्यते अर्पितं चानर्पितं च अर्पितानर्पिते ताभ्यां सि
द्धेः अर्पितसिद्धेर्नास्ति विरोधः तद्यथा एकस्य देवदत्तस्य पिता पुत्रो भ्राता
भागिनेय इत्येवमादयः संबंधा जनकत्वजन्यत्वादिनिमित्ता न विरुध्यंते अर्पणा
भेदात् पुत्रापेक्षया पिता पित्रपेक्षया पुत्र इत्येवमादि तथा
द्रव्यमपि सामान्यार्पणया नित्यं विशेषार्पणयाऽनित्यमिति नास्ति विरो
धः तौ च सामान्यविशेषौ कथंचिद्भेदाभेदाभ्यां व्यवहारहेतू भवतः अत्राह
सतोऽनेकनयव्यवहारतंत्रत्वात् उपपन्ना भेदसंघातेभ्यः सतां स्कंधानामुत्
पत्तिरिदं तु संदिग्धं किं संघातः संयोगादेव द्व्यणुकादिलक्षणो भवति उ १२१
त कश्चिद्विशेषोऽवध्रियत इत्युच्यते सति संयोगे बंधादेकत्वपरिणामकृतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेकस्तद्भावःप्रत्यभिज्ञानहेतुतातदेवेदमितिस्मरणंप्रत्यभिज्ञानंतदकस्मा
न्नभवतीतियोस्यहेतुःसतद्भावःभवनंभावःतस्यभावःतद्भावः।येनात्मनाप्राग्दृ
ष्टंवस्तुतेनैवात्मनापुनरपिभावात् तदेवेदमितिप्रत्यभिज्ञायतेयद्यत्यंतनिरोधो
ऽभिनवप्रादुर्भावमात्रमेववास्यात्ततःस्मरणानुपपत्तिः।तदधीनोलोकसंव्यव
हारोविरुध्यतेततस्तद्भावेनाव्ययंनित्यमितिनिश्चीयतेतत्तुकथंचिद्वेदितव्यंस
र्वथानित्यत्वेअन्यथाभावाभावात्।संसारतद्विनिवृत्तिकारणप्रक्रियाविरोधः
स्यात्।नन्विदमेवविरुद्धंतदेवनित्यंतदेवानित्यमितियदिनित्यंव्ययोदया
भावात् अनित्यताव्याघातः।अथानित्यमेवस्थित्यभावात्।नित्यताव्याघात
इतिनैतद्विरुद्धंकुतः॥अर्पितानर्पितसिद्धेः॥अनेकांतात्मकस्यवस्तुनः
प्रयोजनवशाद्यस्यकस्यचिद्धर्मस्यविवक्षयाप्रापितंप[illegible]न्यमर्पितमुप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णापितेगुणाः परमाणवःसंति यथातोयाऽजागोमहिष्युष्ट्रकाक्षीरघृतेषुस्ने
हगुणः प्रकर्षाप्रकर्षेणप्रवर्त्तते पांसुकणिकाशर्करादिषुचरूक्षगु
णोदृष्टः तथापरमाणुष्वपिस्निग्धरूक्षगुणयोर्वृत्तिः प्रकर्षाप्रकर्षेणानु
मीयते स्निग्धरूक्षत्वगुणनिमित्तोबंधः अविशेषेणप्रसक्ते अनिष्टगुणनिवृ
त्त्यर्थमाह नजघन्यगुणानां जघन्योनिकृष्टः गुणोभागः जघन्योगुणो
येषांतेजघन्यगुणाः जघन्यगुणानांनास्तिबंधः तद्यथा एकगुणस्निग्ध
स्यैकगुणस्निग्धेनद्व्यादिसंख्येयासंख्येयानंतगुणस्निग्धेनवानास्तिबंधः
तस्यैवैकगुणस्निग्धस्यैकगुणरूक्षेणद्व्यादिसंख्येयासंख्येयानंतगुण
रूक्षेणवानास्तिबंधः तथाएकगुणरूक्षस्यापियोज्यमिति एतौजघ १३०
न्यगुणस्निग्धरूक्षौवर्जयित्वाअन्येषांस्निग्धानांरूक्षाणांचपरस्परेणबं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्संघातान्निष्पद्यंते यद्येवमिदमुच्यतां किं नु च खलु तज्जात्यपरित्यागे सं
योगे च सति तत्त्वति केषांचिद्बंधः अन्येषां च नेत्युच्यते यस्मात्तेषां तु तज्जात्या
द विशेषेप्यनंतपर्यायाणां परस्परविलक्षणपरिणामादित्यसामर्थ्यात्तत्
वदुपनीतः स्निग्धरूक्षत्वाद्बंधः बाह्याभ्यंतरकारणवशात् स्नेहपर्या
याविर्भावात् स्निह्यते स्मेति स्निग्धः तथा रूक्षणाद्रूक्षः स्निग्धश्च रूक्षश्च
स्निग्धरूक्षौ तयोर्भावः स्निग्धरूक्षत्वं स्निग्धत्वं चिक्कणगुणलक्षणः पर्या
यः तद्विपरीतपरिणामो रूक्षत्वं स्निग्धरूक्षत्वादिति हेतुनिर्देशः तत्कृतो बं
धो द्व्यणुकादिपरिणामः द्वयोः स्निग्धरूक्षयोः अण्वोः परस्परश्लेषलक्षणे
बंधे सति द्व्यणुकस्कंधो भवति एवं संख्येयासंख्येयानंतप्रदेशाः स्कंधा योज्याः
तत्र स्नेहगुणः एकद्वित्रिचतुःसंख्येयासंख्येयानंतविकल्पः तथा रूक्षगु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा नास्ति बंधः चतुर्गुणस्निग्धेन पु-
नरस्ति बंधः तस्यैव पुनर्द्विगुणस्निग्धस्य पंचगुणस्निग्धेन षट्सप्ताष्टसंख्ये-
यानंतगुणस्निग्धेन वा बंधो नास्ति एवं त्रिगुणस्निग्धस्य पंचगुणस्निग्धेन बं-
धोऽस्ति शेषैः पूर्वोत्तरैर्नास्त्येव तिचतुर्गुणस्निग्धेन अस्ति बंधः शेषैः पूर्वोत्तरै-
र्नास्ति एवं शेषेष्वपि योज्यं तथा द्विगुणरूक्षस्य एकद्वित्रिगुणरूक्षेण नास्ति
बंधः चतुर्गुणरूक्षेणास्ति बंधः तस्यैव द्विगुणरूक्षस्य पंचगुणरूक्षादि-
भिरूक्षैर्नास्ति बंधः एवं त्रिगुणरूक्षादीनामपि द्विगुणाधिके बंधो योज्यः
एवं भिन्नजातीयेष्वपि योज्यं उक्तं च णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स
लुक्खेण दुराहिएण णिद्धस्स लुक्खेण हवेदि बंधो जहण्णवज्जो विसमे समे वा
तुशब्दो विशेषणार्थः प्रतिषेधं व्यावर्तयति बंधं च विशेषयतीति किमर्थमधि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षे भवती त्यविशेषेण प्रसंगे तत्रापि प्रतिषेधविषयख्यापनार्थमाह ॥ गुणसा
म्ये सदृशानां ॥ सदृशग्रहणं तुल्यजातीयसंप्रत्ययार्थं गुणसाम्यग्रहणं तुल्य
भागसंप्रत्ययार्थं । तदुक्तं भवति द्विगुणस्निग्धानां द्विगुणस्निग्धैः द्विगुणरू
क्षाणां द्विगुणरूक्षैश्चेत्येवमादिषु नास्ति बंध इति यद्येवं सदृशग्रहणं कि
मर्थं गुणवैषम्ये बंधप्रतिपत्त्यर्थं सदृशग्रहणं क्रियते अतो विषमगुणानां तु
ल्यजातीयानामतुल्यजातीयानां च अनियमेन बंधप्रसक्तौ इष्टार्थसं
प्रत्ययार्थमिदमुच्यते ॥ द्व्यधिकादिगुणानां तु ॥ द्वाभ्यां गुणाभ्यामधिको द्व्यधि
कः कः पुनरसौ चतुर्गुणः आदिशब्दः प्रकारार्थः द्व्यधिकता तेन पंचगुणादी
नां संप्रत्ययो न भवति तेन द्व्यधिकादिगुणानां तुल्यजातीयानामतुल्यजाती
यानां च बंध उक्तो भवति नेतरेषां तद्यथा द्विगुणस्निग्धस्य परमाणोः एक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC-0. In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणपर्ययाः तस्य संततिः

तत्परेणइकारेणउ लक्षणप्रतिपत्त्यर्थमाह गुणपर्ययवद्द्रव्यं ॥ गुणाश्च पर्य
याश्च गुणपर्ययवद्द्रव्यं अनुमतौ कस्मान्नाव्युत्पत्त्यवसमाधिः कथंचिद्भेदोप
पत्तेरिति के गुणाः के पर्यायाः अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः तत्त्वये
रूपेतं तच्चाभिन्नं उक्तं च गुण इदि दव्वविहाणं दव्वविकारो हि पज्जवो भणिदो
तेहि अणूणं दव्वं अजुदपसिद्धं हवदि णिच्चं इति एतदुक्तं भवति द्रव्यं द्र
५४ व्यान्तराद्येन विशेष्यते स गुणः तेन हि तद्द्रव्यं विधीयते असति तस्मिन् द्र
व्यसंकरप्रसंगात् तद्यथा जीवपुद्गलादिभ्यः ज्ञानादिभिर्गुणैर्विशिष्य
ते पुद्गलादयश्च रूपादिभिः ततश्चाविशेषे संकरः स्यात् ततः सामान्या
पेक्षया अन्वयिनो ज्ञानादयो जीवस्य गुणाः पुद्गलादीनां च रूपादयः तेषां १२२
विकाराः विशेषात्मना भिद्यमानाः पर्यायाः घटज्ञानं पटज्ञानं क्रोधो मा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कगुणविषयो बंधो व्याख्यातः न समगुणविषय इत्यत आह बंधेधिकौ पारि
णामिकौ अधिकाराद्गुणशब्दः संबध्यते अधिकौ गुणावधिकाविति भावां
तरापादनं पारिणामिकत्वं क्लिन्नगुडवत् यथा क्लिन्नो गुडोधिकमधुररसः परि
तानां रेण्वादीनां स्वगुणोत्पादनात् पारिणामिकः तथान्योप्यधिकगुणः अल्पीय
सः पारिणामिक इति कृत्वा द्विगुणादिस्निग्धरूक्षस्य चतुर्गुणादिस्निग्धरू
क्षः पारिणामिको भवति ततः पूर्वावस्थाप्रच्यवनपूर्वकं तार्तीयिकमवस्थांत
रं प्रादुर्भवतीत्येकत्वमुपपद्यते इतरथा हि शुक्लकृष्णतंतुवत् संयोगे स
त्यप्यपारिणामिकत्वात् सर्वं विविक्तरूपेणैवावतिष्ठते उक्तेन विधिना
बंधे पुनः सति ज्ञानावरणादीनां कर्मणां त्रिंशत्सागरोपमकोटीकोट्यादि
स्थितिरुपपन्ना भवति उत्पादव्ययध्रौव्ययुक्तं सदिति सल्लक्षणमुक्तं पु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेद्विधय एव द्रव्याध्यवसाये प्रसक्ते अनुक्तकालद्रव्यसंग्रहार्थमिदमाह ।१
कालश्च किं द्रव्यमिति वाक्यशेषः उक्तलक्षणोपेतत्वात् द्विविधलक्ष
णमुक्तं । उत्पादव्ययध्रौव्ययुक्तं सत् । गुणपर्ययवद्द्रव्यमिति च तदुभयल
क्षणं कालस्य विद्यते ॥ तद्यथा ॥ ध्रौव्यं तावत्कालस्य स्वप्रत्ययं स्वभावव्य
वस्थानात् व्ययोदयौ परप्रत्ययौ अगुरुलघुगुणवृद्धिहान्यपेक्षया स्व
प्रत्ययौ च तथा गुणा अपि कालस्य साधारणासाधारणरूपाः सं
ति । तत्रासाधारणो वर्तनाहेतुत्वं साधारणाश्च अचेतनत्वामूर्तत्वसू
क्ष्मत्वागुरुलघुत्वादयः । पर्यायाश्च व्ययोत्पादलक्षणा योज्याः तस्मात्
द्विप्रकारलक्षणोपेतत्वात् । आकाशादिवत् कालस्य द्रव्यत्वं सिद्धं तस्य
अस्तित्वलिंगं धर्मादिवत् । व्याख्यातवर्तनालक्षणः काल इति ननु किम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नः वर्णो गंधः तीव्रो मंद इत्येवमादयः तेष्वन्यच्चैकत्वं विरुध्यमानः समुद
दायोऽध्यवायादेशलाकयदिदि सर्वेषां समुदायोऽनर्थांतरत्वं तत्रैवस्यात्
सर्वाभावः सात्तत्वस्थापरस्परविलक्षणानां समुदाये सति एकानर्थांत
रत्वात् समुदयस्य सर्वाभावः परस्परतोऽनर्थांतरत्वात् यदिदं तस्मा
दर्थांतरत्वाः रसादयः ततः समुदयोऽनर्थांतरत्वतः यस्मात् रसादिस्यो
ऽर्थांतरत्वाद्रूपादनर्थांतरत्वतः सकंधरसादिस्योऽर्थांतरत्वोनत्वे
तत्तत्वस्वरूपमाचं समुदायः प्रसक्तः नचैकं रूपं समुदायो न विरुद्धमर्दे
विरतः समुदायाभावः समुदायाभावाच्च तदनर्थांतरत्वानां समुदा
यिनामप्यभावः इति सर्वाभावः एवं स्पर्शादिष्वपि योज्यं तस्मात्समुदाय
पितताकथंचिदर्थांतरतापतिपत्तव्यः तत्कार्णानांऽव्याप्तां लक्षणनिर्द्दिष्टा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

थमस्यस्यात् तस्मात् घटिकादिकालो देशः क्रियते अनेकद्रव्यत्वे सति किम
स्य प्रमाणं लोकाकाशस्य यावंतः प्रदेशाः तावंतः कालाणवः निःक्रियाः ॥ ए
कैकाशप्रदेशे एकैकवृत्त्या लोकं व्याप्य व्यवस्थिताः ॥ उक्तं च ॥ लोगास
पदेसइक्केक्केजे ठिदा हु इक्किक्का रयणाणारासी विव ते कालाणू मुणेयव्वा ॥ रू
पादिगुणविरहादमूर्त्ताः। वर्तनालक्षणस्य मुख्यकालस्य प्रमाणमुक्तं परि
माणादिगम्यस्य व्यवहारकालस्य किं प्रमाणमिति। अत इदमुच्यते ॥ सोऽनंतसम
यः संप्रतिकालस्यैकसमयिकत्वेपि अतीतानागतअनंतसमयाः ॥ अतीतानाग
तापेक्षया अनंतसमय इत्युच्यते। अथवा मुख्यस्यैककालस्य प्रमाणावधा
रणार्थमिदमुच्यते। अनंतपर्यायवर्तनाहेतुत्वादेकोपि कालाणुरनंत १२४
इत्युपचर्यते। समयः पुनः परमनिरुद्धः कालांशस्तस्य व्ययविशेषश्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्थमयं कालः षड्गुणास्ते यथैव धर्मादयः उक्ताः तथैवायमपि वक्तव्यः प्र
अजीवकाधर्माकाशकालपुद्गलाः इति नैवं शक्यं तत्रोपदेशमति काल
पुद्गलाः इति नैवं शक्यं तत्रोपदेशमति कायत्वमस्य स्यात् नेष्यते च मुख्यो
पचारप्रदेशप्रचयकल्पनाभावात् धर्मादीनां तावत् मुख्यप्रदेशप्रच
य उक्तः असंख्येयाः प्रदेशा इत्यादिना अणोरप्येकप्रदेशस्य पूर्वोत्तरभा
वप्रज्ञापननयापेक्षया उपचारकल्पनया प्रदेशप्रचय उक्तः काल
स्य तु न द्विधापि प्रदेशप्रचयकल्पना नास्तीत्यकायत्वं अपि च तत्र घ्यावे
निःक्रियाणि चेत्यत्र धर्मादीनां आकाशान्तानां निःक्रियत्वप्रतिपादिते
इतरेषां जीवपुद्गलानां सक्रियत्वप्राप्तिवत् कालस्यापि सक्रियत्वं स्यात्
आ आकाशात् प्राक्कालग्रहिष्यते आ आकाशादेकद्रव्याणीति एकद्रव्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

द्रव्यथ्यपि कथंचिद्व्यपदेशादिभेदहेतुत्वापेक्षया द्रव्यादन्ये, तथापि तद्व्यति
रेकात्तत्परिणामाच्च नान्ये यद्येवं स उच्यतां कः परिणाम इति तन्निश्चयार्थमि
मिदमुच्यते धर्मादीनि द्रव्याणि येनात्मना भवंति स तद्भावस्तत्त्वं परिणाम इति
आख्यायते स द्विविधोऽनादिरादिमांश्च तत्रानादिर्धर्मादीनां गत्युपग्रहा
दिसामान्यापेक्षया स एवादिमांश्च भवति विशेषापेक्षया ॥ इति तत्त्वार्थ
वृत्तौ सर्वार्थसिद्धिसंज्ञिकायां पंचमोऽध्यायः ॥५॥ अथाजीवपदार्थो व्याख्या
तः ॥ ५ ॥ श्रीं नमः ॥ इदानीं तदनंतरोद्देशभाजा आस्रवपदार्थो व्याख्येय
इति तत्प्रसिद्ध्यर्थमिदमुच्यते कायवाङ्मनःकर्म योगः ॥ कायादय
ः शब्दा व्याख्यातार्थाः कर्म क्रियेत्यनर्थांतरं कायवाङ्मनसां कर्म काय
वाङ्मनस्कर्म योग इत्याख्यायते आत्मप्रदेशपरिस्पंदो योगः स निमि १३५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वलिकादिष्वगतत्वात्। आद्ये गुणपर्ययवद्द्रव्यमिति सूक्तं तत्र के गुणा इत्यत्रो
च्यते॥ द्रव्याश्रया निर्गुणा गुणाः॥ द्रव्यमाश्रयो येषां ते द्रव्याश्रयाः निःक्रा
न्ता गुणेभ्यो निर्गुणाः एवमुभयलक्षणोपेता गुणा इति निर्गुणा इति विशेषणं
द्व्यणुकादिनिवृत्त्यर्थं तान्यपि हि कारणभूतपरमाणुद्रव्याश्रयाणि गुण
वंति तस्मान्निर्गुणा इति विशेषणात्तानि निवर्त्तितानि भवंति ननु पर्याया
अपि घटसंस्थानादयो द्रव्याश्रया निर्गुणाश्च तेषामपि गुणत्वं प्राप्नो
ति द्रव्याश्रया इति वचनान्नित्यं द्रव्यमाश्रित्य वर्त्तंते गुणा इति विशेषणा
त् पर्याया निवर्त्तिता भवंति ते हि कादाचित्काः इति असकृत्परिणामश
ब्दः उक्तः तस्य कोऽर्थः इति प्रश्नेऽत्रेदमाह॥ तद्भावः परिणामः॥ अथवा गु
णाः द्रव्यादर्थांतरभूताः इति केषांचिद्दर्शनं तत्किं तव॰ अभिमतं नेत्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ख्यते योयं योगशब्दाभिधेयः संसारिणस्तु कर्षस्यः ॥ स आस्रवः ॥ यथा सरःसलि
लावाहिद्वारं तदास्रवणकरणत्वात् । आस्रव इत्याख्यायते यथा योगप्रणा
लिकया आत्मनः । कर्म्म आस्रवतीति योग आस्रव इति व्यपदेशमर्हतीति अ
र्हति अथ कर्म्म द्विविधं पुण्यं पापं चेति तस्य किं भविशेषेण योग आस्रव
हेतुः । आहोस्विदस्ति कश्चित्प्रतिविशेषः इत्युच्यते ॥ शुभः पुण्यस्या
शुभः पापस्य ॥ कः शुभो योगः को वा अशुभः प्राणातिपातादत्तादानमैथु
नादिः अशुभः काययोगः । अनृतभाषणपरुषासत्यवचनादिः अशुभो
वाग्योगः वधचिंतनेर्ष्यासूयादिरशुभो मनोयोगः । ततो विपरीतः शुभ
ः कथं योगस्य शुभाशुभत्वं शुभपरिणामनिर्वृत्तो योगः शुभः अशुभपरि १३६
णामनिर्वृत्तश्चाशुभः न पुनः शुभाशुभकर्मकारणत्वेन यद्येवमुच्यते शु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेतदा त्रिधा भिद्यते काययोगो वाग्योगो मनोयोग इति। तत्र वीर्यांतरायक्ष
योपशमसद्भावे सति औदारिकादिसप्तविधकायवर्गणान्यतमालंबना
पेक्ष आत्मप्रदेशपरिस्पंदः काययोगः। शरीरनामकर्मोदयापादितवाग्व
र्गणालंबने सति वीर्यांतरायमत्यक्षराद्यावरणक्षयोपशमापादिताभ्यं
तरवाग्लब्धिसांनिध्ये वाक्परिणामाभिमुखस्यात्मनः। प्रदेशपरिस्पंदो वाग्
योगः। अभ्यंतरवीर्यांतरायनोइंद्रियावरणक्षयोपशमात्मकमनोलब्धि
सन्निधाने बाह्यनिमित्तमनोवर्गणालंबने च सति मनःपरिणामाभिमुख
स्यात्मनः प्रदेशपरिस्पंदो मनोयोगः। क्षयेपि त्रिविधवर्गणापेक्षः सयोगके
वलिनः आत्मनः प्रदेशपरिस्पंदो योगो वेदितव्यः। आह अभ्युपेमः आहि
तत्रैविध्यक्रियायोग इति प्रकृत इदानीं निर्दिश्यतां किंलक्षण आस्रव इत्यु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्मसांपरायिकं कर्मेर्यापथादियोगोत्पत्तिरित्यर्थः। तद्द्वारकं कर्म ईर्याप
थं संपरायिकेर्यापथे तयोः सांपरायिकेर्यापथयोः। यथासंख्यमभिसं
बंधः सकषायस्यात्मनो मिथ्यादृष्ट्यादेः सांपरायिकस्य कर्मण आस्रवो
भवति अकषायस्योपशांतकषायादेरीर्यापथस्य कर्मण आस्रवो भ
वति। आदावुद्दिष्टस्यास्रवस्य भेदप्रतिपादनार्थमाह॥ इंद्रियकषा
याव्रतक्रियाः पंचचतुःपंचपंचविंशतिसंख्याः पूर्वस्य भेदाः॥ अत्र इंद्रि
यादीनां पंचादिभिर्यथासंख्यमभिसंबंधो वेदितव्यः। इंद्रियाणि पंच चत्वा
रः कषायाः पंच अव्रतानि पंचविंशतिक्रिया इति तत्र पंचेंद्रियाणि स्प
र्शनादीनुक्तानि चत्वारः कषायाः क्रोधादयः पंच अव्रतानि प्राणव्यपरो
पणादीनि वक्ष्यंते। पंचविंशतिक्रिया उच्यंते। चैत्यगुरुप्रवचनपूजादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तयोगएवनस्यात्शुभयोगस्यापिज्ञानावरणादिबंधहेतुत्वाभ्युपगमात्शुभ
सुमानंपृडुलोद्वेनेनतिवाञ्छएवंतत्सद्वेद्यादिघातिरक्षनिश्चात्मानश्शुत्नादि
तिपापंतदसद्वेद्यादि आदकिमर्थमाश्रवःसर्वसंसारसमानफलारंसदे
उरादेश्चित्कश्चिदस्तिप्रतिविशेषइत्यवोच्यते॥सकषायाकषाययो
:सांपरायकेर्यापथयोः॥स्वामितेदात्।आश्रवभेदःस्वामिनौद्वौसक
षायश्चअकषायश्चेतिकषायःक्रोधादिकषायइवकषायःकउपमार्थः
तथाकषायोन्यग्रोधादिश्लेषहेतुस्तथाक्रोधादिरपिआत्मनः।कर्मश्ले
षहेतुत्वात्कषायइवकषायइत्युच्यंते।सहकषायेणवर्त्ततइतिस
कषायः।नविद्यतेकषायोस्येतिअकषायःसकषायश्चअकषायश्च
सकषायौतयोःसकषायाकषाययोःसंपरायःसंसारःतत्प्रयोजनंक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्गकरणं समंतानुपातक्रिया। अप्रमृष्टादृष्टभूमौ कायादिनिक्षेपोऽनाभोगक्रि
या। ता एताः पंच क्रियाः। यत्परेण निर्वर्त्यां क्रियां स्वयं करोति सा स्वहस्तक्रि
या। पापादानादिप्रवृत्तिविशेषाभ्यनुज्ञानं निसर्गक्रिया। पराचरितसावद्या
दिप्रकाशनं विदारणक्रिया। यथोक्तामाज्ञामावश्यकादिषु चारित्रमोहोद
यात्। कर्त्तुमशक्नुवतोऽन्यथाप्ररूपणादाज्ञाव्यापादिकी क्रिया। साठ्या
लस्याभ्यां प्रवचनोपदिष्टविधिकर्त्तव्यताऽनादरोऽनाकांक्षाक्रिया। ता एता
ताः पंच क्रियाः। छेदनभेदनविसर्जनादिक्रियापरत्वं अन्येन वारंभे क्रिय
माणे प्रहर्षः प्रारंभक्रिया। परिग्रहाविनाशार्था पारिग्राहिकी क्रिया। ज्ञान
दर्शनादिषु निकृतिर्वंचनं मायाक्रिया। अन्यं मिथ्यादर्शनकरणकारण
विष्टं प्रशंसादिभिः दृढयति यथा साधु करोषीति सा मिथ्यादर्शनक्रिया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri.

लक्षणासम्यक्त्ववर्द्धनीक्रियासम्यक्त्वक्रियअन्यदेवतास्तवनादिरूपामिथ्या
त्वहेतुकाकर्मप्रवृत्तिमिथ्यात्वक्रियागमनागमनादिप्रवर्त्तनंकायादिभिःप्र
प्रयोगक्रिया।संयतस्यसतःअविरतिंप्रत्याभिमुख्यंसमादानक्रियाईर्या
पथनिमित्तेर्यापथक्रियाताःएताःपंचक्रियाःक्रोधावेशात्प्रादोषिकीक्रि
याप्रदुष्टस्यसतोऽभ्युद्यमःकायिकीक्रियाहिंसोपकरणादानादाधिका
रिणिकीक्रियादुःखोत्पत्तितंत्रत्वात्।पारितापिकीक्रियाआयुरिंद्रियबलो
च्छ्वासनिश्वासप्राणानांवियोगकरणात्प्राणातिपातिक्रिया।ताएताःपंच
क्रियाः।रागार्द्रीकृतत्वात्प्रमादिनोरमणीयरूपालोकनाभिप्रायोद
र्शनक्रियाप्रमादवशात्स्पृष्टव्यसंचेतनानुबंधःस्पर्शनक्रिया।अपूर्वाधिक
रणोत्पादनात्प्रात्ययिकीक्रिया।स्त्रीपुरुषपशुसंपातिदेशेंतर्मलोत्स

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णद्रव्यमित्यर्थः। द्रव्यस्य स्वशक्तिविशेषो वीर्यं भावशब्दः सूत्रे परिसमाप्य
ते तीव्रभावः मंदभावः। इत्यादि। एतेषां तस्या अवस्थाविशेषो भवति कार
णेनेदाधिकार्यभेद इति अथ यद् अधिकरणमुक्तं तस्य स्वरूपमनिर्ज्ञातं।
अतस्तद्वक्तव्यमिति। अत एतदुत्तियादनद्वारेणाधिकरणस्वरूपनि
र्ज्ञानार्थमाह॥ अधिकरणं जीवाजीवाः॥ उक्तलक्षणा जीवाजीवाः
यथोक्तलक्षणाः पुनर्द्विवचनं किमर्थं अधिकरणविशेषज्ञापनार्थं पुन
र्वचनं जीवाजीवा अधिकरणमित्ययं विशेषो ज्ञापयितव्य इति। कः पु
नरसौ हिंसाद्युपकरणभाव इति स्यात् तन्मूलपदार्थयोर्द्वित्वात् जीवा
जीवा इति द्विवचनं न्याय्यं प्राप्तमिति। तत्पर्यायाणामधिकरणत्वात् १३९
।येनकेनचित्पर्यायेण विशिष्टं द्रव्यं तदधिकरणं न सामान्यमिति व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं प्रथमघातिकर्म्मोदयवशादनिवृत्तिरप्रत्याख्यानक्रिया ता एताः पंच
विंशतिक्रियाः। एतानींद्रियादीनि कार्यकारणभेदात् भेदमापद्यमाना
नि सांपरायिकस्य कर्म्मणः। आश्रवद्वाराणि भवंति अत्र आह योगत्रयरू
पस्य सर्वात्मकार्यत्वात्। सर्वेषां संसारिणां साधारणः ततो बंधफलानुभव
नं प्रत्यविशेषः इत्यत्रोच्यते नैतदेवं यस्मात्सत्यपि प्रत्यात्मसंभवे तेषां जी
वपरिणामेभ्योऽनंतविकल्पेभ्यो विशेषोऽभ्यनुज्ञायते कथमिति चे
दुच्यते॥ तीव्रमंदज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः
॥ बाह्याभ्यंतरहेतूदीरणवशादुद्रिक्तः परिणामः। तीव्रः तद्विपरीतो मं
दः। अयं प्राणी मया हंतव्य इति। ज्ञात्वा प्रवृत्तिः ज्ञातमित्युच्यते मदात्प्र
मादाद्वाऽनवबुध्य प्रवृत्तिरज्ञातं अधिक्रियंते तस्मिन्नर्था इत्यधिकर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ममेति संबंधस्ते संरंभसमारंभारंभास्त्रयः। योगास्त्रयः कृतकारितानुमता
स्त्रयः। कषायाश्चत्वार इति एतेषां गुण्यावृत्तिः साचाष्टोत्तरशतप्रकारा इति वि
शेषा निर्दिष्टाः। एकैकं आदिभेदान्नयेदित्यर्थः॥ तद्यथा॥ क्रोधकृतकाय(
संरंभः। मानकृतकायसंरंभः। मायाकृतकायसंरंभः। लोभकृतकाय
संरंभः। क्रोधकारितकायसंरंभः। मानकारितकायसंरंभः। मायाका
रितकायसंरंभः। लोभकारितकायसंरंभ। क्रोधानुमतकायसंरंभः।
मानानुमतकायसंरंभः। मायानुमतकायसंरंभः। लोभानुमतकायसं
रंभश्चेति। द्वादशधा कायसंरंभः। एवं वाग्योगे मनोयोगे च द्वादशधा सं
रंभः। तदेते संपिंडिताः षट्त्रिंशत् तथा समारंभा अपि षट्त्रिंशत्। तथा
आरंभस्यापि षट्त्रिंशत् एते संपिंडिता जीवाधिकरणास्रवभेदाः अष्टो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुवचनमुक्तं जीवाजीवावधिकरणं कस्य आस्रवस्य स्यस्यार्थवशादभिसंबं
धोभवति तत्रजीवाधिकरणभेदप्रतिपत्त्यर्थमाह:॥ आद्यंसंरंभस मा
रंभारंभयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकश:
॥ प्राणव्यपरोपणादिषुप्रमादवत: प्रयत्नावेश: संरंभ: साधनसमभ्या
सीकरणंसमारंभ: प्रक्रम: आरंभ: योगशब्दो व्याख्यातार्थ: कृतवचनं
स्वातंत्र्यप्रतिपत्त्यर्थं कारिताभिधानं परप्रयोगापेक्षं अनुमतशब्द: प्रयो
जकस्य मानसपरिणामप्रदर्शनार्थ: अभिहितलक्षणा: कषाया: क्रो
धादय: विशिष्यतेऽर्थोऽनेनेति विशेष: स प्रत्येकमभिसंबध्यते
संरंभविशेष: समारंभविशेष इत्यादि आद्यंजीवाधिकरणमेतैर्विशे
षैर्भिद्यत इति वाक्यशेष: ॥ तेचत्वार: सुजंता: त्रिआदिनमष्टायघाक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तः तद्विपरीतो मानुषस्यायुष इति संक्षेपः तस्य व्यासः वि[illegible]ावः प्रकृति
भद्रता प्रगुणव्यवहारता तनुकषायत्वं मरणकालासंक्लेशतादिः ॥ किमेता
वानेव मानुषस्यायुषः आस्रव इत्यत्रोच्यते ॥ स्वभावमार्दवं च ॥ मृदोर्भा
वः मार्दवं स्वभावेन मार्दवं स्वभावमार्दवं उपदेशानपेक्षमित्यर्थः एतदपि मा
नुषस्यायुषः आस्रवः पृथग्योगकरणं किमर्थं उत्तरार्थं देवस्यायुषः आ
स्रवोऽयमपि यथा स्यात् किमेतदेव द्वितयं मानुषस्यास्रवः नेत्युच्यते ॥ निः
शीलव्रतत्वं च सर्वेषां ॥ चशब्दोधिकृतसमुच्चयार्थः अल्पारंभपरिग्रहत्वं
च निःशीलव्रतत्वं च शीलानि च व्रतानि च वक्ष्यंते निष्क्रांतः शीलव्रतेभ्यो
निःशीलव्रतस्तस्य भावः निःशीलव्रतत्वं सर्वेषां ग्रहणं सकलायुरास्रवप्र ९८
तिपत्त्यर्थं किं देवायुषोपि भवति सत्यं भवति भोगभूमिजापेक्षया अथ पूर्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ह्वपरिग्रहत्वं च आरंभपरिग्रहाः बह्वः आरंभपरिग्रहा यस्य स बह्वारंभपरि
ग्रहः तस्य भावः बह्वारंभपरिग्रहत्वं हिंसाक्रूरकर्माजस्रप्रवर्तनपरस्व
हरणविषयातिगृद्धिः कृष्णलेश्याभिजातरौद्रध्यानमरणकालतादिलक्षणः
नारकस्यायुषः आस्रवो भवति अहो को नारकस्यायुषः आस्रवः तैर्यग्यो
नस्य इदानीं वक्तव्य इत्युच्यते ॥ माया तैर्यग्योनस्य ॥ चारित्रमोहकर्म
विशेषस्योदयादाविर्भूतः । आत्मनः कुटिलभावो माया निकृतिः तैर्यग्
योनस्यायुषः आस्रवो वेदितव्यः तत्प्रपंचः मिथ्यात्वोपेतधर्मदेशनानि
ःशीलतातिसंधानप्रियतानीलकापोतलेश्यार्त्तध्यानमरणकालतादिः । इ
आख्यातस्तैर्यग्योनस्यायुषः । आस्रव इदानीं मानुषस्यायुषः को हेतु
रित्यत्रोच्यते ॥ अल्पारंभपरिग्रहत्वं मानुषस्य ॥ नारक [illegible] स्रवो व्याख्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तिसंबंधः । परनिंदात्मप्रसंसेति प्रबंधकहेतुसंनिधाने [illegible] उद्भूतवृत्ति-
तानाविर्भावः । उच्छादनं प्रतिबंधकाभावे प्रकाशवृत्तिता उद्भावनं । अत्रा-
पि च यथाक्रममभिसंबंधः । सद्गुणोच्छादनं असद्गुणोद्भावनमिति तान्येता-
नि नीचैर्गोत्रस्यास्रवकारणानि वेदितव्यानि । अथोच्चैर्गोत्रस्य क आस्रववि-
धिरत्रोच्यते ॥ तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ तदित्यनेन प्रत्या-
मर्शः नीचैर्गोत्रास्रवः इति निर्दिष्टपते अन्येन प्रकारेण वृत्तिर्विपर्ययस्य-
स्य विपर्ययस्तद्विपर्ययः कः पुनरसौ आत्मनिंदा परप्रशंसा सद्गुणोद्भा-
वनमसद्गुणोच्छादनं च गुणोत्कृष्टेषु विनयेनावनतिः । नीचैर्वृत्तिः विज्ञा-
नादिभिरुत्कृष्टस्यापि सतः ॥ तत्कृतमदविरहो ऽहंकारतानुत्से- १२९
कः । तान्येतान्युत्तरस्योच्चैर्गोत्रस्यास्रवकारणानि भवंति । अथ गोत्रा-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समुत्थस्य मुनेस्तपसः कुतश्चित्प्रत्यूहे समुपस्थिते तत्संधारणं समाधिः गुणव
द्दुःखोपनिपाते निरवद्येन विधिना तदपहरणं वैयावृत्त्यं अर्हदाचार्येषु
बहुश्रुतेषु प्रवचने च भावविशुद्धियुक्तोऽनुरागो भक्तिः षण्णामावश्यकक्रि
याणां यथाकालं प्रवर्त्तनमावश्यकापरिहाणिः ज्ञानतपोदानजिनपूजा
विधिना धर्म्मप्रकाशनं मार्गप्रभावना वत्से धेनुवत्सधर्म्मणि स्नेहः प्रवच
नवत्सलत्वं तानि षोडशकारणानि सम्यग्भाव्यमानानि व्यस्तानि समस्तानि च
तीर्थकर्म्मास्रवकारणानि प्रत्येतव्यानि इदानीं नामास्रवाभिधानानंतरं
गोत्रास्रवे वक्तव्ये सति नीचैर्गोत्रस्यास्रवविधानार्थमिदमाह॥ परात्मनिं
दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य॥ तथ्यस्य वाऽतथ्यस्य
वा दोषस्योद्भावनं प्रतीच्छा निंदा गुणोद्भावनाभिप्रायः प्र[illegible]संख्यमभि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न तस्य दोष इति कषायादयो विनश्यंते ॥ इति तत्त्वार्थवृत्तौ [illegible] सर्वार्थसि
द्धिसंज्ञिकायां षष्ठोऽध्यायः समाप्तः ॥६॥ आस्रवपदार्थो व्याख्यातः ॥
तत्प्रारंभकाले एवमुक्तं शुभः पुण्यस्येति तत्सामान्येनोक्तं तद्विशेषप्रति
पत्त्यर्थं कः पुनः शुभ इत्युक्ते इदमुच्यते ॥ हिंसानृतस्तेयाब्रह्मपरिग्र
हेभ्यो विरतिर्व्रतं ॥ प्रमत्तयोगात्प्राणव्यपरोपणं हिंसेत्येवमादिभिः सू
त्रैर्हिंसादयो निर्देक्ष्यंते तेभ्यो विरमणं विरतिर्व्रतमित्युच्यते व्रतमभिसं
धिकृतो नियमः इदं कर्तव्यमिदं न कर्तव्यमिति वा ननु च हिंसादयः प
रिणामविशेषाः अध्रुवाः कथं तेषामपादानत्वमुच्यते बुद्ध्यपायाद्ध्रुवत्व ११०
विवक्षोपपत्तेः यथा धर्माद्विरमतीत्यत्र य एष मनुष्यः संभिन्नबुद्धिः स
पश्यति दुष्करो धर्मः फलं चास्य श्रद्धामात्रगम्यमिति स बुद्ध्या संप्राप्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ंतरमुद्दिष्टस्यांतरायस्यकः आश्रवइत्यतोच्यते विघ्नकरणमंतरायस्य
दानादीनुक्तानिदानलाभभोगोपभोगवीर्याणीत्यत्रतेषांविहननंविघ्न
: विघ्नस्यकरणंविघ्नकरणं अंतरायस्याश्रवविधिः वेदितव्यः अत्रचोद्
यते तत्प्रदोषनिह्नवादयोज्ञानदर्शनावरणादीनांप्रतिनियताआश्रवहे
तवोवर्णिताः किंतेप्रतिनियतज्ञानावरणाद्याश्रवहेतवएवउताविशे
षेणेति यदिप्रतिनियतज्ञानावरणाद्याश्रवहेतवएवआगमविरोधःप्र
सज्यते आगमेहिसप्तकर्माणिआयुर्वर्ज्जानिप्रतिक्षणंयुगपदाश्रवंति
इत्युक्तंतद्विरोधःस्यात् अथाविशेषेणआश्रवहेतुर्विशेषनिर्देशोनयु
क्तइति अत्रोच्यतेयद्यपितत्प्रदोषादिभिर्ज्ञानावरणादीनांसर्व्वासांक
र्म्मप्रकृतीनांप्रदेशबंधःनियमोनास्ति तथापिअनुभ[illegible]नदेनत्रे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्णो वक्ष्यते गुप्तिसमित्यादिः हिंसानृतादत्तादाना॥ [illegible] सार
स्वनदत्तादानादिक्रियाप्रतीतेः गुप्त्यादिसंवरपरिकर्मत्वाद्व्रतं व्रतेषु हि कृ
तपरिकर्मा साधुः सुखेन संवरं करोतीति ततः पृथक्त्वेनोपदेशः क्रियते
ननु च षष्ठमणुव्रतमस्ति रात्रिभोजनविरमणं तदिहोपसंख्यातव्यं न भा
वनास्वंतर्भावात्। अहिंसाव्रतभावनादि वक्ष्यंते तत्रालोकितपानभोज
नभावना कार्येति। तस्य पंचतयस्य व्रतस्य भेदप्रतिपत्त्यर्थमाह॥ देशसर्व
तोऽणुमहती॥ देश एकदेशः सर्वः सकलः देशश्च सर्वश्च देशसर्वौ ता ग
भ्यां देशतो विरतिरणुव्रतं सर्वतो विरतिर्महाव्रतमिति द्विविधा भिद्य
ते प्रति प्रत्येकं एतानि दृढानि दृढानि भावितानि निवरो धध्वत। ऽः खः १५१
निवृत्तिनिमित्तानि भवंति किमर्थं कथं वा भावनं तेषामित्युच्यते॥ तत्स्थै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निवर्त्तेनाव्रतमिदापियपाप्मनुष्य:ऽऽश्वस्याश्च्युकारामपश्यतिया। तेहिंसाद
य: परिणामास्तेषां यद्दलवः पाप कर्म्मणि प्रवर्त्तमानान् इहैव राज्ञो नोदं न
यंति परत्र च दुःखमवाप्नुवंतीति मत्वा बुद्ध्या संप्राप्य निवर्त्तते तेनाबुद्ध्या क्रु
वंश्च विविदोपपत्तेः अपादानं श्रेयस्करं विरतिशब्दः प्रत्येकं परिसमाप्यते हिं
साया विरतिः अनृताद्विरतिः इत्येवमादि तत्राहिंसाव्रतमादौ क्रियते
प्रधानत्वात् सत्यादीनि हि तत्परिपालनार्थानि सस्यस्य वृत्तिपरिक्षेपवत् स
र्वसावद्यनिवृत्तिलक्षणसामायिकापेक्षया एकं व्रतं तदेव छेदोपस्थापनापेक्षया
पंचविधमिहोच्यते ननु चास्य व्रतस्यास्रवहेतुत्वमनुपपन्नं संवरहेतुष्वंत
र्भावात् संवरहेतवो वक्ष्यंते गुप्तिसमित्यादयः तत्र
दशविधे धर्म्मे संयमे वांतर्भावादिति नैष दोषः [illegible] निवृत्तिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वस्योद्वेजनीयो भवति इह देवताभिघातबधबंधस र्गनामो
त्तरोष्टछेदनसर्वस्वहरणादीनूप्रतिलभते प्रेत्य चासुतांम गर्हितश्च
भवतीति स्तेयात् व्युपरतिः श्रेयसी नपात्रब्रह्मचर्यात् मदविभ्रमोद्भ्रां
तचित्तः वनगज इव वासितावंचितः विवशोबधबंधनपरिक्लेशान
नुभवति मोहाभिभूतत्वाच्च कार्याकार्यानभिज्ञो न किंचित् कुश
लं समाचरति परांगनालिंगनसंगकृतरतिश्चेह वैरानुबंधिनः
लिंगछेदनबधबंधसर्वस्वहरणादीनपायान् प्राप्नोति प्रेत्य चाशुभां
गतिमश्नुते गर्हितश्च भवति अतो विरतिरात्महिता तथा परिग्रहवान्
शकुनिरिव गृहीतमांसखंडः अन्येषां तु पक्षिणां पतत्त्रिणामिह तस
स्करादीनामभिलषणीयो भवति तदर्जनरक्षणप्रक्षयकृतांश्च दो १५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In.Public Domain. Digitized by Sarayu Trust/eGangotri

याः न चासंख्येया नाप्यनंता इति ते खलु पुद्गलस्कंधाः अभ[illegible]गुणाः सि
द्धानंतभागप्रमितप्रदेशाः । घनांगुलस्यासंख्येयभागक्षे[illegible]गाद[illegible] एकद्वि
त्रिचतुःसंख्येयसमयस्थितिकाः पंचवर्णपंचरसाः द्विगंधचतुःस्पर्शभावाः ए
अष्टविधकर्म्मप्रकृतियोग्याः योगवशादात्मनात्मसात्क्रियंत इति प्रदेश
बंधः समासतो वेदितव्यः । अथ बंधपदार्थानंतरं पुण्यपापसंख्यानं चोदि १८२
तं तद्बंधांतर्भूतमिति पर्याख्यानं तत्रेदं वक्तव्यं कोत्र पुण्यबंधः कः पापबंध इ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लबंधः। इदानीं प्रदेशबंधो वक्तव्यः। तस्मिंश्च वक्तव्ये सति इमे निर्द्देष्टव्याः। किं
हेतवः कदा कुतः किंस्वभावाः कस्मिन्किंपरिमाणाश्चेति तदर्थमिदं क्रमेण परि
गृहीतप्रश्नापेक्षं भेदसूत्रं प्रणीयते॥ सूत्रं॥ नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मै
कक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनंतानंतप्रदेशाः॥ नाम्नः प्रत्यया ना
मप्रत्यया नामेति सर्वाः कर्मप्रकृतयोऽभिधीयंते सयथा[illegible]नामेति[illegible]नात् अने
न हेतुभावउक्तः सर्वेषु भवेषु सर्वतः इत्ययं तेन्यायोगीति तसिद्धत्ते[illegible]। अनेन
कालोपादानं कृतं एकैकस्य हि जीवस्यातिक्रांताः अनंता[illegible]मिनः संख्ये
या असंख्येया अनंतानंता भवंतियोगविशेषान्निमित्तात्क[illegible]पुद्गलाः
आदीयंते इति निमित्तविशेषनिर्द्देशः। सूक्ष्मादि[illegible]कर्मग्रहा
णयोग्यपुद्गलस्वभावानुवर्णनार्थं। ग[illegible]योग्याः[illegible]स्थूलाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत द्व्यशीतिविधं॥ तद्यथा॥ ज्ञाना[illegible]णस्य च
नव मोहनीयस्य षड्विंशतिः पंचांतरायस्य नर[illegible]स्रो जा
तयः पंचसंस्थानानि पंचसंहननानि अप्रशस्त[illegible]र्शाः नर
कगतितिर्यग्गत्यानुपूर्व्यद्वयमुपघातनामाप्रशस्तविहायो[illegible]स्थावरसूक्ष्मा
पर्याप्तिसाधारणशरीरास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तयश्चे
ति नामप्रकृतयश्चतुस्त्रिंशत् असद्वेद्यं नरकायुर्नीचै[illegible]वमप्रव्याख्यातः
सप्रपंचो बंधपदार्थः अवधिमनःपर्ययकेवलज्ञानप्रत्यक्षप्रमाणगम्य
स्तदुपदिष्टागमानुमेयः॥ इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायामष्ट
मोध्यायः समाप्तः॥ ८॥ ॐ नमः॥ बंधपदार्थो निर्दिष्टः इदानीं तदनंतरो १८२
द्दिष्टाङ्गः संवरस्य निर्देशः प्राप्तकालइत्यतइदमाह॥ आस्रवनिरोधः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ति।तच्चशुभप्रकृतिपरिगणनार्थमिदमारभ्यते॥ सद्वेद्यशुभायुर्नामगोत्राणि
शुभं॥ शुभत्वं प्रशस्तमितियावत् तदुत्तरैः प्रत्येकमभिसंबध्यते शुभमायुः
शुभं नाम शुभं गोत्रमिति शुभायुस्त्रितयं तिर्यगायुर्मनुष्यायुर्देवायुरि
ति शुभनामसप्तत्रिंशद्विकल्पं मनुष्यगतिः देवगतिः पंचेंद्रियजा
तिः पंचशरीराणि त्रीण्यंगोपांगानि समचतुरस्रसं[illegible]नं [illegible]र्षभनारा
चसंहननं प्रशस्तवर्णरसगंधस्पर्शाः मनुष्यदेवगत्यानुपूर्व्ये [illegible]र्भः [illegible]गुरुलघु
परघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतयः त्रसबा[illegible]प्रत्येकश
रीरस्थिरशुभसुभगसुस्वरादेययशःकीर्तयः निर्माणं तीर्थकरत्व[illegible]ति शुभ
मेकमुच्चैर्गोत्रं सद्वेद्यमिति एतान्यष्टचत्वारिंशत्स[illegible]स्तोन्य
त्पापं॥ अस्मात्पुण्यसंज्ञिककर्मप्रकृतिसमूहात्[illegible]पापमुच्यते
[illegible]॥ इतोवरि[illegible]
[illegible]धे। ग[illegible]गतो[illegible]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संवरो द्रष्टव्यः ॥ तद्यथा ॥ नि[illegible]निद्रा [illegible]ंधि क्रोध
मानमायालोभस्त्रीवेदतिर्यगायुस्तिर्यग्गति[illegible]नि
र्यग्गतिप्रायोग्यानुपूर्व्योद्योतप्रशस्तविहायोग[illegible]नादेय
नीचैर्गोत्रसंज्ञिकानां पंचविंशतिप्रकृतीनां अनंतानुबं[illegible]दयकृ।
तासंयमप्रधानाश्रवाणामेकेंद्रियादयः सासादनसम्यग्दृ[illegible]बंधका
स्तदभावे तासामुत्तरत्र संवरः। अप्रत्याख्यानावरण[illegible]ध[illegible]मा[illegible]यालो
भमनुष्यायुर्मनुष्यगत्यौदारिकशरीरतदंगोपांगवज्रर्षभनाराचसंह
ननमनुष्यगतिप्रायोग्यानुपूर्व्यनाम्नां दशानां प्रकृतीनां अप्रत्याख्यान
कषायोदयकृतासंयमहेतुकानां एकेंद्रियादयः। असंयतसम्यग्दृ २८४
ष्ट्यंताः बंधकाः। तदभावादूर्ध्वं तासां संवरः। सम्यग्मिथ्यात्वगुणेनायुर्न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संवरः॥ अभिनवकर्मादानहेतुराश्रवो व्याख्यातः तस्य निरोधः संवर इत्युच्यते स
द्विविधो भावसंवरो द्रव्यसंवरश्चेति तत्र संसारनिमित्तक्रियानिवृत्तिर्भावसंवरः
तन्निरोधे तत्पूर्वकर्मपुद्गलादानविच्छेदो द्रव्यसंवरः इदं विचार्यते कस्मि
न् गुणस्थाने कस्य संवर इति अत्रोच्यते मिथ्यादर्शनकर्मोदयवशीकृत
आत्मा मिथ्यादृष्टिः तत्र मिथ्यादर्शनप्राधान्येन यत्क[illegible]न्निरोधा
त् शेषे सासादनसम्यग्दृष्ट्यादौ तत्संवरो भवति किं पुनस्तत् मि[illegible] नपुंसक
वेदनरकायुर्नरकगतिएकद्वित्रिचतुरिंद्रियजाति[illegible]नासंप्राप्त
सृपाटिकासंहनननरकगतिप्रायोग्यानुपूर्व्या[illegible]पर्याप्तक
साधारणशरीरसंज्ञकं षोडशप्रकृतिलक्षणं [illegible]नंतानु
बंध्यप्रत्याख्यानप्रत्याख्यानोदयवि[illegible]मान [illegible]वदनाव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मर्थानां प्रवृत्त्युपायप्रदर्शनार्थमुक्तिर्नावि॥९६॥ [illegible] मानं स
ति प्रवर्त्तमानस्य प्रमादपरिहारार्थं वेदितव्यं [illegible] मार्गेण
र्यारक्षणानुपालनार्थं नालिकेरदण्डनाकोशप्रदेश [illegible] रक्षा
पादनादीनां सन्निधानेऽपि कायानुष्ठानुत्पत्तिः स्वभावात् [illegible] त्वाद्दति प्र
मादो भावोऽमुं वर्तमाननिर्द्धरणं योगस्यावक्रताऽऽर्जवं प्रकृति [illegible] लोस
नत्वेति यो सं सम्यक्प्रवृत्तिस्तेषु ज्ञानेषु साधुवचनसत्य [illegible] वेत
त्र भाषासमितावन्तर्भवतीति नैषदोषः समितौ प्रवर्त्तमानो मुनिः साधुष्वसा
धुषु च नाभाषाप्रवृत्तिरिति कर्त्तव्यं हितं मितं च ब्रूयादन्यथा रागादनर्थदण्डदोषः
स्यादिति वाक्यमित्यर्थः॥ ९८॥ पुनः सन्तः प्रव्रजिताः तत्काचोऽतेषु सा २८१
धुवचनं सत्यं ज्ञानचारित्रशिक्षणादिषु बहुविकल्पेष्वप्यधिगत्य ज्ञाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्रहणंतस्मात्सम्यग्विशेषणविशिष्टात्संक्लेशाप्रादुर्भावपरात्कायादियोगनिरोधे
सतितन्निमित्तंकर्म्मनाश्रवतीतिसंवरप्रसिद्धिरवगंतव्या।साचितयी।काय
गुप्तिर्वाग्गुप्तिर्मनोगुप्तिरिति।तत्राशक्तस्यमुनेर्निरवद्यप्रवृत्तिख्यापना
र्थमाह॥ईर्याभाषैषणादाननिक्षेपोत्सर्गाःसमितयः॥सम्यगित्यनुवर्त्त
ते तेनेर्यादयोविशेष्यंते।सम्यगीर्यासमितिःसम्यग्भाषासम्यगेष[illegible]नानिक्षे
पोसम्यगुत्सर्गइति।ताएताःपंचसमितयःविदितजीवस्थाना[illegible]विधिर्मुनेः
प्राणिपीडापरिहाराभ्युपायाःवेदितव्याः।तथाप्रवर्त्त[illegible]यमपरि
णामनिमित्तकर्म्माश्रवाभावात्संवरोभवति।तत्र[illegible]:धर्मम
तेदशविधस्यार्थमाह॥उत्तमक्षमामार्दवार्जव[illegible]णाकिं
चन्यब्रह्मचर्याणिधर्मः॥किमर्थमि[illegible]र्थतत्राम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धत्तेयस्मात्तस्मात्प्रछिन्नत्तत्क्षमादिपरिणतेनां॥ गोत्र छुलवति मानत निगि
त्याशरणसंसारैकत्वान्यत्वान्याशुच्यास्रवसंवर ॥ मोह ग्रास्थाप्यछित ॥७॥ अ
निर्जरालोकबोधिदुर्लभ ॥ तोत्र मादि संस त्यश
धर्मस्वाख्याततत्त्वानुचिंतनमनुप्रेक्षाः॥ इमानिशरीर... न्द्रियविषयोपभोगप
गपरिभोगद्रव्याणिसमुदयरूपाणिजलबुद्बुदवदनवस्थि[illegible]तस्वभावानिग
र्भादिष्ववस्थाविशेषेषुसदोपलभ्यमानसंयोगविपर्य[illegible]दत्राज्ञो
नित्यतांमन्यतेनकिंचित्संसारेसमुदितंध्रुवमस्तिआत्मनोज्ञानदर्शनोप
योगस्वभावादन्यदितिचिंतनंअनित्यत्वानुप्रेक्षाएवंह्यस्यभव्यस्यचिंतय
तः तेष्वभिष्वंगाभावात् भुक्तोज्झितगंधमाल्यादिष्विववियोगकालेपिविनि
पातोनोत्पद्यते यथामृगशावस्यएकांतेबलवताक्षुधितेनामिषैषिणाव्या १८८
घ्रेणाभिभूतस्यनकिंचिच्छरणमस्ति तथाजन्मजरामृत्युव्याधिप्रभृतिव्यस

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ते धर्मोपबृंहणार्थं समितिषु वर्तमानस्य प्राणेंद्रियपरिहारः संयमः कर्मक्ष
यार्थं तपस्तप्यत इति तपः तदुत्तरत्र वक्ष्यमाणं द्वादशविकल्पमवसेयं संयत
स्य योग्यं ज्ञानादिदानं त्यागः उपात्तेष्वपि शरीरादिषु संस्कारापोहाय ममे
दमित्यभिसंधिनिवृत्तिराकिंचन्यं नास्य किंचन तस्य भावः कर्म वा आकिं
चन्यं अनुभूतांगनास्मरणकथाश्रवणस्त्रीसंसक्तशयनासनादिवर्जना
द्ब्रह्मचर्यं परिपूर्णमवतिष्ठते स्वतंत्रवृत्तिनिवृत्त्य [illegible] लवासो
ब्रह्मचर्यं दृष्टप्रयोजनपरिवर्जनार्थं पुनर्भवविशेषणं ता [illegible] नाच्च भावना
निश्चयं चापदेशात्तांडिमस्य गुणप्रतिपक्षदोषसद् [illegible] गादितानि
संवरकारणानि भवति आह क्रोधाद्यनुवृत्तिः [illegible] प्रत्यनी
कानां भवनादिसुक्तं तत्र कस्मात्क्षमादीनयम [illegible] षे सेवतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनुजीवः कर्मयंत्रप्रेरितः पिता भूत्वा भ्राता पुत्रः पौत्रश्च भवति माता भूत्वा भगि-
नी भार्या दुहिता च भवति स्वामी भूत्वा दासो भवति दासो भूत्वा स्वाम्यपि भवति नट
इव रंगे अथवा किं बहुना स्वयमात्मनः पुत्रो भवतीत्येवमादि संसारस्वभा-
वचिंतनं संसारानुप्रेक्षा ॥ एवं ह्यस्य भावयतः संसारदुःखत्रयादुद्विग्नस्य त-
तो निर्वेदो भवति निर्विण्णश्च संसारप्रहाणाय घटते यतोऽनंतजन्मजरामरणानुब-
धि महादुःखानुभवं प्रति एक एवाहं न कश्चिन्मे स्वः परो वा विद्यते एक एव
जायेऽहं एक एव म्रिये न मे कश्चित्स्वजनः परजनो वा व्याधिजरामरणादीनि दुः-
खान्यपहरति बंधुमित्राणि श्मशानं नातिवर्त्तंते धर्म एव मे सहायः सदा
अनपायीति चिंतनमेकत्वानुप्रेक्षा ॥ एवं ह्यस्य भावयतः स्वजनेषु प्रीत्यनुबंधो १५९
न भवति परजनेषु द्वेषानुबंधो नोपजायते ततो निःसंगतामभ्युपगतो मोक्षा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नमध्ये परिभ्रमतो जंतोः शरणं न विद्यते परिपुष्टमपि शरीरं भोजनं प्रति सहायी
भवति न व्यसनोपनिपाते यत्नेन संचिताश्चार्था अपि न भवांतरमनुगच्छंति संविभक्त।
सुखदुःखाः सुहृदोपि न मरणकाले परित्रायंते बांधवाः समुदिताश्च रुजापरी
तं न परिपालयंति अस्ति चेत्सुचरितो धर्मो व्यसनमहार्णवे तरणोपायो भवति।
मृत्युना नीयमानस्य सहस्रनयनादयोपि न शरणं तस्माद्भवव्यसनसंकटे ध
र्म एव शरणं सुहृदर्थोप्यनपायी नान्यत्किंचिच्छरणमिति भावनमशरणानुप्रे
क्षा। एवं ह्यस्याध्यवसतः नित्यमशरणोस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेषु म
मत्वविगमो भवति भगवदर्हत्सर्वज्ञप्रणीत एव मार्गे प्रयत्नो भवति कर्मवि
पाकवशादात्मनो भवांतरावाप्तिः संसारः स पुरस्तात्पंचविधः परिवर्तनरूपेण
व्याख्यातः तस्मिन्ननेकयोनिकुलकोटिबहुशतसहस्रसंकटे संसारे परिभ्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तीति तद्भावनमशुचित्वानुप्रेक्षा ॥ एवं ह्यस्य संस्मरतः शरीरनिर्वेदो भवति निर्वि
ण्णश्च जन्मोदधितरणाय चित्तं समाधत्ते आस्रवसंवरनिर्जराः पूर्वोक्ता अपि ।
इहोपन्यस्यंते तद्गतगुणदोषभावनार्थं तद्यथा आस्रवा इहामुत्रापाययुक्ता ।
महानदीस्रोतोवेगतीक्ष्णा इंद्रियकषायाव्रतादयः तत्रेंद्रियाणि तावत् स्पर्श
नादीनि वनगजवायसपन्नगपतंगहरिणादीन् व्यसनार्णवमवगाहयंति ।
तथा कषायादयोपीह वधबंधापयशःपरिक्लेशादीन् जनयंति अमुत्र च नानाग ।
तिषु बहुविधदुःखप्रज्वलितासु परिभ्रमयंति इत्येवमास्रवदोषानुचिंतन
मास्रवानुप्रेक्षा ॥ एवं ह्यस्य चिंतयतः क्षमादिषु श्रेयस्त्वबुद्धिर्न प्रच्यवते स
र्व एते आस्रवदोषाः कूर्मवत्संवृतात्मनो न भवंति यथा महार्णवे नावो विवरपि १८७
धानेऽसति क्रमस्रुतजलाभिप्लवे सति तदाश्रयाणां विनाशोऽवश्यंभावी छिद्रा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ये: [illegible]ते शरीरादन्यत्वचिंतनमन्यत्वानुप्रेक्षा तद्यथा बंधंप्रत्येकत्वेसत्यपिलक्षण
भेदान्अन्योऽहंऐंद्रियिकंशरीरं[illegible]न्द्रियोऽहं अज्ञंशरीरंज्ञोऽहंअनित्यंशरी
रंनित्योऽहंआद्यंतवच्छरीरंअनाद्यंतोऽहंबहूनिमेशरीरशतसहस्राणिअतीतानिसंसा
रेअनवस्थितंपरिभ्रमतः सएवाहमन्यस्तेभ्यइत्येवंशरीरादप्यन्यत्वम्मेकिंमंगपु
नर्बाह्येभ्यःपरिग्रहेभ्यः इत्येवंह्यस्यमनःसमादधानस्यशरीरादिषुस्पृहानोत्प
द्यते ततस्तत्त्वज्ञानभावनापूर्वकेवैराग्यप्रकर्षेसतिआत्यंतिकस्यमोक्षसुखस्या
प्तिर्भवति शरीरमिदमत्यंताशुचियोनिशुक्रशोणितसंवर्द्धितमवस्करवदशुचिभाज
नंत्वङ्मात्रप्रच्छादितंअतिपूतिरसनिष्यंदिस्रोतोबिलंअंगारवदात्मभावमाश्रितमप्य
प्याश्वेवापादयति स्नानानुलेपनधूपप्रघर्षवासमाल्यादिभिरपिनशक्यमशुचित्व
मपहर्तुमस्य सम्यग्दर्शनादिपुनर्भाव्यमानंजीवस्यात्यंतिकींशुद्धिमाविर्भावय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

ता तत्र च विकलेंद्रियाणां भूयिष्ठत्वात्पंचेंद्रियता गुणेषु कृतज्ञत्वकृच्छ्रलभ्या त
त्र च तिर्यक्षु पशुमृगपक्षिसरीसृपादिषु बहुषु मनुष्यभावः चतुःपथे र
त्नराशिवद्दुरासदः तत्प्रच्यवे च पुनस्तदुपपत्तिर्दग्धतरुपुद्गलतदुपपत्ति
वद्दुर्लभा तल्लाभे च देशकुलेंद्रियसंपन्नीरोगत्वान्युत्तरोत्तरतः अतिदुर्लभानि।
सर्वेष्वपि तेषु लब्धेषु सद्धर्मप्रतिलंभो यदि न स्यात् व्यर्थं जन्म वदनमिव दृष्टिवि
कलं तमेवं कृच्छ्रलब्धं धर्ममवाप्य विषयसुखे रंजनं भस्मार्थं चंदनदहनमिव वि
फलं विरक्तविषयसुखस्य तु तपोभावना धर्मप्रभावना सुखमरणादिलक्षणः
समाधिर्दुरवापस्तस्मिन्सति बोधिलाभः फलवान्भवतीति चिंतनं बोधिदुर्ल
भानुप्रेक्षा एवं ह्यस्य भावयतः बोधिं प्राप्य प्रमादो न कदाचिदपि भवति अयं जि १८१
नोपदिष्टो धर्मः अहिंसालक्षणः सत्याधिष्ठितः विनयमूलः क्षमाबलः ब्रह्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पिधानेच पुनः निरुपद्रवमभिलषितदेशांतरप्रापणं तथा कर्म्मागमद्वारसंवरणे
सते नास्ति श्रेयःप्रतिबंधः संवरगुणानुचिंतनं संवरानुप्रेक्षा एवं ह्यस्य चिंतयतः
संवरे नित्योद्युक्तता भवति ततश्च निःश्रेयसपदप्राप्तिरिति निर्ज्जरा वेदनावि
पाकज इत्युक्तं सा द्वेधा अबुद्धिपूर्वा कुशलमूला चेति तत्र नरकादिषु गतिषु कर्म्म
फलविपाकजा अबुद्धिपूर्वा अकुशलानुबंधा परीषहजये कृते कुशलमूला
शुभानुबंधा निरनुबंधा चेत्येवं निर्ज्जरायाः गुणदोषभावनं निर्ज्जरानुप्रेक्षा
एवं ह्यस्यानुस्मरतः कर्म्मनिर्ज्जरायै प्रवृत्तिर्भवति लोकसंस्थानादिविधिर्व्याख्यातः
तत्स्वभावानुचिंतनं लोकानुप्रेक्षा एवं ह्यस्याध्यवस्यतः तत्त्वज्ञानविशुद्धिर्भवति
एकस्मिन्निगोतशरीरे जीवाः सिद्धानामनंतगुणाः एवं सर्व्वलोको निरंतरं निचि
तः स्थावरैरतस्तत्र त्रसता वालुकासमुद्रे पतिता वज्रसिकताकणिकेव दुर्ल्ल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रच्यवमानाः तन्मार्गपरिक्रमणपरिचयेन कर्म्मागमद्वारं संवृण्वंतः औपक्रमि
कं कर्मफलमनुभवंतः क्रमेण निर्जीर्णकर्म्माणः मोक्षमवाप्नुवंति तत्स्वरू
पसंख्यासंप्रतिपत्यर्थमाह॥ क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानि
षद्याशय्याक्रोशवधयाचनालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञा
नादर्शनानि॥ क्षुदादयो वेदनाविशेषाः द्वाविंशतिः तेषां सहनं मोक्षार्थिना क
र्त्तव्यं तत्र भिक्षोर्निरवद्याहारगवेषिणः तदलाभे ईषल्लाभे च अनिवृत्तवेद
नस्याकाले अदेशे च भिक्षां प्रति निवृत्तेच्छस्य आवश्यकपरिहाणिं मनागपि
असहमानस्य स्वाध्यायध्यानभावनापरस्य बहुकृत्वः स्वकृतपरकृतानशनाव
मोदर्यस्य नीरसाहारस्य संतप्तभ्राष्ट्रपतितजलबिंदुकतिपयवत् सहसा परिशु १५२
ष्कपानस्य उदीर्णक्षुद्वेदनस्यापि सतः भिक्षालाभादलाभमधिकगुणं मन्यमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चर्यगुप्तः उपशमप्रधानः नियतितलक्षणोनिग्रहं सालंबनः अस्यालाभात् अ
नादिसंसारे जीवाः परिभ्रमंति दुःकर्मविपाकजं दुःखं अनुभवंतः अस्य पुनः
प्राप्तिलंते विविधाभ्युदयप्राप्तिपूर्विकानिःश्रेयसोपलब्धिर्नियतेति चिंतनं धर्म
स्वाख्यातत्वानुप्रेक्षा एवं ह्यस्य चिंतयतो धर्मानुरागात् सदा प्रतिपन्नो भवति प
रमनित्यत्वाद्यनुप्रेक्षासन्निधाने उत्तमक्षमादिधारणात् महान् संवरो भवति मध्ये
अनुप्रेक्षावचनमुभयार्थं एवमनित्यत्वाद्यनुप्रेक्षादि भावयन् उत्तमक्षमा
दींश्च प्रतिपालयति परीषहांश्च जेतुमुत्सहते के पुनस्ते परीषहाः किमर्थं वास
ह्यंत इति इदमाह ॥ मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः संवरस्य
प्रकृतत्वात्तेन मार्गो विशेष्यते संवरमार्ग इति तदच्यवनार्थं निर्जरार्थं च प
रिसोढव्याः परीषहाः ॥ क्षुत्पिपासादिसहनं कुर्वंतः जिनोपदिष्टात् मार्गात्

Ganesh Varni Digambar Jain Institute, Nara, Varanasi

CC0.In Public Domain, Digitized by Sarayu Trust/eGangotri

त्रसाधनोत्यादितदा[illegible]दवाग्निदाहरूकषघातातपजनितगलनानुशोषस्य।
तत्प्रतीकारहेतून्बहूननुभूतानचिंतयतः श्रुतिपीमापरिहारावहितचेतसः
चारित्ररक्षणमात्रसहनमित्युपवर्णते दंशमशकपरीषहनं दंशमशकोपलक्षणं यथा
काकालोरक्तं तांमथ्योशिति उपघातकोपलक्षणं तेनदंशमशकमक्षिकापि
सुकपुत्रिकामत्कुणकीटपिपीलीकावृश्चिकादयो गृह्यं तेनकृतांबाधामप्र
तीकारांसहमानस्य तेषांबाधांत्रिधाप्यकुर्वाणस्य निर्वाणप्राप्तिमात्रसंकल्प
प्रावरणस्य नदैरनामसहनंदंशमशकपरीषहक्षमेत्युच्यते जातरूपवन्निष्कलंकं।
जातरूपधारणं अशक्यमप्रार्थनीयं याचनरक्षणहिंसनादिदोषविनिर्मुक्तं
निःपरिग्रहत्वान्निर्वाणप्राप्तिं प्रत्येकं साधनमनन्यबाधनं नाग्न्यं बिभ्रतः मनोविक्रिया १०२
विप्लुतिविरहात् स्त्रीरूपाण्यत्यंताशुचिकुणपरूपेणभावयतः रात्रिंदिवं ब्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नस्यक्षुद्बाधां प्रत्यचिंतनं क्षुद्विजयः ॥ जलस्नानावगाहनपरिषेकपरित्यागिनः
पतत्त्रिवदनियतासनावसथस्य अतिलवणस्निग्धरूक्षविरुद्धाहारैर्ग्रीष्मातप
पित्तज्वरानशनादिभिरुदीर्णां शरीरेंद्रियोन्माथिनीं पिपासां प्रत्यनाद्रियोप
न्माथिनी पिपासां प्रत्यनाद्रियमाणप्रतीकारस्य पिपासानलशिखां धृतिनवमृ
द्घटपूरितशीतलसुगंधिसमाधिवारिणा प्रशमयतः पिपासासहनं प्रशस्य
ते ॥ परित्यक्तप्रच्छादनस्य पक्षिवदनवधारितालयस्य वृक्षमूलपथिशिलात
लादिषु हिमानीपतनशीतानिलसंपाते तत्प्रतीकारप्राप्तिं प्रतिनिवृत्तेच्छस्य
पूर्वानुभूतशीतप्रतीकारहेतुवस्तूनां अस्मरतः ज्ञानभावनागर्भागारे वसतः
शीतवेदनासहनं कीर्त्यते ॥ निवाते निर्जले ग्रीष्मरविकिरणपरिशुष्कप
तितपर्णव्यपेतच्छायातरुण्यटव्यामंतरे यदृच्छयोपनिपतितस्यानशनाद्यंत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृतोः देशां सरागिचेष्टः [illegible]णाल्पज्ञानस्यापरव[illegible]जनिसंगतामंगीकुर्वतः बकु
कुसोद्गमनत्राभावभोदर्थगुप्तिपरिरक्षणानरसपरित्यागादियाक्षपरिक्रांतका
यस्यदेशकालप्रमाणोपेतमध्वागमनसंयमविरोधिपरिहरतः निराकृतपा
दत्राणस्य परुषशर्कराकंटकादिव्यधनजातचरणखेदस्यापि सतः पूर्वो
चितयानवाहनादिगमनमस्मरतः यथाकालमावश्यकापरिहाणिमास्कंदत
ःचर्यापरीषहसहनं भवति श्मशानोद्यानशून्यायतनगिरिगुहागह्वरादिषु
अभ्यस्तपूर्वेषु निवसतः आदित्यस्वेंद्रियज्ञानप्रकाशपरीक्षितप्रदेशे कृत
नियमक्रियस्य निषद्यां नियमितकालामास्थितवतः सिंहव्याघ्रादिविविध
भीषणध्वनिश्रवणान्निवृत्तभयस्य चतुर्विधोपसर्गसहनादप्रच्युतमोक्षमार्ग १९४
स्य वीरासनोत्कुटिकाद्यासनादविचलितविग्रहस्य तत्कृतबाधासहनं नि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चर्यमखंडमातिष्ठमानस्य अचेलव्रतधारणमनवद्यमवगंतव्यं संयत
स्येंद्रियेष्टविषयेष्टविषयसंबंधंप्रतिनिरुत्सुकस्यगीतनृत्यवादित्रादिवि
रहितेषुशून्यागारदेवकुलतरुकोटरशिलागुहादिषुस्वाध्यायध्यानभाव
नारतिमास्कंदतः दृष्टश्रुतानुभूतरतिस्मरणतत्कथाश्रवणकामशरप्रवेश
निर्विवरहृदयस्यप्राणिषुसदयस्य अरतिपरीषहजयोवसेयः । एकांते
ष्वारामभवनादिप्रदेशेषुनवयौवनमदविभ्रममदिरापानप्रमत्तासुप्रमदा
सुबाधमानासुकूर्मवत्संवृतेंद्रियहृदयविकारस्यललितस्मितमृदुक
थितसविलासवीक्षणप्रहसनमदमंथरगमनमन्मथशरव्यापारविफली
करणस्यस्त्रीबाधापरीषहसहनमवगंतव्यं दीर्घकालमुषितगुरु
कुलब्रह्मचर्यस्याधिगतबंधमोक्षपदार्थतत्त्वस्यसंयमायतनभक्तिं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्नादिभिः व्याध्याद्य[illegible]शरीरस्य व्याधारकैः [illegible] नागमिन नो विकारमर्कैः हतः ।
ममघुराक्कतङं कर्मफलमिमे वराकाः किं कर्तुं निशरीरमिदं जलबुद्बुदवत्
वश्वरणस्य यावं वासनकारंणं तैर्याबाधितं संज्ञानदर्शनचारित्रगुणमर्मनेके
नविडंपदनं नेष्टमिथैंतरात: वासीतरुणावंदनानुलेपनसमदर्शिनो वध्यरी
षहस्रमानन्यतेः वाद्यान्यंतरत्तोनुष्टानपरस्यतत्त्वावनावश्रोननिःसारीकृतम्
र्त्रैः पटत्तपनतापनिःपीतमांसतशोणितविरहितं तत्रा चमस्थिसिराजालमा
त्रतनुमंत्रस्य प्राणत्रयेपि आदाय वमतिलेषजादीनि दीप्तिः ध्यानमुखवर्णं
गलंगपालिरयाचमानस्य निद्राकालेपि विद्युद्योतवद्गुरुणा नस्तमूर्तेयस्तिन
परीषहसहनेमवनीयत्ते वायुवदसंगादनेकदेकदरन्याचारिणः अनुपगतेक १८५
कालनरसंतोडनस्य वावयमान्तवनमस्यावासरसहस्रनंतुदर्शनमात्रं नत्रसपा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षद्यापरीषहविजयइतिनिश्चीयते स्वाध्यायध्यानाध्ययनश्रमपरिखेदितस्यमोहात्रि
कीरवरविषमशद्धराकर्कराकथालसंकटानि ग्रीनिशेष्वरूमिषुहे शेषुनिद्रामनुभव
तः यथाकृतैकपार्श्वदंडायतनादि शय्याविन्नः प्राणिबाधापरिहारायपतितदारुवद्व्या
पन्नतामुपदहपरिखदमानस्यध्यानतावनावहिनचेतसो दुष्टमृगतस्करादिविविध
प्रसंगोदप्यचलितविग्रहस्य अनियमितकालांतस्कृतवाधाक्षमस्य शय्या
परीषहसमाक्षमते मिथ्यादर्शनोद्दसामर्पकपावज्ञाननिंदासप्त्यवचनानिक्रो
धानिस्निाशापूर्वकनानिशृण्वतोविगतदर्पमसमाधिनोचेतसः महतासुनीकारं
कर्तुमपिसमर्थकुर्वतः पापकर्मविपाकमनिचिंतयतः तान्पकर्ष्यतपश्चरणभा
वनापरस्याकषायविषलवमात्रस्याप्यनवकाशमात्महृदयं कुर्वतः आक्रोश
परीषहसहनमवधार्यते निशितविशसनमुद्गरादिप्रहरणताडनपीडा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योनोत्पद्यते अदोपशामाद्यनुष्ठानिनां प्रातिवार्थविशेषाः प्राङुत्तरत्र वक्ष्यंते ए
वायमाश्रमनर्थिकेयं परिषहजानिफलं भुतप्रतिपाननमित्येव समादक्षनस्याद
र्शनविशुद्धियोगाद्दर्शनपरीषहसहनमवसातव्यं ॥ परीषहानसकः
ल्योपस्थितानुसहमानस्यासंक्लिष्टचेतसः रागादिपरिणामाश्रवनिरोधान्महा
संवरो भवति ॥ आह किमिमे परीषहाः सर्वे संसारमहाटवीमतिक्रमितुं । अभ्युद्य
तं अभिभवंति उत कश्चिदस्ति प्रतिविशेष इति । अत्रोच्यते अमी व्याख्यातलक्षणाः
क्षुधादयः चारित्रांतराणि प्रति भाज्याः नियमेन पुनरनयोः प्रत्येतव्याः ॥ सूक्ष्म
सांपरायछद्मस्थवीतरागयोश्चतुर्दश ॥ क्षुत्पिपासाशीतोष्णदंशमशकच
र्याशय्यावधालाभरोगतृणस्पर्शमलप्रज्ञाज्ञानानि चतुर्दश इति वचनात् १८१
शेषाणां परीषहाणामभावो वेदितव्यः । आह युक्तं तावत् वीतरागछद्मस्थे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मंतः किंचिज्ज्ञानं तमपि सर्वज्ञः संतानवनायासमानान्तरसमयप्रत्ययस्तावन्नं करोतीति वां
तरायः प्रत्यासत्तुरुत्तरसां प्रत्ययस्तज्ज्ञानं निवृत्तिर्यतीति मिथ्याप्रवृत्तिर्यदि तस्मात् इद
नीं कस्मात् स्वाद्वन्नं करोतीति चेत् प्रणिधानविशेषादिति तस्य सत्कारपुरस्कार
परीषहविजय इति विज्ञायते अंगपूर्वप्रकीर्णकविशारदस्य शब्दन्यायाध्या
त्मनिपुणस्य मम पुरस्तादितरे भास्करप्रभाभिभूतखद्योतोद्योतवन्नितरां नावभासंत इ
ति विज्ञानमदनिरासः प्रज्ञापरीषहजयः प्रत्येतव्यः अज्ञोऽयं न वेत्ति पशुसम
इत्येवमाद्यधिक्षेपवचनं सहमानस्य परमदुश्चरतपोनुष्ठायिनः नित्यमप्रम
त्तचेतसो मे अद्यापि ज्ञानातिशयो नोत्पद्यत इति अनभिसंदधतोऽज्ञानपरीष
ज हजयोऽवगंतव्यः परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्व
स्यार्हदायतनसाधुधर्मपूजकस्य चिरंतनप्रव्रजितस्याद्यापि मे ज्ञानातिश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकादश जिने ॥ निरस्तघातिकर्मचतुष्टये जिने वेदनीयसद्भावात् तदाश्रया
एकादश परीषहाः संति ननु च मोहनीयोदयसहायाभावात् क्षुदादिवेदना
भावे परीषहव्यपदेशो न युक्तः सत्यमेवमेतत् वेदनाभावेपि द्रव्यकर्मसद्भा
वापेक्षया परीषहोपचारः क्रियते निरवशेषनिरस्तज्ञानावरणे युगपत्सम
कलपदार्थावभासिकेवलज्ञाने चिंतानिरोधाभावेपि तत्फलकर्म
निर्हरणफलापेक्षया ध्यानोपचारवत् । अथवा एकादश जिने न संतीति वा
क्यशेषः कल्पनीयः सोपस्करत्वात् सूत्राणां कल्प्यो हि वाक्यशेषः वाक्यं व
क्त्रधीनमिति उपशमात् मोहोदयसहायकृतक्षुदादिवेदनाभावात्
न संतीति वाक्यशेषः स्यात् । यदि सूक्ष्मसांपरायादिषु व्यस्ताः परीषहाः अथ १९०
समस्ताः क्वेति बादरसांपराये सर्वे ॥ सांपरायः कषायः बादरः सांपरायो यस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दनीयालाभान्तरायवक्ष्यमाणानां नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनसत्कारपुरस्कारा
दर्शनानीति तत्कृताष्टपरीषहाणामभावात् चतुर्दशेतिनियमवचनं सूक्ष्मसंपरा
यमोहोदयसद्भावात् चतुर्दशेतिनियमो नोपपद्यत इति तदयुक्तं सन्मात्र
त्वात् तत्र हि केवलो लोभसंज्वलनकषायोदयः सोऽप्यतिसूक्ष्मः ततो वीत
रागछद्मस्थकल्पत्वाच्चतुर्दशेतिनियमस्तत्रापि युज्यते ननु मोहोदयसहाया
भावात् मंदोदयत्वाच्च क्षुदादिवेदनाभावात् तत्सहनकृतपरीषहव्यपदेशो न
युक्तिमवतरति नन्वेवं कारणं शक्तिमात्रापेक्षित्वान्न सर्वार्थसिद्धिदेव
स्य सप्तमपृथिवीगमनसामर्थ्यापदेशनवत् आह यद्येकादश परीषहास्तस्मिन्परी
षहसन्निधानं प्रतिज्ञायते अथ भगवति तत्र केवलज्ञाने कर्मचतुष्टय
फलानुभवनवशवर्तिनि कियंत उपनिपतंतीत्यत्रोच्यते तस्मिन्पुनः ॥ब:

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्शनमोहांतराययोरदर्शनालाभौ ॥ यथासंख्यमभिसंबंधः दर्शनमोहे
अदर्शनपरीषहः लाभांतराये अलाभपरीषह इति आह यद्याद्ये मोहनीय
भेदे एकः परीषहः अथ द्वितीयस्मिन् कति भवंतीत्यत्रोच्यते ॥ चारित्र
मोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः ॥ पुंवेदोद
यादिनिमित्तत्वात् नाग्न्यादिपरीषहाणां मोहोदयनिमित्तत्वं प्रतिपद्यामहे ।
निषद्यापरीषहस्य कथं तत्रापि प्राणिपीडापरिहारार्थत्वात् मोहोदये सति प्रा
णिपीडापरिणामः संजायते इति अवशिष्टपरीषहप्रकृतिविशेषप्रतिपादना
र्थमाह ॥ वेदनीये शेषाः ॥ उक्ता एकादशपरीषहाः तेभ्योन्ये शेषाः वेदनी । १९९
ये सति भवंतीति वाक्यशेषः के पुनस्ते क्षुत्पिपासाशीतोष्णदंशमशकचर्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यसवादरसंपरायइति नेदंगुणस्थानविशेषग्रहणंकिंतर्हिअर्थनिर्द्देशःतेनप्रमत्तादी
नांसंयतानांग्रहणंतेषुहिअक्षीणकषायत्वात्सर्वेसंभवंतिकस्मिन्पुनःचारित्रेस
र्वेषांसंभवःसामायिकछेदोपस्थापनापरिहारविशुद्धिसंयमेषुप्रत्येकंसर्वेषांसं
भवःआहगृहीतमेतत्परीषहाणांस्थानविशेषावधारणं इदंतुनविद्मः
कस्याप्रकृतेःकःकार्यइत्यत्रोच्यते॥ज्ञानावरणेप्रज्ञाज्ञाने॥इदमयुक्तंवर्त्त
तेकिमत्रायुक्तंज्ञानावरणेसत्यज्ञानपरीषहःउपपद्यतेप्रज्ञापरीषहःपु
नस्तदपायेभवतीतिकथंज्ञानावरणेस्यादित्यत्रोच्यतेक्षयोपशमिकीप्र
ज्ञाअन्यस्मिन्ज्ञानावरणेसतिमदंजनयतिनसकलावरणक्षयेइतिज्ञाना
वरणेसतीत्युपपद्यतेपुनरपरयोःपरीषहयोःप्रकृतिविशेषनिर्द्देशार्थमाह॥१३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मः शुभायु[illegible]गोत्राणि के[illegible]प्रकारः। अर्हत्स्व[illegible]णलक्षण
ताबालवृद्धतपस्विवैयावृत्त्य[illegible]यः। सूत्रग्रहणात् सिद्धेः। इतिग्रहणं च द्वि
ध्यानुकंपाद्यान्यस्यापनार्थं तान्तेन महेच्छया आश्रवाः ज्ञेयाः। अथ तदनंतर
राद्दिष्टानां ज्ञो मोहस्याश्रववेदनीयं कर्मोदितं दर्शनमोहस्याश्रवा
दे श्लुप्रतिपादनार्थमिदमुच्यते॥ केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शन
मोहस्य॥ निरावरणज्ञानाः केवलिनः तदुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तग
णधरानुस्मृतग्रंथरचनं श्रुतं रत्नत्रयोपेतः श्रमणगणः संघः अहिंसादिल
क्षणस्तदागमदेशितो धर्मः देवाश्चतुर्णिकाया उक्ताः गुणवत्सु महत्सु
असद्भूतदोषोद्भावनमवर्णवादः एतेष्ववर्णवादः दर्शनमोहस्याश्रवहे १
न तुः कवलाभ्यवहारजीविनः केवलिन इत्येवमादिवचनं केवलिनामवर्ण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मितिसंज्ञस्या॥ तासुतासुगतिषुकर्म्मोदयवशाद्भवंतीतिभूतानिप्राणिनइत्य
र्थः व्रतान्यहिंसादीनिवक्ष्यंते तद्वंतोव्रतिनः तेद्विविधाः अगारंप्रतिनिवृत्तोमु
क्ताः संयताः गृहिणश्चसंयतासंयताः अनुग्रहार्द्रीकृतचेतसः परपीडामा
त्मस्थामिवकुर्वतः अनुकंपनमनुकंपा भूतेषुव्रतिषुवृत्तिषुच अनुकंपाभू
तव्रत्यनुकंपा परानुग्रहबुद्ध्यास्वस्यातिसर्जनंदानं संसारकारणविनिवृत्
तिंप्रत्यागूर्णोऽक्षीणाशयः सरागइत्युच्यते प्राणींद्रियेष्वशुभप्रवृत्तेर्विरति
: संयमः सरागस्यसंयमः सरागसंयमः सरागोवासंयमः आदिग्रहणेनसंय
मासंयमाकामनिर्ज्जराबालतपोनुरोधः योगः समाधिः सम्यक्प्रणि
धानमित्यर्थः भूतव्रत्यनुकंपादानसरागसंयमादीनांयोगः भूतव्रत्यनुकं
पादानसरागसंयमादियोगः क्रोधादिनिवृत्तिः क्षांतिर्लो[illegible]रणमुपर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घट इति यथा तथा धर्माधर्मयोर्लोकाकाशेवगाहो न भवति किं तर्हि कृत्स्ने ति
लेषु तैलवदिति अन्योन्यप्रदेशप्रवेशव्याघाताभावोवगाहनशक्तियोगात्प
रिदृष्टव्यः। अतो विपरीतानां मूर्तिमतां अप्रदेशसंख्येयासंख्येयानंतप्रदेशा
नां पुद्गलानां अवगाहविशेषप्रतिपत्त्यर्थमाह॥ **एकप्रदेशादिषु भाज्यः पु
द्गलानां॥** एकः प्रदेश एकप्रदेशः एकप्रदेश आदिर्येषां त इमे एकप्रदेशाद
यः। तेषु पुद्गलानामवगाहो भाज्यो विकल्प्यः। अवयवेन विग्रहः समुदाय
:समासार्थ इति। एकप्रदेशोपि तावत्तद्यथा। एकस्मिन्नाकाशप्रदेशे पर
माणोरवगाहः। द्वयोरेकत्रोभयत्र च बद्धयोरबद्धयोश्च त्रयाणामप्येकत्र द्व
योस्त्रिषु च बद्धानामबद्धानां च। एवं संख्येयासंख्येयानंतप्रदेशानां स्कंधा ११
नामेकसंख्येयासंख्येयप्रदेशेषु लोकाकाशेवस्थानं प्रत्येतव्यं। ननु युक्तं ता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

युगपद्भाविनामपि आधाराधेयताभावो दृष्टः घटे रूपादयः शरीरे हस्तादय
इति लोक इत्युच्यते को लोकः धर्माधर्मादीनि द्रव्याणि। यत्र लोक्यंते स लोक
इति अधिकरणसाधने घञ् आकाशं द्विधा विभक्तं। लोकाकाशमलोकाका
शंचेति लोकस्तूक्तः। स यत्र तल्लोकाकाशं ततो बहिः सर्वतोऽनंतमलोका
काशं लोकालोकविभागश्च धर्माधर्मास्तिकायसद्भावासद्भावात् विज्ञेयः
असति हि तस्मिन् धर्मास्तिकाये जीवपुद्गलानां गतिनियमहेत्वभावात् वि
भागो न स्यात् असति चाऽधर्मास्तिकाये स्थितेराश्रयनिमित्ताभावात् स्थितेर
भावो लोकालोकविभागाभावो वा स्यात् तस्मादुभयसद्भावासद्भावात् लोकालोकवि
भागसिद्धिः। तत्रावध्रियमाणानां अवस्थानभेदसंभवात् विशेषप्रतिपत्त्य
र्थमाह॥ धर्माधर्मयोः कृत्स्ने॥ कृत्स्नवचनमशेषव्याप्तिप्रदर्शनार्थं अगारेवस्थितो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by SarayuTrust/eGangotri

वस्यवैशेषिगुणः इतिवैशेषिकाः पृथिव्यप्तेजोवायूनांसिद्धलक्षणत्वेतत्रति
तरूपरसगंधस्पर्शवत्त्वात्वायुमनसोरूपादियोगात्तावइतिचेत्नवायु
स्यावस्तुरूपादिमान्स्पर्शवत्त्वात्घटादिवत्चक्षुरादिकरणग्राह्यत्वाभावा
त्रूपाद्युत्तावइतिचेत्परमा(ण्वा)दिश्रुतिप्रसंगः स्यात्आयोगंधवत्त्वः स्प
र्शवत्त्वात्पृथिवीवत्तेजोपिरसगंधवत्रूपवत्त्वात्नचेदेवंमनोपिद्विविधं
द्रव्यमनोभावमनश्चेतितत्रभावमनोज्ञानंतस्यजीवगुणत्वात्आत्मन्यंत
र्भावः द्रव्यमनश्चरूपादियोगाविपुद्गलद्रव्यविकारारूपादिमन्मनज्ञा
नोपयोगकारणत्वात्चक्षुरिंद्रियवत्ननुअमूर्तेपिशब्देज्ञानोपयोगका
रणत्वदर्शनात्व्यभिचारीहेतुरितिचेत् नातस्यपौद्गलिकत्वात्मूर्ति ११
मत्त्वोपपत्तेः ननुयथापरमाणूनांरूपादिकार्यदर्शनात्रूपादिमत्वं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विलिंगं अस्तिचरं निश्चतः धर्मादयोऽद्रव्याणि न भवंति निश्च अनंतरत्वाद्वउणीभवे
द्रव्यपदेशाप्रसंगे अध्यारोपार्थमिदमुच्यते ॥ जीवाश्च ॥ जीवशब्दो व्याख्यातार
र्थः बहुत्वनिर्देशः व्याख्यातभेदप्रतिपत्त्यर्थः चशब्दः द्रव्यसंज्ञानुकर्षणार्थः
जीवाश्च द्रव्याणीति एवमेतानि वक्ष्यमाणेन कालेन सह षड् द्रव्याणि भवंति न
नु द्रव्यस्य लक्षणं वक्ष्यते गुणपर्ययवद् द्रव्यमिति तल्लक्षणयोगात् धर्मादी
नां द्रव्यव्यपदेशो नास्तीति नार्थः परिगणनमवधारणार्थं तेनान्यवादिपरिकल्पि
तानां पृथिव्यादीनां निवृत्तिः कृता भवति पृथिवीत्वजातिविशिष्टपरमाणोश्चत्वा
रो विशेषगुणाः रूपरसगंधस्पर्शाः अप्त्वजातिविशिष्टपरमाणोस्त्रयो विशेष
गुणाः रूपरसस्पर्शाः तेजस्त्वजातिविशिष्टपरमाणोर्गुणद्वयं रूपस्पर्शौ वायुत्व
जातिविशिष्टपरमाणोर्गुणद्वयं रूपस्पर्शौ वायुजातिविशिष्टपरमाणोरेकः प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लेन तत्प्रमाणं स्तिर्यक्प्रसृतस्तिर्यग्लोकः तस्योपरिष्टादूर्द्धलोकः मेरुचूलिकाया उप
रिं ग्राद्योजनोछ्रायानस्यातपरिकेशांतरमात्रेणवस्थितऋजुविमानमिंद्रकं सौ
धर्म्मस्य सर्व्वमन्यल्लोकानुयोगाद्वेदितव्यं नवसु ग्रैवेयकेष्विति नवशब्दस्य पृ
थग्वचनं किमर्थं अन्यान्यपि नवविमानानि अनुदिशसंज्ञिकानि संतीति ज्ञा
पनार्थं तेनानुदिशानां ग्रहणं वेदितव्यं एषामवधृतानां वैमानिकानां परस्प
रतो विशेषप्रतिपत्त्यर्थमाह ॥ स्थितिप्रभावसुखद्युतिलेश्याविशुद्धींद्रियाव
धिविषयतोधिकाः स्वोपात्तस्यायुषः उदयात्तस्मिन्भवे शरीरेण सहस्था
नं स्थितिः शापानुग्रहशक्तिः प्रभावः सुखमिंद्रियार्थानुभवः शरीरवसनाभरणा
दिदीप्तिर्द्युतिः लेश्याः उक्ताः लेश्याया विशुद्धिः लेश्याविशुद्धिः इंद्रियाणामवधे १८
श्च विषयाः इंद्रियावधिविषयाः तेभ्यस्तैर्व्वाधिका इति तसिः उपर्युपरि प्रतिक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रः एवमुत्तरत्रापि योऽयं आगमापेक्षया व्यवस्थानवतीति उपर्युपरीत्वेनेन
द्वयोर्द्वयोरिति संबंधो वेदितव्यः प्रथमौ सौधर्मैशानकल्पौ तु ये. तदुपरि सान
त्कुमारमाहेंद्रौ तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ तयोरुपरि लांतवकापिष्टौ तयो
रुपरि सतारसहस्रारौ तयोरुपरि आनतप्राणतौ तयोरुपरि आरणाच्युतौ
अधउपरि च प्रत्येकमिंद्रसंबंधो वेदितव्यः मध्ये तु प्रति द्वयं सौधर्मैशानस
नत्कुमारमाहेंद्राणां चतुर्णां चत्वार इंद्राः ब्रह्मलोकब्रह्मोत्तरयोरेकः ब्रह्मो
नाम लांतवकापिष्टयोरेको लांतवाख्यः शुक्रमहाशुक्रयोरेकः शुक्रसंज्ञः
सतारसहस्रारयोरेकः सतारनामा आनतप्राणतारणाच्युतानां चतुर्णां चत्वा
रः एवं कल्पवासिनां द्वादश इंद्रा भवंति जंबूद्वीपमहामंदरो योजनसह
स्रावगाहो नवनवतियोजनसहस्रोच्छ्रायः तस्याधस्तादधोलोकः बाद।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रक्षिताः अव्याबाधारिष्टांतरालेमरुद्गणः अरिष्टमारस्वतांतरे अश्ववि
श्वाः सर्वेप्येतेस्वतंत्रादीनाधिकत्वात्ताभावात् विषयरतिविरहात् देवर्षयः इ
तरेषां देवानामर्च्चनीयाः चतुर्दशपूर्वधराः तीर्थकरनिःक्रमणप्रतिबोधन
परा वेदितव्याः अष्टतक्ताः लौकांतिकाः ततश्च्युताः एकं गर्भवासमवाप्य
निर्वास्यंतीत्युक्ताः किमेवमन्येष्वपि निर्वाणप्राप्तिकालविभागो विद्यतइत्यत
आह ॥ विजयादिषुद्विचरमाः ॥ आदिशब्दः प्रकारार्थे वर्त्तते तेनविज
यवैजयंतापराजितानुदिशविमानानामिष्टानां ग्रहणं सिद्धं भवति
कः पुनरत्रप्रकारः अहमिंद्रत्वेसतिसम्यग्दृष्ट्युपपादः सर्वार्थसिद्धिप्रसंग
इतिचेन्न तेषांपरमोत्कृष्टत्वात् अन्वर्थसंज्ञातः एकचरमत्वंसिद्धं चरमत्वं दे १०४
हस्यमनुष्यभवापेक्षयाद्वौचरमौदेहौयेषांतेद्विचरमाः विजयादिभ्यः च्युता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तादित्यवन्ह्यरुणगर्द्दतोयतुषिताव्याबाधारिष्टाश्च ॥ २५ ॥ इमे सारस्वतादयः ।
अष्टास्वपि पूर्वोत्तरादिषु दिक्षु यथाक्रममिमे सारस्वतादयो देवगणा वेदित
व्याः तद्यथा पूर्वोत्तरकोणे सारस्वतविमानं पूर्वस्यां दिशि आदित्यविमानं
पूर्वदक्षिणस्यां दिशि वन्हिविमानं दक्षिणस्यां दिशि अरुणविमानं दक्षि
णापरकोणे गर्द्दतोयविमानं अपरस्यां दिशि तुषितविमानं उत्तरापरस्यां
दिशि अव्याबाधविमानं उत्तरस्यां दिशि अरिष्टविमानं चशब्दसमुच्चिता
स्तेषां मन्तरेषु द्वौ द्वौ देवगणौ तद्यथा सारस्वतादित्यान्तरे अग्न्याभसूर्या
ताः आदित्यमध्ये वन्हेश्चांतरे चंद्राभसत्याभाः वन्ह्यरुणान्तराले श्रेयस्क
रक्षेमंकराः अरुणगर्द्दतोयान्तरे वृषभेष्टकामचाराः गर्द्दतोयतुषितमध्य
ध्ये निर्माणरजोदिगंतरक्षिताः तुषिताव्याबाधमध्ये आत्मरक्षितसर्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रादीनांसागरोपमादिस्थितिर्यथाक्रममभिसंबंधेवेदितव्या: इयंस्थितिरु
त्कृष्टाजघन्याप्युत्तरत्रवक्ष्यते तद्यथा असुराणांसागरोपमस्थिति: नागा
नांत्रिपल्योपमानिस्थिति:सुपर्णानामर्द्धतृतीयानिद्वीपानांद्वेशेषाणांषण्णाम
ध्यर्द्धपल्योपमं आद्यदेवनिकायस्थित्यभिधानादनंतरंव्यंतरज्योतिष्का
स्थितिवचनेक्रमप्राप्तेसतितदुल्लंघ्यवैमानिकानांस्थितिरुच्यतेकुतस्त
योरुत्तरत्रलघुनोपायेनस्थितिवचनात्तेष्वादावुद्दिष्टयो:क
ल्पयो:स्थितिविधानार्थमाह ॥ सौधर्मैशानयोसागरोपमेअधिके
सागरोपमेइति द्विवचननिर्देशात्द्वित्वगति: अधिकेइत्ययमधिका
र: आउत: आसहस्रारात्तदेतत्कुतोज्ञायतेउत्तरत्रतुग्रहणात्तो १८६३
नेनसौधर्मैशानयोर्देवानांद्वेसागरोपमेसातिरेकेप्रत्येतव्ये उत्तरयो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्रतिपतितसम्यक्त्वाः मनुष्येषूत्पद्य संयममाराध्य पुनर्विजयादिषूत्पद्य
ततः च्युताः पुनर्मनुष्यत्वमवाप्य सिध्यंतीति द्विचरमदेहत्वं आदत्वं आद औ
पशमिकादयिकेषु भावेषु तिर्यग्योनिगतिरौदयिकी उक्तं पुनश्च स्थितौ ति
र्यग्योनिजानां चेति तत्र न ज्ञायते के तिर्यग्योनयः औपपादिकास्तु काः दे
वनारकाः मनुष्याश्च निर्दिष्टाः प्राङ्मानुषोत्तरान्मनुष्या इति प्रोक्तं तेभ्य ए
संसारिणो जीवाः शेषाः ते तिर्यग्योनयो वेदितव्याः एषां तिरश्चां देवादीना
मव क्षेत्रविभागः पुनः निर्दिष्टव्यः सर्वलोकव्यापित्वात्तेषां क्षेत्रविभागो नोक्त
: आह स्थितिरुक्ता नारकाणां मनुष्याणां तिरश्चां च देवानां नोक्ता तस्याव
वक्तव्यायां आदावुद्दिष्टानां भवनवासिनां स्थितिप्रतिपादनार्थमाह ॥ स्थिति
रसुरनागसुवर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीनमिता ॥ असु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्त्रुवांतरमिति। आयुषोनंतरमुद्दिष्टस्य नाम्नः आस्रवविधौ [illegible] वचाशुभत
नाम्नः आस्रवप्रतिपत्त्यर्थमाह॥ योगवक्रताविसंवादनं चाशुभस्य॥ ना
म्नः योगः स्त्रिप्रकारो व्याख्यातः तस्य वक्रता कौटिल्यं विसंवादनमन्यथा
प्रवर्तनं ननु च नार्थभेदः योगवक्रतैवान्यथाप्रवर्तनं सत्यमेवमेतत्स्वग
ता योगवक्रतेसु परगतं विसंवादनं सम्यगभ्युदयनिःश्रेयसार्थासु क्रिया
सु प्रवर्तमानमन्यं तद्विपरीतकायवाङ्मनोभिर्विसंवादयति मैवं कार्षी
रेवं कुर्विति एतदुभयमशुभनामकर्मास्रवकारणं वेदितव्यं चशब्देन
मिथ्यादर्शनपैशुन्यास्थिरचित्तताकूटमानतुलाकरणपरनिंदात्मप्र
शंसादिः समुच्चीयते। अथ शुभनामकर्मणः क आस्रव इत्यत्रोच्यते॥ त
द्विपरीतं शुभस्य॥ कायवाङ्मनसामृजुत्वमविसंवादनं च तद्विपरीतं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उर्द्धस्यायुषः कस्यास्त्रवइत्युच्यते॥ सरागसंयमाकामनिर्ज्जराबालतपांसि
दैवस्यः॥ सरागसंयमासंयमश्च व्याख्यातौ अकामनिर्ज्जरा अकामश्चार
कनिरोधबंधनबद्धेषु क्षुत्तृष्णानिरोधब्रह्मचर्यभूशय्यामलधारणपरितापा
दिः। अकामेन निर्ज्जरा अकामनिर्ज्जरा बालतपांसि प्रागुक्तानि एतं अत्र प्राग्
एकायकेशप्रदेशं निःसतिबकुलवृक्षमूलधारणांतान्यदैवस्यायुषः। आस्रवा
इत्यवेदितव्याः। किमेतावानेव दैवस्यायुषः आस्रवो नेत्याह॥ सम्यक्त्वं
च॥ किं दैवस्यायुषः आस्रवइत्यनुवर्त्तते अविशेषाभिधानेपि सौधर्मादि
विशेषगतिः कुतः पृथक्करणात् यद्येवं पूर्वसूत्रे उक्तः आस्रवविधिः सर्वो
विशेषेण प्रसक्तः। तेन सरागसंयमासंयमावपि भवनवास्याद्यायुषः आ
स्रवौ प्राप्नुतः नैषदोषः। सम्यक्त्वाभावे सति तद्व्यपदेशाभावात् तदुभयमपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्शनविशुद्धिः प्रागुक्तलक्षणा तस्या अष्टावंगानि निःशंकिता निःकांक्षिता
विचिकित्साविरहता अमूढदृष्टिता उपबृंहणं स्थितिकरणं वात्सल्यं प्रभाव
नं चेति सम्यग्ज्ञानादिषु मोक्षसाधनेषु च गुर्वादिषु स्वयोग्यवृत्त्या सत्कार
आदरो विनयः तेन संपन्नता विनयसंपन्नता अहिंसादिषु व्रतेषु तत्प्रति
पालनार्थेषु च क्रोधवर्जनादिषु शीलेषु निरवद्या वृत्तिः शीलव्रतेष्वनति
चारः जीवादिपदार्थस्वतत्त्वविषये सम्यग्ज्ञाने नित्ययुक्तता अभीक्ष्णज्ञा
नोपयोगः संसारदुःखान्नित्यभीरुता संवेगः त्यागो दानं तत्त्रिविधमाहार
दानमभयदानं ज्ञानदानं चेति तच्छक्तितः यथाविधि प्रयुज्यमानं त्याग इ
त्युच्यते अनिगूहितवीर्यस्य मार्गाविरोधी कायक्लेशः तपः यथा भांडागारे १८
दहने समुत्थिते तत्प्रशमनमनुष्ठीयते बहूपकारत्वात् तथानेकव्रतशील

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चशब्देनसमुच्चितस्यविपरीतंग्राह्यंधार्मिकदर्शनसंभ्रमसद्भावोपनयनसंस
रणालीकताप्रमादवर्जनादिःतदेतच्छुभनामकर्माश्रवकारणंवेदितव्यंआ
हकिमेतावानेवशुभनाम्नःआश्रवविधिःउतकश्चिदस्तिप्रतिविशेषइ
त्यत्रोच्यते यदिदंतीर्थकरनामकर्मानंतानुपमप्रभावमचिंत्यविभूतिवि
शेषकारणंत्रैलोक्यविजयकरंतस्याश्रवविधिविशेषोस्तीतियद्येवमुच्यतां
केतस्याश्रवाःइत्यतइदमारभ्यते॥दर्शनविशुद्धिर्विनयसंपन्नताशील
व्रतेष्वनतिचारोभीक्ष्णज्ञानोपयोगसंवेगौशक्तितस्त्यागतपसीसाधुसा
माधिर्वैयावृत्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यका
परिहाणिर्मार्गप्रभावनाप्रवचनवत्सलत्वमितितीर्थकरत्वस्य॥जिनेनभ
गवतार्हतापरमेष्ठिनोपदिष्टेनिर्ग्रंथलक्षणेमोक्ष[illegible]रुचिर्वि

Ganesh Varni Digambar Jain Institute, Narla, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृदातो॰ दयोवद्दवोभेदाः। संतिस्मिन्नित्यादिक्रमाश्चतन्सूचनार्थः। देवगतिनामकर्मोदयस्
त्यस्य कर्मविशेषापादितभेदस्य सामर्थ्यान्निचीयंत इति निकायाः संघात
इत्यर्थः। चत्वारो निकाया येषां ते चतुर्णिकायाः। के पुनस्ते भवनवासिनो व्यंतराज्यो
तिष्काः वैमानिकाश्चेति। तेषां लेश्यावधारणार्थमुच्यते॥ सूत्रं॥ आदितस्त्रिषुपीतांत
लेश्याः॥ आदित इत्युच्यते अन्यथावाग्रहणंमाविज्ञायीति आदौ आदितः
द्वयोरेकस्य निवृत्त्यर्थं त्रिग्रहणं क्रियते अथ चतुर्णां निवृत्त्यर्थं कस्मान्न भवत
आदित इति वचनात् षट् लेश्याः उक्तास्तत्र चतसृणां लेश्यानां ग्रहणार्थं
पीतांतेष्ठ इत्यर्थः पीताश्चतेयासांताः पीतांताः पीतांताः लेश्या येषां ते पीतां
तलेश्याः एतदुक्तं भवति आदितस्त्रिषु निकायेषु भवनवासिव्यंतरज्यो २५
तिष्कानां देवानां कृष्णानीलाकापोतापीतेति चतस्रो लेश्या भवंति तेषां नि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिरश्चां योनिः तिर्यग्योनिः तिर्यग्गतिनामकर्मोदयापादितं जन्मेत्यर्थः। तिर्य
ग्योनौ जाताः। तिर्यग्योनिजाः। तेषां तिर्यग्योनिजानामुत्कृष्टा भवस्थितिस्त्रिपल्यो
पमा जघन्यान्तर्मुहूर्ता मध्यमविकल्पाः॥ इति तत्त्वार्थवृत्तौ सर्वार्थसिद्धिसंज्ञिकायां
तृतीयोऽध्यायः समाप्तः॥३॥ ॐ॥ त्रिविलेषणाद्याद्युद्वीपोदधिवास्य गिरिसरः
सरितां मानं नृणां भेदस्थितिस्तिरश्चामपि तृतीयेऽध्याये भवप्रत्ययोऽवधिर्देवनारका
णामित्येवमादिष्वसकृद्देवशब्द उक्तः तत्र न ज्ञायन्ते के देवाः। कतिविधाश्चेति तन्नि
र्णयार्थमाह। सूत्रं। देवाश्चतुर्णिकायाः॥ देवगतिनामकर्मोदये सत्यभ्यन्तरे हे
तौ बाह्यविभूतिविशेषैः। द्वीपाद्रिसमुद्रादिषु प्रदेशेषु यथेष्टं दीव्यन्ति क्रीडन्तीति दे
वाः। इहैकवचननिर्देशो युक्तः। देवश्चतुर्णिकाय इति स जात्यभिधानाद्बहू
नां प्रतिपादको भवति बहुत्वनिर्देशस्तदन्तर्गतभेदप्रतिपत्त्यर्थः। इंद्रसामानिका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बध्यते प्रत्याख्यानावरणक्रोधमानमायालोभानां चतस्र
योदयकोणां संयमासंयमाख्यानां केडियप्रहृतयः संयता:
कास्तदनावाडपरिष्टात्सामसंवरः प्रमादोपनीतस्यात
देनोपनीतस्य कर्म्मणः प्रमत्तसंयतादूर्द्धं तदभावान्निरो
नस्तत् अप्रमत्ते अरतिशोकास्थिराशुभायशःकीर्त्ति
रं तस्य प्रमाद एव बंधहेतुः अप्रमादापितस्यास्यासन्नस्तनकं
कषायपवाश्रवीयस्य कर्मणः न प्रमादादिः तस्य त
: सचकषायप्रमादविरहितः तीव्रमंदाघन्य न स
त्वस्थि: तत्रापूर्वकरणस्यादौ संख्येयतमे भागे :
ध्येते ततऊर्द्धं संख्येयतमे शर वर्त्तमो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यिकाहारकतैजसकार्म्मणा[illegible]शरीरस[illegible]रस्व[illegible]नमित्यर्थः। तिर्य
रांगोपांगवर्णगंधरसस्पर्शदेवगतिप्रायोग्यानु[illegible]
शस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकशरीरस्थिरस्थिरत्या
निर्माणतीर्थकराख्याः बध्यंते तस्येवचरमसमयेवतं संज्ञिनायां
लयजुगुप्सासंज्ञाः बंधमुपयांति तात्पर्यं नास्तीवकषायाश्चत्वाः तन्न
नुतागाहूर्ध्वसंचूयंते अनिवृत्तिबादरसांपरायस्यादिम वनीरका
घुपुंवेदक्रोधसंज्वलननौबध्यंते ततऊर्ध्वशेषषुसंख्येयभुत रतितनि
मायासंज्वलननौबंधमुपगच्छतः चतस्येवचरमसमये लोभ पतरहा
ताघताःप्रकृतयः मध्यमकषायाश्चवास्तदनावनिर्दिष्टः कांनीतिवे
रमाप्नुवंति पंचानांज्ञानावरणानांचतुर्णांदर्शनावरणानं नीतबद्धा
नामानि[illegible]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्य पंचानां अंतरायाणां च मंदकषायाश्रवाणां सूक्ष्मसां
रच तेषां संवरः। केवलेनैव योगेन सद्वेद्यस्य उपशांत
नां बंधो भवति। तदभावादयोगकेवलिनस्तस्य संवरो
प्रतिपादनार्थमाह॥ सगुप्तिसमितिधर्म्मानुप्रेक्षापरीष
सारकारणादात्मनो गोपनं भवति सा गुप्तिः प्राणिपीडाप
तिः इष्टे स्थाने धत्ते इति धर्म्मः शरीरादीनां स्वभावानुचिंत
दनोत्पत्तौ कर्म्मनिर्ज्जरार्थं सहनं परीषहः परीषहस्य जय
शब्दः आदिसूत्रे व्याख्यातार्थः। एतेषां गुप्त्यादीनां संव
तकरणनिर्देशः संवरोधिकृतोपि स इति तच्छब्दे
त्सांबंधनार्थः किंप्रयोजनमवधा[illegible]र्थं स

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्येनोपायेनेति तेन तीर्थाभिषेक-दीक्षा-[illegible]
ति रागद्वेषमोहोपात्तस्य कर्मणः अन्यथा निवृत्ते[illegible]
विशेषणमिति प्रादनार्थमाह ॥ तपसा निर्जरा च ॥ तपो ध[illegible]
ते उभयसाधनत्वख्यापनार्थं संवरं प्रतिप्राधान्यप्रति[illegible]
दयांगमिष्टं देवेंद्रादिस्थानप्राप्तिहेतुत्वाभ्युपगमात्तत्क[illegible]
नैष दोषः ॥ एकस्यानेककार्यदर्शनादग्निवत् । यथाग्नि[illegible]
ङ्गारादिप्रयोजन उपलभ्यते । तथा तपोभ्युदयकर्म[illegible]
रोधः संवरस्यादावुद्दिष्टायाः गुप्तेः स्वरूपप्रति[illegible]
ग्योगनिग्रहो गुप्तिः ॥ योगो व्याख्यातः कायवाङ्मनःक[illegible]
वृत्तिनिवर्तनं निग्रहः विषयसुखाभिलाषार्थप्र[illegible]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi